# 1 Shrimaddevibhagavatamahapurane Prathamah Skandhah

# ૧ શ્રીમદ્દેવીભાગવતમહાપુરાણે પ્રથમઃ સ્કન્ધઃ

## Document Information


Text title : Devi Bhagavata Mahapurana Skandha 01

File name : devIbhAgavatam01.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# ૧ શ્રીમદ્દેવીભાગવતમહાપુરાણે પ્રથમઃ સ્કન્ધઃ

## ૧.૧ પ્રથમોઽધ્યાયઃ । શૌનકપ્રશ્નઃ ।

ૐ સર્વચૈતન્યરૂપાં તાં આદ્યાં વિદ્યાં ચ ધીમહિ ।
બુદ્ધિં યા નઃ પ્રચોદયાત્ ॥ ૧॥

શૌનક ઉવાચ -
સૂત સૂત મહાભાગ ધન્યોઽસિ પુરુષર્ષભ ।
યદધીતાસ્ત્વયા સમ્યક્ પુરાણસંહિતાઃ શુભાઃ ॥ ૨॥

અષ્ટાદશ પુરાણાનિ કૃષ્ણેન મુનિનાનઘ ।
કથિતાનિ સુદિવ્યાનિ પઠિતાનિ ત્વયાનઘ ॥ ૩॥

પઞ્ચલક્ષણયુક્તાનિ સરહસ્યાનિ માનદ ।
ત્વયા જ્ઞાતાનિ સર્વાણિ વ્યાસાત્સત્યવતીસુતાત્ ॥ ૪॥

અસ્માકં પુણ્યયોગેન પ્રાપ્તસ્ત્વં ક્ષેત્રમુત્તમમ્ ।
દિવ્યં વિશ્વસનં પુણ્યં કલિદોષવિવર્જિતમ્ ॥ ૫॥

સમાજોઽયં મુનીનાં હિ શ્રોતુકામોઽસ્તિ પુણ્યદામ્ ।
પુરાણસંહિતાં સૂત બ્રૂહિ ત્વં નઃ સમાહિતઃ ॥ ૬॥

દીર્ઘાયુર્ભવ સર્વજ્ઞ તાપત્રયવિવર્જિતઃ ।
કથયાદ્ય મહાભાગ પુરાણં બ્રહ્મસમ્મિતમ્ ॥ ૭॥

શ્રોત્રેન્દ્રિયયુતાઃ સૂત નરાઃ સ્વાદવિચક્ષણાઃ ।
ન શ‍ૃણ્વન્તિ પુરાણાનિ વઞ્ચિતા વિધિના હિ તે ॥ ૮॥

યથા જિહ્વેન્દ્રિયાહ્લાદઃ ષડ્રસૈઃ પ્રતિપદ્યતે ।
તથા શ્રોત્રેન્દ્રિયાહ્લાદો વચોભિઃ સુધિયાં સ્મૃતઃ ॥ ૯॥

અશ્રોત્રાઃ ફણિનઃ કામં મુહ્યન્તિ હિ નભોગુણૈઃ ।
સકર્ણા યે ન શ‍ૃણ્વન્તિ તેઽપ્યકર્ણાઃ કથં ન ચ ॥ ૧૦॥

અતઃ સર્વે દ્વિજાઃ સૌમ્ય શ્રોતુકામાઃ સમાહિતાઃ ।
વર્તન્તે નૈમિષારણ્યે ક્ષેત્રે કલિભયાર્દિતાઃ ॥ ૧૧॥

યેન કેનાપ્યુપાયેન કાલાતિવાહનં સ્મૃતમ્ ।
વ્યસનૈરિહ મૂર્ખાણાં બુધાનાં શાસ્ત્રચિન્તનૈઃ ॥ ૧૨॥

શાસ્ત્રાણ્યપિ વિચિત્રાણિ જલ્પવાદયુતાનિ ચ ।
ત્રિવિધાનિ પુરાણાનિ શાસ્ત્રાણિ વિવિધાનિ ચ ।
વિતાણ્ડાચ્છલયુક્તાનિ ગર્વામર્ષકરાણિ ચ ।
નાનાર્થવાદયુક્તાનિ હેતુમન્તિ બૃહન્તિ ચ ॥ ૧૩॥

સાત્ત્વિકં તત્ર વેદાન્તં મીમાંસા રાજસં મતમ્ ।
તામસં ન્યાયશાસ્ત્રં ચ હેતુવાદાભિયન્ત્રિતમ્ ॥ ૧૪॥

તથૈવ ચ પુરાણાનિ ત્રિગુણાનિ કથાનકૈઃ ।
કથિતાનિ ત્વયા સૌમ્ય પઞ્ચલક્ષણવન્તિ ચ ॥ ૧૫॥

તત્ર ભાગવતં પુણ્યં પઞ્ચમં વેદસમ્મિતમ્ ।
કથિતં યત્ત્વયા પૂર્વં સર્વલક્ષણસંયુતમ્ ॥ ૧૬॥

ઉદ્દેશમાત્રેણ તદા કીર્તિતં પરમાદ્ભુતમ્ ।
મુક્તિપ્રદં મુમુક્ષૂણાં કામદં ધર્મદં તથા ॥ ૧૭॥

વિસ્તરેણ તદાખ્યાહિ પુરાણોત્તમમાદરાત્ ।
શ્રોતુકામા દ્વિજાઃ સર્વે દિવ્યં ભાગવતં શુભમ્ ॥ ૧૮॥

ત્વં તુ જાનાસિ ધર્મજ્ઞ પૌરાણીં સંહિતાં કિલ ।
કૃષ્ણોક્તાં ગુરુભક્તત્વાત્ સમ્યક્ સત્ત્વગુણાશ્રયઃ ॥ ૧૯॥

શ્રુતાન્યન્યાનિ સર્વજ્ઞ ત્વન્મુખાન્નિઃસૃતાનિ ચ ।
નૈવ તૃપ્તિં વ્રજામોઽદ્ય સુધાપાનેઽમરા યથા ॥ ૨૦॥

ધિક્સુધાં પિબતાં સૂત મુક્તિર્નૈવ કદાચન ।
પિબન્ભાગવતં સદ્યો નરો મુચ્યેત સઙ્કટાત્ ॥ ૨૧॥

સુધાપાનનિમિત્તં યત્ કૃતા યજ્ઞાઃ સહસ્રશઃ ।
ન શાન્તિમધિગચ્છામઃ સૂત સર્વાત્મના વયમ્ ॥ ૨૨॥

મખાનાં હિ ફલં સ્વર્ગઃ સ્વર્ગાત્પ્રચ્યવનં પુનઃ ।
એવં સંસારચક્રેઽસ્મિન્ ભ્રમણં ચ નિરન્તરમ્ ॥ ૨૩॥

વિના જ્ઞાનેન સર્વજ્ઞ નૈવ મુક્તિઃ કદાચન ।
ભ્રમતાં કાલચક્રેઽત્ર નરાણાં ત્રિગુણાત્મકે ॥ ૨૪॥

અતઃ સર્વરસોપેતં પુણ્યં ભાગવતં વદ ।
પાવનં મુક્તિદં ગુહ્યં મુમુક્ષૂણાં સદા પ્રિયમ્ ॥ ૨૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે શૌનકપ્રશ્નઃ નામ પ્રથમોઽધ્યાયઃ ॥ ૧.૧॥

## ૧.૨ દ્વિતીયોઽધ્યાયઃ । ગ્રન્થસઙ્ખ્યાવિષયવર્ણનમ્ ।

સૂત ઉવાચ ।
ધન્યોઽહમતિભાગ્યોઽહં પાવિતોઽહં મહાત્મભિઃ ।
યત્પૃષ્ટં સુમહત્પુણ્યં પુરાણં વેદવિશ્રુતમ્ ॥ ૧॥

તદહં સમ્પ્રવક્ષ્યામિ સર્વશ્રુત્યર્થસમ્મતમ્ ।
રહસ્યં સર્વશાસ્ત્રાણામાગમાનામનુત્તમમ્ ॥ ૨॥

નત્વા તત્પદપઙ્કજં સુલલિતં મુક્તિપ્રદં યોગિનામ્ ॥

બ્રહ્માદ્યૈરપિ સેવિતં સ્તુતિપરૈર્ધ્યેયં મુનીન્દ્રૈઃ સદા ।
વક્ષ્યામ્યદ્ય સવિસ્તરં બહુરસં શ્રીમત્પુરાણોત્તમમ્ ॥

ભક્ત્યા સર્વરસાલયં ભગવતીનામ્ના પ્રસિદ્ધં દ્વિજાઃ ॥ ૩॥

યા વિદ્યેત્યભિધીયતે શ્રુતિપથે શક્તિઃ સદાદ્યા પરા ॥

સર્વજ્ઞા ભવબન્ધછિત્તિનિપુણા સર્વાશયે સંસ્થિતા ।
દુર્જ્ઞેયા સુદુરાત્મભિશ્ચ મુનિભિર્ધ્યાનાસ્પદં પ્રાપિતા ॥

પ્રત્યક્ષા ભવતીહ સા ભગવતી સિદ્ધિપ્રદા સ્યાત્સદા ॥ ૪॥

સૃષ્ટ્વાખિલં જગદિદં સદસત્સ્વરૂપં
શક્ત્યા સ્વયા ત્રિગુણયા પરિપાતિ વિશ્વમ્ ।
સંહૃત્ય કલ્પસમયે રમતે તથૈકા
તાં સર્વવિશ્વજનનીં મનસા સ્મરામિ ॥ ૫॥

બ્રહ્મા સૃજત્યખિલમેતદિતિ પ્રસિદ્ધં
પૌરાણિકૈશ્ચ કથિતં ખલુ વેદવિદ્ભિઃ ।
વિષ્ણોસ્તુ નાભિકમલે કિલ તસ્ય જન્મ

તૈરુક્તમેવ સૃજતે ન હિ સ સ્વતન્ત્રઃ ॥ ૬॥

વિષ્ણુસ્તુ શેષશયને સ્વપિતીતિ કાલે
તન્નાભિપદ્મમુકુલે ખલુ તસ્ય જન્મ ।
આધારતાં કિલ ગતોઽત્ર સહસ્રમૌલિઃ
સમ્બોધ્યતાં સ ભગવાન્ હિ કથં મુરારિઃ ॥ ૭॥

એકાર્ણવસ્ય સલિલં રસરૂપમેવ
પાત્રં વિના ન હિ રસસ્થિતિરસ્તિ કશ્ચિત્ ।
યા સર્વભૂતવિષયે કિલ શક્તિરૂપા
તાં સર્વભૂતજનનીં શરણં ગતોઽસ્મિ ॥ ૮॥

યોગનિદ્રામીલિતાક્ષં વિષ્ણું દૃષ્ટ્વામ્બુજે સ્થિતઃ ।
અજસ્તુષ્ટાવ યાં દેવીં તામહં શરણં ગતઃ ॥ ૯॥

તાં ધ્યાત્વા સગુણાં માયાં મુક્તિદાં નિર્ગુણાં તથા ।
વક્ષ્યે પુરાણમખિલં શ‍ૃણ્વન્તુ મુનયસ્ત્વિહ ॥ ૧૦॥

પુરાણમુત્તમં પુણ્યં શ્રીમદ્ભાગવતાભિધમ્ ।
અષ્ટાદશ સહસ્રાણિ શ્લોકાસ્તત્ર તુ સંસ્કૃતાઃ ॥ ૧૧॥

સ્કન્ધા દ્વાદશ ચૈવાત્ર કૃષ્ણેન વિહિતાઃ શુભાઃ ।
ત્રિશતં પૂર્ણમધ્યાયા અષ્ટાદશયુતાઃ સ્મૃતાઃ ॥ ૧૨॥

વિંશતિઃ પ્રથમે તત્ર દ્વિતીયે દ્વાદશૈવ તુ ।
ત્રિંશચ્ચૈવ તૃતીયે તુ ચતુર્થે પઞ્ચવિંશતિઃ ॥ ૧૩॥

પઞ્ચત્રિંશત્તથાધ્યાયાઃ પઞ્ચમે પરિકીર્તિતાઃ ।
એકત્રિંશત્તથા ષષ્ઠે ચત્વારિંશચ્ચ સપ્તમે ॥ ૧૪॥

અષ્ટમે તત્ત્વસઙ્ખ્યાશ્ચ પઞ્ચાશન્નવમે તથા ।
ત્રયોદશ તુ સમ્પ્રોક્તા દશમે મુનિના કિલ ॥ ૧૫॥

તથા ચૈકાદશસ્કન્ધે ચતુર્વિંશતિરીરિતાઃ ।
ચતુર્દશૈવ ચાધ્યાયા દ્વાદશે મુનિસત્તમાઃ ॥ ૧૬॥

એવં સઙ્ખ્યા સમાખ્યાતા પુરાણેઽસ્મિન્મહાત્મના ।
અષ્ટાદશસહસ્રીયા સઙ્ખ્યા ચ પરિકીર્તિતા ॥ ૧૭॥

સર્ગશ્ચ પ્રતિસર્ગશ્ચ વંશો મન્વન્તરાણિ ચ ।

વંશાનુચરિતં ચૈવ પુરાણં પઞ્ચલક્ષણમ્ ॥ ૧૮॥

નિર્ગુણા યા સદા નિત્યા વ્યાપિકા વિકૃતા શિવા ।
યોગગમ્યાખિલાધારા તુરીયા યા ચ સંસ્થિતા ॥ ૧૯॥

તસ્યાસ્તુ સાત્ત્વિકી શક્તી રાજસી તામસી તથા ।
મહાલક્ષ્મીઃ સરસ્વતી મહાકાલીતિ તાઃ સ્ત્રિયઃ ॥ ૨૦॥

તાસાં તિસૃણાં શક્તીનાં દેહાઙ્ગીકારલક્ષણઃ ।
સૃષ્ટ્યર્થં ચ સમાખ્યાતઃ સર્ગઃ શાસ્ત્રવિશારદૈઃ ॥ ૨૧॥

હરિદ્રુહિણરુદ્રાણાં સમુત્પત્તિસ્તતઃ સ્મૃતા ।
પાલનોત્પત્તિનાશાર્થં પ્રતિસર્ગઃ સ્મૃતો હિ સઃ ॥ ૨૨॥

સોમસૂર્યોદ્ભવાનાં ચ રાજ્ઞાં વંશપ્રકીર્તનમ્ ।
હિરણ્યકશિપ્વાદીનાં વંશાસ્તે પરિકીર્તિતાઃ ॥ ૨૩॥

સ્વાયમ્ભુવમુખાનાં ચ મનૂનાં પરિવર્ણનમ્ ।
કાલસઙ્ખ્યા તથા તેષાં તત્તન્મન્વન્તરાણિ ચ ॥ ૨૪॥

તેષાં વંશાનુકથનં વંશાનુચરિતં સ્મૃતમ્ ।
પઞ્ચલક્ષણયુક્તાનિ ભવન્તિ મુનિસત્તમાઃ ॥ ૨૫॥

સપાદલક્ષં ચ તથા ભારતં મુનિના કૃતમ્ ।
ઇતિહાસ ઇતિ પ્રોક્તં પઞ્ચમં વેદસમ્મતમ્ ॥ ૨૬॥

શૌનક ઉવાચ ।
કાનિ તાનિ પુરાણાનિ બ્રૂહિ સૂત સવિસ્તરમ્ ।
કતિસઙ્ખ્યાનિ સર્વજ્ઞ શ્રોતુકામા વયં ત્વિહ ॥ ૨૭॥

કલિકાલવિભીતાઃ સ્મો નૈમિષારણ્યવાસિનઃ ।
બ્રહ્મણાત્ર સમાદિષ્ટાશ્ચક્રં દત્ત્વા મનોમયમ્ ॥ ૨૮॥

કથિતં તેન નઃ સર્વાન્ગચ્છન્ત્વેતસ્ય પૃષ્ઠતઃ ।
નેમિઃ સંશીર્યતે યત્ર સ દેશઃ પાવનઃ સ્મૃતઃ ॥ ૨૯॥

કલેસ્તત્ર પ્રવેશો ન કદાચિત્ સમ્ભવિષ્યતિ ।
તાવત્તિષ્ઠન્તુ તત્રૈવ યાવત્સત્યયુગં પુનઃ ॥ ૩૦॥

તચ્છ્રુત્વા વચનં તસ્ય ગૃહીત્વા તત્કથાનકમ્ ।
ચાલયન્નિર્ગતસ્તૂર્ણં સર્વદેશદિદૃક્ષયા ॥ ૩૧॥

પ્રેત્યાત્ર ચાલયંશ્ચક્રં નેમિઃ શીર્ણોઽત્ર પશ્યતઃ ।
તેનેદં નૈમિષં પ્રોક્તં ક્ષેત્રં પરમપાવનમ્ ॥ ૩૨॥

કલિપ્રવેશો નૈવાત્ર તસ્માત્સ્થાનં કૃતં મયા ।
મુનિભિઃ સિદ્ધસઙ્ઘૈશ્ચ કલિભીતૈર્મહાત્મભિઃ ॥ ૩૩॥

પશુહીનાઃ કૃતા યજ્ઞાઃ પુરોડાશાદિભિઃ કિલ ।
કાલાતિવાહનં કાર્યં યાવત્સત્યયુગાગમઃ ॥ ૩૪॥

ભાગ્યયોગેન સમ્પ્રાપ્તઃ સૂત ત્વં ચાત્ર સર્વથા ।
કથયાદ્ય પુરાણં હિ પાવનં બ્રહ્મસમ્મતમ્ ॥ ૩૫॥

સૂત શુશ્રૂષવઃ સર્વે વક્તા ત્વં મતિમાનથ ।
નિર્વ્યાપારા વયં નૂનમેકચિત્તાસ્તથૈવ ચ ॥ ૩૬॥

ત્વં સૂત ભવ દીર્ઘાયુસ્તાપત્રયવિવર્જિતઃ ।
કથયાદ્ય પુરાણં હિ પુણ્યં ભાગવતં શિવમ્ ॥ ૩૭॥

યત્ર ધર્માર્થકામાનાં વર્ણનં વિધિપૂર્વકમ્ ।
વિદ્યાં પ્રાપ્ય તયા મોક્ષઃ કથિતો મુનિના કિલ ॥ ૩૮॥

દ્વૈપાયનેન મુનિના કથિતં યચ્ચ પાવનમ્ ।
ન તૃપ્યામો વયં સૂત કથાં શ્રુત્વા મનોરમામ્ ॥ ૩૯॥

સકલગુણગણાનામેકપાત્રં પવિત્ર- ॥

મખિલભુવનમાતુર્નાટ્યવદ્યદ્વિચિત્રમ્ ।
નિખિલમલગણાનાં નાશકૃત્કામકન્દમ્ ॥

પ્રકટય ભગવત્યા નામયુક્તં પુરાણમ્ ॥ ૪૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે ગ્રન્થસઙ્ખ્યાવિષયવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૧.૨॥

## ૧.3 તૃતીયોઽધ્યાયઃ । પુરાણવર્ણનપૂર્વકતત્તદ્યુગીયવ્યાસવર્ણનમ્ ।

સૂત ઉવાચ ।
શૃણ્વન્તુ સમ્પ્રવક્ષ્યામિ પુરાણાનિ મુનીશ્વરાઃ ।
યથાશ્રુતાનિ તત્ત્વેન વ્યાસાત્સત્યવતીસુતાત્ ॥ ૧॥

મદ્વયં ભદ્વયં ચૈવ બ્રત્રયં વચતુષ્ટયમ્ ।
અનાપલિઙ્ગકૂસ્કાનિ પુરાણાનિ પૃથક્પૃથક્ ॥ ૨॥

ચતુર્દશસહસ્રં ચ મત્સ્યમાદ્યં પ્રકીર્તિતમ્ ।
તથા ગ્રહસહસ્રં તુ માર્કણ્ડેયં મહાદ્ભુતમ્ ॥ ૩॥

ચતુર્દશસહસ્રાણિ તથા પઞ્ચશતાનિ ચ ।
ભવિષ્યં પરિસઙ્ખ્યાતં મુનિભિસ્તત્ત્વદર્શિભિઃ ॥ ૪॥

અષ્ટાદશસહસ્રં વૈ પુણ્યં ભાગવતં કિલ ।
તથા ચાયુતસઙ્ખ્યાકં પુરાણં બ્રહ્મસંજ્ઞકમ્ ॥ ૫॥

દ્વાદશૈવ સહસ્રાણિ બ્રહ્માણ્ડં ચ શતાધિકમ્ ।
તથાષ્ટાદશસાહસ્રં બ્રહ્મવૈવર્તમેવ ચ ॥ ૬॥

અયુતં વામનાખ્યં ચ વાયવ્યં ષટ્શતાનિ ચ ।
ચતુર્વિંશતિસઙ્ખ્યાતઃ સહસ્રાણિ તુ શૌનક ॥ ૭॥

ત્રયોવિંશતિસાહસ્રં વૈષ્ણવં પરમાદ્ભુતમ્ ।
ચતુર્વિંશતિસાહસ્રં વારાહં પરમાદ્ભુતમ્ ॥ ૮॥

ષોડશૈવ સહસ્રાણિ પુરાણં ચાગ્નિસંજ્ઞિતમ્ ।
પઞ્ચવિંશતિસાહસ્રં નારદં પરમં મતમ્ ॥ ૯॥

પઞ્ચપઞ્ચાશત્સાહસ્રં પદ્માખ્યં વિપુલં મતમ્ ।
એકાદશસહસ્રાણિ લિઙ્ગાખ્યં ચાતિવિસ્મૃતમ્ ॥ ૧૦॥

એકોનવિંશત્સાહસ્રં ગારુડં હરિભાષિતમ્ ।
સપ્તદશસહસ્રં ચ પુરાણં કૂર્મભાષિતમ્ ॥ ૧૧॥

એકાશીતિસહસ્રાણિ સ્કન્દાખ્યં પરમાદ્ભુતમ્ ।
પુરાણાખ્યા ચ સઙ્ખ્યા ચ વિસ્તરેણ મયાનઘાઃ ॥ ૧૨॥

તથૈવોપપુરાણાનિ શ‌ૃણ્વન્તુ ઋષિસત્તમાઃ ।
સનત્કુમારં પ્રથમં નારસિંહં તતઃ પરમ્ ॥ ૧૩॥

નારદીયં શિવં ચૈવ દૌર્વાસસમનુત્તમમ્ ।
કાપિલં માનવં ચૈવ તથા ચૌશનસં સ્મૃતમ્ ॥ ૧૪॥

વારુણં કાલિકાખ્યં ચ સામ્બં નન્દિકૃતં શુભમ્ ।

સૌરં પારાશરપ્રોક્તમાદિત્યં ચાતિવિસ્તરમ્ ॥ ૧૫॥

માહેશ્વરં ભાગવતં વાસિષ્ઠં ચ સવિસ્તરમ્ ।
એતાન્યુપપુરાણાનિ કથિતાનિ મહાત્મભિઃ ॥ ૧૬॥

અષ્ટાદશ પુરાણાનિ કૃત્વા સત્યવતીસુતઃ ।
ભારતાખ્યાનમતુલં ચક્રે તદુપબૃંહિતમ્ ॥ ૧૭॥

મન્વન્તરેષુ સર્વેષુ દ્વાપરે દ્વાપરે યુગે ।
પ્રાદુઃકરોતિ ધર્માર્થી પુરાણાનિ યથાવિધિ ॥ ૧૮॥

દ્વાપરે દ્વાપરે વિષ્ણુર્વ્યાસરૂપેણ સર્વદા ।
વેદમેકં સ બહુધા કુરુતે હિતકામ્યયા ॥ ૧૯॥

અલ્પાયુષોઽલ્પબુદ્ધીંશ્ચ વિપ્રાઞ્જ્ઞાત્વા કલાવથ ।
પુરાણસંહિતાં પુણ્યાં કુરુતેઽસૌ યુગે યુગે ॥ ૨૦॥

સ્ત્રીશૂદ્રદ્વિજબન્ધૂનાં ન વેદશ્રવણં મતમ્ ।
તેષામેવ હિતાર્થાય પુરાણાનિ કૃતાનિ ચ ॥ ૨૧॥

મન્વન્તરે સપ્તમેઽત્ર શુભે વૈવસ્વતાભિધે ।
અષ્ટાવિંશતિમે પ્રાપ્તે દ્વાપરે મુનિસત્તમાઃ ॥ ૨૨॥

વ્યાસઃ સત્યવતીસૂનુર્ગુરુર્મે ધર્મવિત્તમઃ ।
એકોનત્રિંશત્સમ્પ્રાપ્તે દ્રૌણિર્વ્યાસો ભવિષ્યતિ ॥ ૨૩॥

અતીતાસ્તુ તથા વ્યાસાઃ સપ્તવિંશતિરેવ ચ ।
પુરાણસંહિતાસ્તૈસ્તુ કથિતાસ્તુ યુગે યુગે ॥ ૨૪॥

ઋષય ઊચુઃ ।
બ્રૂહિ સૂત મહાભાગ વ્યાસાઃ પૂર્વયુગોદ્ભવાઃ ।
વક્તારસ્તુ પુરાણાનાં દ્વાપરે દ્વાપરે યુગે ॥ ૨૫॥

સૂત ઉવાચ ।
દ્વાપરે પ્રથમે વ્યસ્તાઃ સ્વયં વેદાઃ સ્વયમ્ભુવા ।
પ્રજાપતિર્દ્વિતીયે તુ દ્વાપરે વ્યાસકાર્યકૃત્ ॥ ૨૬॥

તૃતીયે ચોશના વ્યાસશ્ચતુર્થે તુ બૃહસ્પતિઃ ।
પઞ્ચમે સવિતા વ્યાસઃ ષષ્ઠે મૃત્યુસ્તથાપરે ॥ ૨૭॥

મઘવા સપ્તમે પ્રાપ્તે વસિષ્ઠસ્ત્વષ્ટમે સ્મૃતઃ ।

સારસ્વતસ્તુ નવમે ત્રિધામા દશમે તથા ॥ ૨૮॥

એકાદશેઽથ ત્રિવૃષો ભરદ્વાજસ્તતઃ પરમ્ ।
ત્રયોદશે ચાન્તરિક્ષો ધર્મશ્ચાપિ ચતુર્દશે ॥ ૨૯॥

ત્રય્યારુણિઃ પઞ્ચદશે ષોડશે તુ ધનઞ્જયઃ ।
મેધાતિથિઃ સપ્તદશે વ્રતી હ્યષ્ટાદશે તથા ॥ ૩૦॥

અત્રિરેકોનવિંશેઽથ ગૌતમસ્તુ તતઃ પરમ્ ।
ઉત્તમશ્ચૈકવિંશેઽથ હર્યાત્મા પરિકીર્તિતઃ ॥ ૩૧॥

વેનો વાજશ્રવાશ્ચૈવ સોમોઽમુષ્યાયણસ્તથા ।
તૃણબિન્દુસ્તથા વ્યાસો ભાર્ગવસ્તુ તતઃ પરમ્ ॥ ૩૨॥

તતઃ શક્તિર્જાતુકર્ણ્યઃ કૃષ્ણદ્વૈપાયનસ્તતઃ ।
અષ્ટાવિંશતિસઙ્ખ્યેયં કથિતા યા મયા શ્રુતા ॥ ૩૩॥

કૃષ્ણદ્વૈપાયનાત્પ્રોક્તં પુરાણં ચ મયા શ્રુતમ્ ।
શ્રીમદ્ભાગવતં પુણ્યં સર્વદુઃખૌઘનાશનમ્ ॥ ૩૪॥

કામદં મોક્ષદં ચૈવ વેદાર્થપરિબૃંહિતમ્ ।
સર્વાગમરસારામં મુમુક્ષૂણાં સદા પ્રિયમ્ ॥ ૩૫॥

વ્યાસેન કૃત્વાતિશુભં પુરાણં
શુકાય પુત્રાય મહાત્મને યત્ ।
વૈરાગ્યયુક્તાય ચ પાઠિતં વૈ
વિજ્ઞાય ચૈવારણિસમ્ભવાય ॥ ૩૬॥

શ્રુતં મયા તત્ર તથા ગૃહીતં
યથાર્થવદ્વ્યાસમુખાન્મુનીન્દ્રાઃ ।
પુરાણગુહ્યં સકલં સમેતં
ગુરોઃ પ્રસાદાત્કરુણાનિધેશ્ચ ॥ ૩૭॥

સૂતેન પૃષ્ટઃ સકલં જગાદ
દ્વૈપાયનસ્તત્ર પુરાણગુહ્યમ્ ।
અયોનિજેનાદ્ભુતબુદ્ધિના વૈ
શ્રુતં મયા તત્ર મહાપ્રભાવમ્ ॥ ૩૮॥

શ્રીમદ્ભાગવતામરાઙ્ઘ્રિપફલાસ્વાદાદરઃ સત્તમાઃ

સંસારાર્ણવદુર્વિગાહ્યસલિલં સન્તર્તુકામઃ શુકઃ ।
નાનાખ્યાનરસાલયં શ્રુતિપુટૈઃ પ્રેમ્ણાશ‍ૃણોદદ્ભુતં
તચ્છ્રુત્વા ન વિમુચ્યતે કલિભયાદેવંવિધઃ કઃ ક્ષિતૌ ॥ ૩૯॥

પાપીયાનપિ વેદધર્મરહિતઃ સ્વાચારહીનાશયો ॥

વ્યાજેનાપિ શ‍ૃણોતિ યઃ પરમિદં શ્રીમત્પુરાણોત્તમમ્ ।
ભુક્ત્યા ભોગકલાપમત્ર વિપુલં દેહાવસાનેઽચલં
યોગિપ્રાપ્યમવાપ્નુયાદ્ભગવતીનામાઙ્કિતં સુન્દરમ્ ॥ ૪૦॥

યા નિર્ગુણા હરિહરાદિભિરપ્યલભ્યા
વિદ્યા સતાં પ્રિયતમાથ સમાધિગમ્યા ।
સા તસ્ય ચિત્તકુહરે પ્રકરોતિ ભાવં
યઃ સંશ‍ૃણોતિ સતતં તુ સતીપુરાણમ્ ॥ ૪૧॥

સમ્પ્રાપ્ય માનુષભવં સકલાઙ્ગયુક્તં
પોતં ભવાર્ણવજલોત્તરણાય કામમ્ ।
સમ્પ્રાપ્ય વાચકમહો ન શ‍ૃણોતિ મૂઢઃ
સ વઞ્ચિતોઽત્ર વિધિના સુખદં પુરાણમ્ ॥ ૪૨॥

યઃ પ્રાપ્ય કર્ણયુગલં પટુમાનુષત્વે
રાગી શ‍ૃણોતિ સતતં ચ પરાપવાદાન્ ।
સર્વાર્થદં રસનિધિં વિમલં પુરાણં
નષ્ટઃ કુતો ન શ‍ૃણુતે ભુવિ મન્દબુદ્ધિઃ ॥ ૪૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે પુરાણવર્ણનપૂર્વકતત્તદ્યુગીયવ્યાસવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૧.૩॥

## ૧.૪ ચતુર્થોઽધ્યાયઃ । દેવીસર્વોત્તમેતિકથનમ્ ।

ઋષય ઊચુઃ ।
સૌમ્ય વ્યાસસ્ય ભાર્યાયાં કસ્યાં જાતઃ સુતઃ શુકઃ ।
કથં વા કીદૃશો યેન પઠિતેયં સુસંહિતા ॥ ૧॥

અયોનિજસ્ત્વયા પ્રોક્તસ્તથા ચારણિજઃ શુકઃ ।
સન્દેહોઽસ્તિ મહાંસ્તત્ર કથયાદ્ય મહામતે ॥ ૨॥

ગર્ભયોગી શ્રુતઃ પૂર્વં શુકો નામ મહાતપાઃ ।
કથં ચ પઠિતં તેન પુરાણં બહુવિસ્તરમ્ ॥ ૩॥

સૂત ઉવાચ ।
પુરા સરસ્વતીતીરે વ્યાસઃ સત્યવતીસુતઃ ।
આશ્રમે કલવિઙ્કૌ તુ દૃષ્ટ્વા વિસ્મયમાગતઃ ॥ ૪॥

જાતમાત્રં શિશું નીડે મુક્તમણ્ડાન્મનોહરમ્ ।
તામ્રાસ્યં શુભસર્વાઙ્ગં પિચ્છાઙ્કુરવિવર્જિતમ્ ॥ ૫॥

તૌ તુ ભક્ષ્યાર્થમત્યન્તં રતૌ શ્રમપરાયણૌ ।
શિશોશ્ચઞ્ચુપુટે ભક્ષ્યં ક્ષિપન્તૌ ચ પુનઃ પુનઃ ॥ ૬॥

અઙ્ગેનાઙ્ગાનિ બાલસ્ય ઘર્ષયન્તૌ મુદાન્વિતૌ ।
ચુમ્બન્તૌ ચ મુખં પ્રેમ્ણા કલવિઙ્કૌ શિશોઃ શુભમ્ ॥ ૭॥

વીક્ષ્ય પ્રેમાદ્ભુતં તત્ર બાલે ચટકયોસ્તદા ।
વ્યાસશ્ચિન્તાતુરઃ કામં મનસા સમચિન્તયત્ ॥ ૮॥

તિરશ્ચામપિ યત્પ્રેમ પુત્રે સમભિલક્ષ્યતે ।
કિં ચિત્રં યન્મનુષ્યાણાં સેવાફલમભીપ્સતામ્ ॥ ૯॥

કિમેતૌ ચટકૌ ચાસ્ય વિવાહં સુખસાધનમ્ ।
વિરચ્ય સુખિનૌ સ્યાતાં દૃષ્ટ્વા વધ્વા મુખં શુભમ્ ॥ ૧૦॥

અથવા વાર્ધકે પ્રાપ્તે પરિચર્યાં કરિષ્યતિ ।
પુત્રઃ પરમધર્મિષ્ઠઃ પુણ્યાર્થં કલવિઙ્કયોઃ ॥ ૧૧॥

અર્જયિત્વાથવા દ્રવ્યં પિતરૌ તર્પયિષ્યતિ ।
અથવા પ્રેતકાર્યાણિ કરિષ્યતિ યથાવિધિ ॥ ૧૨॥

અથવા કિં ગયાશ્રાદ્ધં ગત્વા સંવિતરિષ્યતિ ।
નીલોત્સર્ગં ચ વિધિવત્પ્રકરિષ્યતિ બાલકઃ ॥ ૧૩॥

સંસારેઽત્ર સમાખ્યાતં સુખાનામુત્તમં સુખમ્ ।
પુત્રગાત્રપરિષ્વઙ્ગો લાલનઞ્ચ વિશેષતઃ ॥ ૧૪॥

અપુત્રસ્ય ગતિર્નાસ્તિ સ્વર્ગો નૈવ ચ નૈવ ચ ।
પુત્રાદન્યતરન્નાસ્તિ પરલોકસ્ય સાધનમ્ ॥ ૧૫॥

મન્વાદિભિશ્ચ મુનિભિર્ધર્મશાસ્ત્રેષુ ભાષિતમ્ ।

પુત્રવાન્સ્વર્ગમાપ્નોતિ નાપુત્રસ્તુ કથઞ્ચન ॥ ૧૬॥

દૃશ્યતેઽત્ર સમક્ષં તન્નાનુમાનેન સાધ્યતે ।
પુત્રવાન્મુચ્યતે પાપાદાપ્તવાક્યં ચ શાશ્વતમ્ ॥ ૧૭॥

આતુરે મૃત્યુકાલેઽપિ ભૂમિશય્યાગતો નરઃ ।
કરોતિ મનસા ચિન્તાં દુઃખિતઃ પુત્રવર્જિતઃ ॥ ૧૮॥

ધનં મે વિપુલં ગેહે પાત્રાણિ વિવિધાનિ ચ ।
મન્દિરં સુન્દરં ચૈતત્કોઽસ્ય સ્વામી ભવિષ્યતિ ॥ ૧૯॥

મૃત્યુકાલે મનસ્તસ્ય દુઃખેન ભ્રમતે યતઃ ।
અતોઽસ્ય દુર્ગતિર્નૂનં ભ્રાન્તચિત્તસ્ય સર્વથા ॥ ૨૦॥

એવં બહુવિધાં ચિન્તાં કૃત્વા સત્યવતીસુતઃ ।
નિઃશ્વસ્ય બહુધા ચોષ્ણં વિમનાઃ સમ્બભૂવ હ ॥ ૨૧॥

વિચાર્ય મનસાત્યર્થં કૃત્વા મનસિ નિશ્ચયમ્ ।
જગામ ચ તપસ્તમું મેરુપર્વતસનિધૌ ॥ ૨૨॥

મનસા ચિન્તયામાસ કં દેવં સમુપાસ્મહે ।
વરપ્રદાનનિપુણં વાઞ્છિતાર્થપ્રદં તથા ॥ ૨૩॥

વિષ્ણું રુદ્રં સુરેન્દ્રં વા બ્રહ્માણં વા દિવાકરમ્ ।
ગણેશં કાર્તિકેયં ચ પાવકં વરુણં તથા ॥ ૨૪॥

એવં ચિન્તયતસ્તસ્ય નારદો મુનિસત્તમઃ ।
યદૃચ્છયા સમાયાતો વીણાપાણિઃ સમાહિતઃ ॥ ૨૫॥

તં દૃષ્ટ્વા પરમપ્રીતો વ્યાસઃ સત્યવતીસુતઃ ।
કૃત્વાર્ઘ્યમાસનં દત્ત્વા પપ્રચ્છ કુશલં મુનિમ્ ॥ ૨૬॥

શ્રુત્વાથ કુશલપ્રશ્નં પપ્રચ્છ મુનિસત્તમઃ ।
ચિન્તાતુરોઽસિ કસ્માત્ત્વં દ્વૈપાયન વદસ્વ મે ॥ ૨૭॥

વ્યાસ ઉવાચ ।
અપુત્રસ્ય ગતિર્નાસ્તિ ન સુખં માનસે યતઃ ।
તદર્થં દુઃખિતશ્ચાહં ચિન્તયામિ પુન પુનઃ ॥ ૨૮॥

તપસા તોષયામ્યદ્ય કં દેવં વાઞ્છિતાર્થદમ્ ।
ઇતિ ચિન્તાતુરોઽસ્મ્યદ્ય ત્વામહં શરણં ગતઃ ॥ ૨૯॥

સર્વજ્ઞોઽસિ મહર્ષે ત્વં કથયાશુ કૃપાનિધે ।
કં દેવં શરણં યામિ યો મે પુત્રં પ્રદાસ્યતિ ॥ ૩૦॥

સૂત ઉવાચ ।
ઇતિ વ્યાસેન પૃષ્ટસ્તુ નારદો વેદવિન્મુનિઃ ।
ઉવાચ પરયા પ્રીત્યા કૃષ્ણં પ્રતિ મહામનાઃ ॥ ૩૧॥

નારદ ઉવાચ ।
પારાશર્ય મહાભાગ યત્ત્વં પૃચ્છસિ મામિહ ।
તમેવાર્થં પુરા પૃષ્ટઃ પિત્રા મે મધુસૂદનઃ ॥ ૩૨॥

ધ્યાનસ્થં ચ હરિં દૃષ્ટ્વા પિતા મે વિસ્મયં ગતઃ ।
પર્યપૃચ્છત દેવેશં શ્રીનાથં જગતઃ પતિમ્ ॥ ૩૩॥

કૌસ્તુભોદ્ભાસિતં દિવ્યં શઙ્ખચક્રગદાધરમ્ ।
પીતામ્બરં ચતુર્બાહું શ્રીવત્સાઙ્કિતવક્ષસમ્ ॥ ૩૪॥

કારણં સર્વલોકાનાં દેવદેવં જગદ્ગુરુમ્ ।
વાસુદેવં જગન્નાથં તપ્યમાનં મહત્તપઃ ॥ ૩૫॥

બ્રહ્મોવાચ ।
દેવદેવ જગન્નાથ ભૂતભવ્યભવત્પ્રભો ।
તપશ્ચરસિ કસ્માત્ત્વં કિં ધ્યાયસિ જનાર્દન ॥ ૩૬॥

વિસ્મયોઽયં મમાત્યર્થં ત્વં સર્વજગતાં પ્રભુઃ ।
ધ્યાનયુક્તોઽસિ દેવેશ કિં ચ ચિત્રમતઃ પરમ્ ॥ ૩૭॥

ત્વન્નાભિકમલાજ્જાતઃ કર્તાહમખિલસ્ય હ ।
ત્વત્તઃ કોઽપ્યધિકોઽસ્ત્યત્ર તં દેવં બ્રૂહિ માપતે ॥ ૩૮॥

જાનામ્યહં જગન્નાથ ત્વમાદિઃ સર્વકારણમ્ ।
કર્તા પાલયિતા હર્તા સમર્થઃ સર્વકાર્યકૃત્ ॥ ૩૯॥

ઇચ્છયા તે મહારાજ સૃજામ્યહમિદં જગત્ ।
હરઃ સંહરતે કાલે સોઽપિ તે વચને સદા ॥ ૪૦॥

સૂર્યો ભ્રમતિ ચાકાશે વાયુર્વાતિ શુભાશુભઃ ।
અગ્નિસ્તપતિ પર્જન્યો વર્ષતીશ ત્વદાજ્ઞયા ॥ ૪૧॥

ત્વં તુ ધ્યાયસિ કં દેવં સંશયોઽયં મહાન્મમ ।
ત્વત્તઃ પરં ન પશ્યામિ દેવં વૈ ભુવનત્રયે ॥ ૪૨॥

કૃપાં કૃત્વા વદસ્વાદ્ય ભક્તોઽસ્મિ તવ સુવ્રત ।
મહતાં નૈવ ગોપ્યં હિ પ્રાયઃ કિઞ્ચિદિતિ સ્મૃતિઃ ॥ ૪૩॥

તચ્છ્રુત્વા વચનં તસ્ય હરિરાહ પ્રજાપતિમ્ ।
શ‍ૃણુષ્વૈકમના બ્રહ્મંસ્ત્વાં બ્રવીમિ મનોગતમ્ ॥ ૪૪॥

યદ્યપિ ત્વાં શિવં માં ચ સ્થિતિસૃષ્ટ્યન્તકારણમ્ ।
તે જાનન્તિ જનાઃ સર્વે સદેવાસુરમાનુષાઃ ॥ ૪૫॥

સ્રષ્ટા ત્વં પાલકશ્ચાહં હરઃ સંહારકારકઃ ।
કૃતાઃ શક્ત્યેતિ સન્તર્કઃ ક્રિયતે વેદપારગૈઃ ॥ ૪૬॥

જગત્સઞ્જનને શક્તિસ્ત્વયિ તિષ્ઠતિ રાજસી ।
સાત્ત્વિકી મયિ રુદ્રે ચ તામસી પરિકીર્તિતા ॥ ૪૭॥

તયા વિરહિતસ્ત્વં ન તત્કર્મકરણે પ્રભુઃ ।
નાહં પાલયિતું શક્તઃ સંહર્તું નાપિ શઙ્કરઃ ॥ ૪૮॥

તદધીના વયં સર્વે વર્તામઃ સતતં વિભો ।
પ્રત્યક્ષે ચ પરોક્ષે ચ દૃષ્ટાન્તં શ‍ૃણુ સુવ્રત ॥ ૪૯॥

શેષે સ્વપિમિ પર્યઙ્કે પરતન્ત્રો ન સંશયઃ ।
તદધીનઃ સદોત્તિષ્ઠે કાલે કાલવશં ગતઃ ॥ ૫૦॥

તપશ્ચરામિ સતતં તદધીનોઽસ્મ્યહં સદા ।
કદાચિત્સહ લક્ષ્મ્યા ચ વિહરામિ યથાસુખમ્ ॥ ૫૧॥

કદાચિદ્દાનવૈઃ સાર્ધં સઙ્ગ્રામં પ્રકરોમ્યહમ્ ।
દારુણં દેહદમનં સર્વલોકભયઙ્કરમ્ ॥ ૫૨॥

પ્રત્યક્ષં તવ ધર્મજ્ઞ તસ્મિન્નેકાર્ણવે પુરા ।
પઞ્ચવર્ષસહસ્રાણિ બાહુયુદ્ધં મયા કૃતમ્ ॥ ૫૩॥

તૌ કર્ણમલજૌ દુષ્ટૌ દાનવૌ મદગર્વિતૌ ।
દેવ દેવ્યાઃ પ્રસાદેન નિહતૌ મધુકૈટભૌ ॥ ૫૪॥

તદા ત્વયા ન કિં જ્ઞાતં કારણં તુ પરાત્પરમ્ ।
શક્તિરૂપં મહાભાગ કિં પૃચ્છસિ પુનઃ પુનઃ ॥ ૫૫॥

યદિચ્છઃ પુરુષો ભૂત્વા વિચરામિ મહાર્ણવે ।
કચ્છપઃ કોલસિંહશ્ચ વામનશ્ચ યુગે યુગે ॥ ૫૬॥

ન કસ્યાપિ પ્રિયો લોકે તિર્યગ્યોનિષુ સમ્ભવઃ ।
નાભવં સ્વેચ્છયા વામવરાહાદિષુ યોનિષુ ॥ ૫૭॥

વિહાય લક્ષ્યા સહ સંવિહારં
કો યાતિ મત્સ્યાદિષુ હીનયોનિષુ ।
શય્યાં ચ મુક્ત્વા ગરુડાસનસ્થઃ
કરોમિ યુદ્ધં વિપુલં સ્વતન્ત્રઃ ॥ ૫૮॥

પુરા પુરસ્તેઽજ શિરો મદીયં
ગતં ધનુર્જ્યાસ્ખલનાત્ક્વ ચાપિ ।
ત્વયા તદા વાજિશિરો ગૃહીત્વા
સંયોજિતં શિલ્પિવરેણ ભૂયઃ ॥ ૫૯॥

હયાનનોઽહં પરિકીર્તિતશ્ચ
પ્રત્યક્ષમેતત્તવ લોકકર્તઃ ।
વિડમ્બનેયં કિલ લોકમધ્યે
કથં ભવેદાત્મપરો યદિ સ્યામ્ ॥ ૬૦॥

તસ્માન્નાહં સ્વતન્ત્રોઽસ્મિ શક્ત્યધીનોઽસ્મિ સર્વથા ।
તામેવ શક્તિં સતતં ધ્યાયામિ ચ નિરન્તરમ્ ॥ ૬૧॥

નાતઃ પરતરં કિઞ્ચિજ્જાનામિ કમલોદ્ભવ ।
નારદ ઉવાચ ।
ઇત્યુક્તં વિષ્ણુના તેન પદ્મયોનેસ્તુ સન્નિધૌ ॥ ૬૨॥

તેન ચાપ્યહમુક્તોઽસ્મિ તથૈવ મુનિપુઙ્ગવ ।
તસ્માત્ત્વમપિ કલ્યાણ પુરુષાર્થાપ્તિહેતવે ॥ ૬૩॥

અસંશયં હૃદમ્ભોજે ભજ દેવીપદામ્બુજમ્ ।
સર્વં દાસ્યતિ સા દેવી યદ્યદિષ્ટં ભવેત્તવ ॥ ૬૪॥

સૂત ઉવાચ ।
નારદેનૈવમુક્તસ્તુ વ્યાસઃ સત્યવતીસુતઃ ।
દેવીપાદાબ્જનિષ્ણાતસ્તપસે પ્રયયૌ ગિરૌ ॥ ૬૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે દેવીસર્વોત્તમેતિકથનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૧.૪॥

## ૧.૫ પઞ્ચમોઽધ્યાયઃ । હયગ્રીવાવતારકથનમ્ ।

ઋષય ઊચુઃ ।
સૂતાસ્માકં મનઃ કામં મગ્નં સંશયસાગરે ।
યથોક્તં મહદાશ્ચર્યં જગદ્વિસ્મયકારકમ્ ॥ ૧॥

યન્મૂર્ધા માધવસ્યાપિ ગતો દેહાત્પુનઃ પરમ્ ।
હયગ્રીવસ્તતો જાતઃ સર્વકર્તા જનાર્દનઃ ॥ ૨॥

વેદોઽપિ સ્તૌતિ યં દેવં દેવાઃ સર્વે યદાશ્રયાઃ ।
આદિદેવો જગન્નાથઃ સર્વકારણકારણઃ ॥ ૩॥

તસ્યાપિ વદનં છિન્નં દૈવયોગાત્કથં તદા ।
તત્સર્વં કથયાશુ ત્વં વિસ્તરેણ મહામતે ॥ ૪॥

સૂત ઉવાચ ।
શ‍ૃણ્વન્તુ મુનયઃ સર્વે સાવધાનાઃ સમન્તતઃ ।
ચરિતં દેવદેવસ્ય વિષ્ણોઃ પરમતેજસઃ ॥ ૫॥

કદાચિદ્દારુણં યુદ્ધં કૃત્વા દેવઃ સનાતનઃ ।
દશવર્ષસહસ્રાણિ પરિશ્રાન્તો જનાર્દનઃ ॥ ૬॥

સમે દેશે શુભે સ્થાને કૃત્વા પદ્માસનં વિભુઃ ।
અવલમ્બ્ય ધનુઃ સજ્યં કણ્ઠદેશે ધરાસ્થિતમ્ ॥ ૭॥

દત્ત્વા ભારં ધનુષ્કોટ્યાં નિદ્રામાપ રમાપતિઃ ।
શ્રાન્તત્વાદ્દૈવયોગાચ્ચ જાતસ્તત્રાતિનિદ્રિતઃ ॥ ૮॥

તદા કાલેન કિયતા દેવાઃ સર્વે સવાસવાઃ ।
બ્રહ્મેશસહિતાઃ સર્વે યજ્ઞં કર્તું સમુદ્યતાઃ ॥ ૯॥

ગતાઃ સર્વેઽથ વૈકુણ્ઠં દ્રષ્ટું દેવં જનાર્દનમ્ ।
દેવકાર્યાર્થસિદ્ધ્યર્થં મખાનામધિપં પ્રભુમ્ ॥ ૧૦॥

અદૃષ્ટ્વા તં તદા તત્ર જ્ઞાનદૃષ્ટ્યા વિલોક્ય તે ।
યત્રાસ્તે ભગવાન્ વિષ્ણુર્જગ્મુસ્તત્ર તદા સુરાઃ ॥ ૧૧॥

દદૃશુસ્તે તદેશાનં યોગનિદ્રાવશં ગતમ્ ।
વિચેતનં વિભું વિષ્ણું તત્રાસાઞ્ચક્રિરે સુરાઃ ॥ ૧૨॥

સ્થિતેષુ સર્વદેવેષુ નિદ્રાસુપ્તે જગત્પતૌ ।
ચિન્તામાપુઃ સુરાઃ સર્વે બ્રહ્મરુદ્રપુરોગમાઃ ॥ ૧૩॥

તાનુવાચ તતઃ શક્રઃ કિં કર્તવ્યં સુરોત્તમાઃ ।
નિદ્રાભઙ્ગઃ કથં કાર્યશ્ચિન્તયન્તુ સુરોત્તમાઃ ॥ ૧૪॥

તમુવાચ તદા શમ્ભુર્નિદ્રાભઙ્ગેઽસ્તિ દૂષણમ્ ।
કાર્યં ચૈવ પ્રકર્તવ્યં યજ્ઞસ્ય સુરસત્તમાઃ ॥ ૧૫॥

ઉત્પાદિતા તદા વમ્રી બ્રહ્મણા પરમેષ્ઠિના ।
તયા ભક્ષયિતું તત્ર ધનુષોઽગ્રં ધરાસ્થિતમ્ ॥ ૧૬॥

ભક્ષિતેઽગ્રે તદા નિમ્નં ગમિષ્યતિ શરાસનમ્ ।
તદા નિદ્રાવિમુક્તોઽસૌ દેવદેવો ભવિષ્યતિ ॥ ૧૭॥

દેવકાર્યં તદા સર્વં ભવિષ્યતિ ન સંશયઃ ।
સ વમ્રીં સન્દિદેશાથ દેવદેવઃ સનાતનઃ ॥ ૧૮॥

તમુવાચ તદા વમ્રી દેવદેવસ્ય માપતેઃ ।
નિદ્રાભઙ્ગઃ કથં કાર્યો દેવસ્ય જગતાં ગુરોઃ ॥ ૧૯॥

નિદ્રાભઙ્ગઃ કથાચ્છેદો દમ્પત્યોઃ પ્રીતિભેદનમ્ ।
શિશુમાતૃવિભેદશ્ચ બ્રહ્મહત્યાસમં સ્મૃતમ્ ॥ ૨૦॥

તત્કથં દેવદેવસ્ય કરોમિ સુખનાશનમ્ ।
કિં ફલં ભક્ષણાદ્દેવ યેન પાપં કરોમ્યહમ્ ॥ ૨૧॥

સર્વઃ સ્વાર્થવશો લોકઃ કુરુતે પાતકં કિલ ।
તસ્માદહં કરિષ્યામિ સ્વાર્થમેવ પ્રભક્ષણમ્ ॥ ૨૨॥

બ્રહ્મોવાચ ।
તવ ભાગં કરિષ્યામો મખમધ્યે યથા શ‍ૃણુ ।
તેન ત્વં કુરુ કાર્યં નો વિષ્ણું બોધય માચિરમ્ ॥ ૨૩॥

હોમકર્મણિ પાર્શ્વે ચ હવિર્દાનાત્પતિષ્યતિ ।
તત્તે ભાગં વિજાનીહિ કુરુ કાર્યં ત્વરાન્વિતા ॥ ૨૪॥

સૂત ઉવાચ ।

ઇત્યુક્ત્વા બ્રહ્મણા વમ્રી ધનુષોઽગ્રં ત્વરાન્વિતા ।
ચખાદ સંસ્થિતં ભૂમૌ વિમુક્ત્વા જ્યા તદાભવત્ ॥ ૨૫॥

પ્રત્યઞ્જાયાં વિમુક્તાયાં મુક્ત્વા કોટિસ્તથોત્તરા ।
શબ્દઃ સમભવદ્ઘોરસ્તેન ત્રસ્તાઃ સુરાસ્તદા ॥ ૨૬॥

બ્રહ્માણ્ડં ક્ષુભિતં સર્વં વસુધા કમ્પિતા તદા ।
સમુદ્રાશ્ચ સમુદ્વિગ્નાસ્ત્રેસુશ્ચ જલજન્તવઃ ॥ ૨૭॥

વવુર્વાતાસ્તથા ચોગ્રાઃ પર્વતાશ્ચ ચકમ્પિરે ।
ઉલ્કાપાતા મહોત્પાતા બભૂવુર્દુઃખશંસિનઃ ॥ ૨૮॥

દિશો ઘોરતરાશ્ચાસન્સૂર્યોઽપ્યસ્તઙ્ગતોઽભવત્ ।
ચિન્તામાપુઃ સુરાઃ સર્વે કિં ભવિષ્યતિ દુર્દિને ॥ ૨૯॥

એવં ચિન્તયતાં તેષાં મૂર્ધા વિષ્ણોઃ સકુણ્ડલઃ ।
ગતઃ સમુકુટઃ ક્વાપિ દેવદેવસ્ય તાપસાઃ ॥ ૩૦॥

અન્ધકારે તદા ઘોરે શાન્તે બ્રહ્મહરૌ તદા ।
શિરોહીનં શરીરં તુ દદૃશાતે વિલક્ષણમ્ ॥ ૩૧॥

દૃષ્ટ્વા કબન્ધં વિષ્ણોસ્તે વિસ્મિતાઃ સુરસત્તમાઃ ।
ચિન્તાસાગરમગ્નાશ્ચ રુરુદુઃ શોકકર્શિતાઃ ॥ ૩૨॥

હા નાથ કિં પ્રભો જાતમત્યદ્ભુતમમાનુષમ્ ।
વૈશસં સર્વદેવાનાં દેવદેવ સનાતન ॥ ૩૩॥

માયેયં કસ્ય દેવસ્ય યયા તેઽદ્ય શિરો હૃતમ્ ।
અચ્છેદ્યસ્ત્વમભેદ્યોઽસિ અપ્રદાહ્યોઽસિ સર્વદા ॥ ૩૪॥

એવં ગતે ત્વયિ વિભો મરિષ્યન્તિ ચ દેવતાઃ ।
કીદૃશસ્ત્વયિ નઃ સ્નેહઃ સ્વાર્થેનૈવ રુદામહે ॥ ૩૫॥

નાયં વિઘ્નઃ કૃતો દૈત્યૈર્ન યક્ષૈર્ન ચ રાક્ષસૈઃ ।
દેવૈરેવ કૃતઃ કસ્ય દૂષણં ચ રમાપતે ॥ ૩૬॥

પરાધીનાઃ સુરાઃ સર્વે કિં કુર્મઃ ક્વ વ્રજામ ચ ।
શરણં નૈવ દેવેશ સુરાણાં મૂઢચેતસામ્ ॥ ૩૭॥

ન ચૈષા સાત્ત્વિકી માયા રાજસી ન ચ તામસી ।
યયા છિન્નં શિરસ્તેઽદ્ય માયેશસ્ય જગદ્ગુરોઃ ॥ ૩૮॥

ક્રન્દમાનાંસ્તદા દૃષ્ટ્વા દેવાઞ્છિવપુરોગમાન્ ।
બૃહસ્પતિસ્તદોવાચ શમયન્વેદવિત્તમઃ ॥ ૩૯॥

રુદિતેન મહાભાગાઃ ક્રન્દિતેન તથાપિ કિમ્ ।
ઉપાયશ્ચાત્ર કર્તવ્યઃ સર્વથા બુદ્ધિગોચરઃ ॥ ૪૦॥

દૈવં પુરુષકારશ્ચ દેવેશ સદૃશાવુભૌ ।
ઉપાયશ્ચ વિધાતવ્યો દૈવાત્ફલતિ સર્વથા ॥ ૪૧॥

ઇન્દ્ર ઉવાચ ।
દૈવમેવ પરં મન્યે ધિક્પૌરુષમનર્થકમ્ ।
વિષ્ણોરપિ શિરશ્છિન્નં સુરાણાં ચૈવ પશ્યતામ્ ॥ ૪૨॥

બ્રહ્મોવાચ ।
અવશ્યમેવ ભોક્તવ્યં કાલેનાપાદિતં ચ યત્ ।
શુભં વાપ્યશુભં વાપિ દૈવં કોઽતિક્રમેત્પુનઃ ॥ ૪૩॥

દેહવાન્સુખદુઃખાનાં ભોક્તા નૈવાત્ર સંશયઃ ।
યથા કાલવશાત્કૃત્તં શિરો મે શમ્ભુના પુરા ॥ ૪૪॥

તથૈવ લિઙ્ગપાતશ્ચ મહાદેવસ્ય શાપતઃ ।
તથૈવાદ્ય હરેર્મૂર્ધા પતિતો લવણામ્ભસિ ॥ ૪૫॥

સહસ્રભગસમ્પ્રાપ્તિર્દુઃખં ચૈવ શચીપતેઃ ।
સ્વર્ગાદ્ભ્રંશસ્તથા વાસઃ કમલે માનસે સરે ॥ ૪૬॥

એતે દુઃખસ્ય ભોક્તારઃ કેન દુઃખં ન ભુજ્યતે ।
સંસારેઽસ્મિન્મહાભાગાસ્તસ્માચ્છોકં ત્યજન્તુ વૈ ॥ ૪૭॥

ચિન્તયન્તુ મહામાયાં વિદ્યાદેવીં સનાતનીમ્ ।
સા વિધાસ્યતિ નઃ કાર્યં નિર્ગુણા પ્રકૃતિઃ પરા ॥ ૪૮॥

બ્રહ્મવિદ્યાં જગદ્ધાત્રીં સર્વેષાં જનનીં તથા ।
યયા સર્વમિદં વ્યાપ્તં ત્રૈલોક્યં સચરાચરમ્ ॥ ૪૯॥

સૂત ઉવાચ ।
ઇત્યુક્ત્વા વૈ સુરાન્વેધા નિગમાનાદિદેશ હ ।
દેહયુક્તાન્સ્થિતાનગ્રે સુરકાર્યાર્થસિદ્ધયે ॥ ૫૦॥

બ્રહ્મોવાચ ।
સ્તુવન્તુ પરમાં દેવીં બ્રહ્મવિદ્યાં સનાતનીમ્ ।
ગૂઢાઙ્ગીં ચ મહામાયાં સર્વકાર્યાર્થસાધનીમ્ ॥ ૫૧॥

તચ્છ્રુત્વા વચનં તસ્ય વેદાઃ સર્વાઙ્ગસુન્દરાઃ ।
તુષ્ટુવુર્જ્ઞાનગમ્યાં તાં મહામાયાં જગત્સ્થિતામ્ ॥ ૫૨॥

વેદા ઊચુઃ ।
નમો દેવિ મહામાયે વિશ્વોત્પત્તિકરે શિવે ।
નિર્ગુણે સર્વભૂતેશિ માતઃ શઙ્કરકામદે ॥ ૫૩॥

ત્વં ભૂમિઃ સર્વભૂતાનાં પ્રાણાઃ પ્રાણવતાં તથા ।
ધીઃ શ્રીઃ કાન્તિઃ ક્ષમા શાન્તિઃ શ્રદ્ધા મેધા ધૃતિઃ સ્મૃતિઃ ॥ ૫૪॥

ત્વમુદ્ગીથેઽર્ધમાત્રાસિ ગાયત્રી વ્યાહૃતિસ્તથા ।
જયા ચ વિજયા ધાત્રી લજ્જા કીર્તિઃ સ્પૃહા દયા ॥ ૫૫॥

ત્વાં સંસ્તુમોઽમ્બ ભુવનત્રયસંવિધાન-
દક્ષાં દયારસયુતાં જનનીં જનાનામ્ ।
વિદ્યાં શિવાં સકલલોકહિતાં વરેણ્યાં
વાગ્બીજવાસનિપુણાં ભવનાશકર્ત્રીમ્ ॥ ૫૬॥

બ્રહ્મા હરઃ શૌરિસહસ્રનેત્ર-
વાગ્વહ્નિસૂર્યા ભુવનાધિનાથાઃ ।
તે ત્વત્કૃતાઃ સન્તિ તતો ન મુખ્યા
માતા યતસ્ત્વં સ્થિરજઙ્ગમાનામ્ ॥ ૫૭॥

સકલભુવનમેતત્કર્તુકામા યદા ત્વં
સૃજસિ જનનિ દેવાન્વિષ્ણુરુદ્રાજમુખ્યાન્ ।
સ્થિતિલયજનનં તૈઃ કારયસ્યેકરૂપા
ન ખલુ તવ કથઞ્ચિદ્દેવિ સંસારલેશઃ ॥ ૫૮॥

ન તે રૂપં વેત્તું સકલભુવને કોઽપિ નિપુણો
ન નામ્નાં સઙ્ખ્યાં તે કથિતુમિહ યોગ્યોઽસ્તિ પુરુષઃ ।
યદલ્પં કીલાલં કલયિતુમશક્તઃ સ તુ નરઃ
કથં પારાવારાકલનચતુરઃ સ્યાદૃતમતિઃ ॥ ૫૯॥

ન દેવાનાં મધ્યે ભગવતિ તવાનન્તવિભવં

વિજાનાત્યેકોઽપિ ત્વમિહ ભુવનૈકાસિ જનની ।
કથં મિથ્યા વિશ્વં સકલમપિ ચૈકા રચયસિ
પ્રમાણં ત્વેતસ્મિન્નિગમવચનં દેવિ વિહિતમ્ ॥ ૬૦॥

નિરીહૈવાસિ ત્વં નિખિલજગતાં કારણમહો
ચરિત્રં તે ચિત્રં ભગવતિ મનો નો વ્યથયતિ ।
કથઙ્કારં વાચ્યઃ સકલનિગમાગોચરગુણ-
પ્રભાવઃ સ્વં યસ્માત્સ્વયમપિ ન જાનાસિ પરમમ્ ॥ ૬૧॥

ન કિં જાનાસિ ત્વં જનનિ મધુજિન્મૌલિપતનમ્ ॥

શિવે કિં વા જ્ઞાત્વા વિવિદિષસિ શક્તિં મધુજિતઃ ।
હરેઃ કિં વા માતર્દુરિતતતિરેષા બલવતી ॥

ભવત્યાઃ પાદાબ્જે ભજનનિપુણે ક્વાસ્તિ દુરિતમ્ ॥ ૬૨॥

ઉપેક્ષા કિં ચેયં તવ સુરસમૂહેઽતિવિષમા ॥

હરેર્મૂર્ધ્નો નાશો મતમિહ મહાશ્ચર્યજનકમ્ ।
મહદ્દુઃખં માતસ્ત્વમસિ જનનચ્છેદકુશલા ॥

ન જાનીમો મૌલેર્વિઘટનવિલમ્બઃ કથમભૂત્ ॥ ૬૩॥

જ્ઞાત્વા દોષં સકલસુરતાપાદિતં દેવિ ચિત્તે
કિં વા વિષ્ણાવમરજનિતં દુષ્કૃતં પાતિતં તે ।
વિષ્ણોર્વા કિં સમરજનિતઃ કોઽપિ ગર્વોઽતિવેગા-
ચ્છેત્તું માતસ્તવ વિલસિતં નૈવ વિદ્મોઽત્ર ભાવમ્ ॥ ૬૪॥

કિં વા દૈત્યૈઃ સમરવિજિતૈસ્તીર્થદેશે સુરમ્યે
ઘોરં તપ્ત્વા ભગવતિ વરં લબ્ધવદ્ભિર્ભવત્યાઃ ।
અન્તર્ધાનં ગમિતમધુના વિષ્ણુશીર્ષં ભવાનિ
દ્રષ્ટું કિં વા વિગતશિરસં વાસુદેવં વિનોદઃ ॥ ૬૫॥

સિન્ધોઃ પુત્ર્યાં રોષિતા કિં ત્વમાદ્યે
કસ્માદેનાં પ્રેક્ષસે નાથહીનામ્ ।
ક્ષન્તવ્યસ્તે સ્વાંશજાતાપરાધો
વ્યુત્થાપ્યૈનં મોદિતા માં કુરુષ્વ ॥ ૬૬॥

એતે સુરાસ્ત્વાં સતતં નમન્તિ

કાર્યેષુ મુખ્યાઃ પ્રથિતપ્રભાવાઃ ।
શોકાર્ણવાત્તારય દેવિ દેવા-
નુત્થાપ્ય દેવં સકલાધિનાથમ્ ॥ ૬૭॥

મૂર્ધા ગતઃ ક્વામ્બ હરેર્ન વિદ્મો
નાન્યોઽસ્ત્યુપાયઃ ખલુ જીવનેઽદ્ય ।
યથા સુધા જીવનકર્મદક્ષા
તથા જગજ્જીવિતદાસિ દેવિ ॥ ૬૮॥

સૂત ઉવાચ ।
એવં સ્તુતા તદા દેવી ગુણાતીતા મહેશ્વરી ।
પ્રસન્ના પરમા માયા વેદૈઃ સાઙ્ગૈશ્ચ સામગૈઃ ॥ ૬૯॥

તાનુવાચ તદા વાણી ચાકાશસ્થાશરીરિણી ।
દેવાન્પ્રતિ સુખૈઃ શબ્દૈર્જનાનન્દકરી શુભા ॥ ૭૦॥

મા કુરુધ્વં સુરાશ્ચિન્તાં સ્વસ્થાસ્તિષ્ઠન્તુ ચામરાઃ ।
સ્તુતાહં નિગમૈઃ કામં સન્તુષ્ટાસ્મિ ન સંશયઃ ॥ ૭૧॥

યઃ પુમાન્માનુષે લોકે સ્તૌત્યેતાં મામકીં સ્તુતિમ્ ।
પતિષ્યતિ સદા ભક્ત્યા સર્વાન્કામાનવાપ્નુયાત્ ॥ ૭૨॥

શ‍ૃણોતિ વા સ્તોત્રમિદં મદીયં
ભક્ત્યા ત્રિકાલં સતતં નરો યઃ ।
વિમુક્તદુઃખઃ સ ભવેત્સુખી ચ
વેદોક્તમેતન્નનુ વેદતુલ્યમ્ ॥ ૭૩॥

શ‍ૃણ્વન્તુ કારણં ચાદ્ય યદ્ભૂતં વદનં હરેઃ ।
અકારણં કથં કાર્યં સંસારેઽત્ર ભવિષ્યતિ ॥ ૭૪॥

ઉદધેસ્તનયાં વિષ્ણુઃ સંસ્થિતામન્તિકે પ્રિયામ્ ।
જહાસ વદનં વીક્ષ્ય તસ્યાસ્તત્ર મનોરમમ્ ॥ ૭૫॥

તયા જ્ઞાતં હરિર્નૂનં કથં માં હસતિ પ્રભુઃ ।
વિરૂપં હરિણા દૃષ્ટં મુખં મે કેન હેતુના ॥ ૭૬॥

વિનાપિ કારણેનાદ્ય કથં હાસ્યસ્ય સમ્ભવઃ ।
સપત્નીવ કૃતા તેન મન્યેઽન્યા વરવર્ણિની ॥ ૭૭॥

તતઃ કોપયુતા જાતા મહાલક્ષ્મી તમોગુણા ।
તામસી તુ તદા શક્તિસ્તસ્યા દેહે સમાવિશત્ ॥ ૭૮॥

કેનચિત્કાલયોગેન દેવકાર્યાર્થસિદ્ધયે ।
પ્રવિષ્ટા તામસી શક્તિસ્તસ્યા દેહેઽતિદારુણા ॥ ૭૯॥

તામસ્યાવિષ્ટદેહા સા ચુકોપાતિશયં તદા ।
શનકૈઃ સમુવાચેદમિદં પતતુ તે શિરઃ ॥ ૮૦॥

સ્ત્રીસ્વભાવાચ્ચ ભાવિત્વાત્કાલયોગાદ્વિનિર્ગતઃ ।
અવિચાર્ય તદા દત્તઃ શાપઃ સ્વસુખનાશનઃ ॥ ૮૧॥

સપત્નીસમ્ભવં દુઃખં વૈધવ્યાદધિકં ત્વિતિ ।
વિચિન્ત્ય મનસેત્યુક્તં તામસીશક્તિયોગતઃ ॥ ૮૨॥

અનૃતં સાહસં માયા મૂર્ખત્વમતિલોભતા ।
અશૌચં નિર્દયત્વં ચ સ્ત્રીણાં દોષાઃ સ્વભાવજાઃ ॥ ૮૩॥

સશીર્ષં વાસુદેવં તં કરોમ્યદ્ય યથા પુરા ।
શિરોઽસ્ય શાપયોગેન નિમગ્નં લવણામ્બુધૌ ॥ ૮૪॥

અન્યચ્ચ કારણં કિઞ્ચિદ્વર્તતે સુરસત્તમાઃ ।
ભવતાં ચ મહત્કાર્યં ભવિષ્યતિ ન સંશયઃ ॥ ૮૫॥

પુરા દૈત્યો મહાબાહુર્હયગ્રીવોઽતિવિશ્રુતઃ ।
તપશ્ચક્રે સરસ્વત્યાસ્તીરે પરમદારુણમ્ ॥ ૮૬॥

જપન્નેકાક્ષરં મન્ત્રં માયાબીજાત્મકં મમ ।
નિરાહારો જિતાત્મા ચ સર્વભોગવિવર્જિતઃ ॥ ૮૭॥

ધ્યાયન્માં તામસીં શક્તિં સર્વભૂષણભૂષિતામ્ ।
એવં વર્ષસહસ્રં ચ તપશ્ચક્રેઽતિદારુણમ્ ॥ ૮૮॥

તદાહં તામસં રૂપં કૃત્વા તત્ર સમાગતા ।
દર્શને પુરતસ્તસ્ય ધ્યાતં તત્તેન યાદૃશમ્ ॥ ૮૯॥

સિંહોપરિ સ્થિતા તત્ર તમવોચં દયાન્વિતા ।
વરં બ્રૂહિ મહાભાગ દદામિ તવ સુવ્રત ॥ ૯૦॥

ઇતિ શ્રુત્વા વચો દેવ્યા દાનવઃ પ્રેમપૂરિતઃ ।
પ્રદક્ષિણાં પ્રણામં ચ ચકાર ત્વરિતસ્તદા ॥ ૯૧॥

દૃષ્ટ્વા રૂપં મદીયં સ પ્રેમોત્ફુલ્લવિલોચનઃ ।
હર્ષાશ્રુપૂર્ણનયનસ્તુષ્ટાવ સ ચ માં તદા ॥ ૯૨॥

હયગ્રીવ ઉવાચ ।
નમો દેવ્યૈ મહામાયે સૃષ્ટિસ્થિત્યન્તકારિણિ ।
ભક્તાનુગ્રહચતુરે કામદે મોક્ષદે શિવે ॥ ૯૩॥

ધરામ્બુતેજઃપવનખપઞ્ચાનાં ચ કારણમ્ ।
ત્વં ગન્ધરસરૂપાણાં કારણં સ્પર્શશબ્દયોઃ ॥ ૯૪॥

ઘ્રાણં ચ રસના ચક્ષુસ્ત્વક્શ્રોત્રમિન્દ્રિયાણિ ચ ।
કર્મેન્દ્રિયાણિ ચાન્યાનિ ત્વત્તઃ સર્વં મહેશ્વરિ ॥ ૯૫॥

દેવ્યુવાચ ।
કિં તેઽભીષ્ટં વરં બ્રૂહિ વાઞ્છિતં યદ્દદામિ તત્ ।
પરિતુષ્ટાસ્મિ ભક્ત્યા તે તપસા ચાદ્ભુતેન ચ ॥ ૯૬॥

હયગ્રીવ ઉવાચ ।
યથા મે મરણં માતર્ન ભવેત્તત્તથા કુરુ ।
ભવેયમમરો યોગી તથાજેયઃ સુરાસુરૈઃ ॥ ૯૭॥

દેવ્યુવાચ ।
જાતસ્ય હિ ધ્રુવં મૃત્યુર્ધ્રુવં જન્મ મૃતસ્ય ચ ।
મર્યાદા ચેદૃશી લોકે ભવેચ્ચ કથમન્યથા ॥ ૯૮॥

એવં ત્વં નિશ્ચયં કૃત્વા મરણે રાક્ષસોત્તમ ।
વરં વરય ચેષ્ટં તે વિચાર્ય મનસા કિલ ॥ ૯૯॥

હયગ્રીવ ઉવાચ ।
હયગ્રીવાચ્ચ મે મૃત્યુર્નાન્યસ્માજ્જગદમ્બિકે ।
ઇતિ મે વાઞ્છિતં કામં પૂરયસ્વ મનોગતમ્ ॥ ૧૦૦॥

દેવ્યુવાચ ।
ગૃહં ગચ્છ મહાભાગ કુરુ રાજ્યં યથાસુખમ્ ।
હયગ્રીવાદૃતે મૃત્યુર્ન તે નૂનં ભવિષ્યતિ ॥ ૧૦૧॥

ઇતિ દત્ત્વા વરં તસ્મા અન્તર્ધાનં ગતા તથા ।
મુદં પરમિકાં પ્રાપ્ય સોઽપિ સ્વભવનં ગતઃ ॥ ૧૦૨॥

સ પીડયતિ દુષ્ટાત્મા મુનીન્ વેદાંશ્ચ સર્વશઃ ।
ન કોઽપિ વિદ્યતે તસ્ય હન્તાદ્ય ભુવનત્રયે ॥ ૧૦૩॥

તસ્માચ્છીર્ષં હયસ્યાસ્ય સમુદ્ધૃત્ય મનોહરમ્ ।
દેહેઽત્ર વિશિરોવિષ્ણોસ્ત્વષ્ટા સંયોજયિષ્યતિ ॥ ૧૦૪॥

હયગ્રીવોઽથ ભગવાન્હનિષ્યતિ તમાસુરમ્ ।
પાપિષ્ઠં દાનવં ક્રૂરં દેવાનાં હિતકામ્યયા ॥ ૧૦૫॥

સૂત ઉવાચ ।
એવં સુરાંસ્તદાભાષ્ય શર્વાણી વિરરામ હ ।
દેવાસ્તદાતિસન્તુષ્ટાસ્તમૂચુર્દેવશિલ્પિનમ્ ॥ ૧૦૬॥

દેવા ઊચુઃ ।
કુરુ કાર્યં સુરાણાં વૈ વિષ્ણોઃ શીર્ષાભિયોજનમ્ ।
દાનવપ્રવરં દૈત્યં હયગ્રીવો હનિષ્યતિ ॥ ૧૦૭॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તેષાં ત્વષ્ટા ચાતિત્વરાન્વિતઃ ।
વાજિશીર્ષં ચકર્તાશુ ખડ્ગેન સુરસન્નિધૌ ॥ ૧૦૮॥

વિષ્ણોઃ શરીરે તેનાશુ યોજિતં વાજિમસ્તકમ્ ।
હયગ્રીવો હરિર્જાતો મહામાયાપ્રસાદતઃ ॥ ૧૦૧॥

કિયતા તેન કાલેન દાનવો મદદર્પિતઃ ।
નિહતસ્તરસા સઙ્ખ્યે દેવાનાં રિપુરોજસા ॥ ૧૧૦॥

ય ઇદં શુભમાખ્યાનં શ‍ૃણ્વન્તિ ભુવિ માનવાઃ ।
સર્વદુઃખવિનિર્મુક્તાસ્તે ભવન્તિ ન સંશયઃ ॥ ૧૧૧॥

મહામાયાચરિત્રઞ્ચ પવિત્રં પાપનાશનમ્ ।
પઠતાં શ‍ૃણ્વતાં ચૈવ સર્વસમ્પત્તિકારકમ્ ॥ ૧૧૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે હયગ્રીવાવતારકથનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૧.૫॥

# ૧.૬ ષષ્ઠોઽધ્યાયઃ । મધુકૈટભયોર્યુદ્ધોદ્યોગવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૌમ્ય યચ્ચ ત્વયા પ્રોક્તં શૌરેર્યુદ્ધં મહાર્ણવે ।
મધુકૈટભયોઃ સાર્ધં પઞ્ચવર્ષસહસ્રકમ્ ॥ ૧॥

કસ્માત્તૌ દાનવૌ જાતૌ તસ્મિન્નેકાર્ણવે જલે ।
મહાવીર્યૌ દુરાધર્ષૌ દેવૈરપિ સુદુર્જયૌ ॥ ૨॥

કથં તાવસુરૌ જાતૌ કથં ચ હરિણા હતૌ ।
તદાચક્ષ્વ મહાપ્રાજ્ઞ ચરિતં પરમાદ્ભુતમ્ ॥ ૩॥

શ્રોતુકામા વયં સર્વે ત્વં વક્તા ચ બહુશ્રુતઃ ।
દૈવાચ્ચાત્રૈવ સઞ્જાતઃ સંયોગશ્ચ તથાવયોઃ ॥ ૪॥

મૂર્ખેણ સહ સંયોગો વિષાદપિ સુદુર્જરઃ ।
વિજ્ઞેન સહ સંયોગઃ સુધારસસમઃ સ્મૃતઃ ॥ ૫॥

જીવન્તિ પશવઃ સર્વે ખાદન્તિ મેહયન્તિ ચ ।
જાનન્તિ વિષયાકારં વ્યવાયસુખમદ્ભુતમ્ ॥ ૬॥

ન તેષાં સદસજ્જ્ઞાનં વિવેકો ન ચ મોક્ષદઃ ।
પશુભિસ્તે સમા જ્ઞેયા યેષાં ન શ્રવણાદરઃ ॥ ૭॥

મૃગાદ્યાઃ પશવઃ કેચિજ્જાનન્તિ શ્રાવણં સુખમ્ ।
અશ્રોત્રાઃ ફણિનશ્ચૈવ મુમુહુર્નાદપાનતઃ ॥ ૮॥

પઞ્ચાનામિન્દ્રિયાણાં વૈ શુભે શ્રવણદર્શને ।
શ્રવણાદ્વસ્તુવિજ્ઞાનં દર્શનાચ્ચિત્તરઞ્જનમ્ ॥ ૯॥

શ્રવણં ત્રિવિધં પ્રોક્તં સાત્ત્વિકં રાજસં તથા ।
તામસં ચ મહાભાગ સુજ્ઞોક્તં નિશ્ચયાન્વિતમ્ ॥ ૧૦॥

સાત્ત્વિકં વેદશાસ્ત્રાદિ સાહિત્યં ચૈવ રાજસમ્ ।
તામસં યુદ્ધવાર્તા ચ પરદોષપ્રકાશનમ્ ॥ ૧૧॥

સાત્ત્વિકં ત્રિવિધં પ્રોક્તં પ્રજ્ઞાવદ્ભિશ્ચ પણ્ડિતૈઃ ।
ઉત્તમં મધ્યમં ચૈવ તથૈવાધમમિત્યુત ॥ ૧૨॥

ઉત્તમં મોક્ષફલદં સ્વર્ગદં મધ્યમં તથા ।
અધમં ભોગદં પ્રોક્તં નિર્ણીય વિદિતં બુધૈઃ ॥ ૧૩॥

સાહિત્યં ચૈવ ત્રિવિધં સ્વીયાયાં ચોત્તમં સ્મૃતમ્ ।
મધ્યમં વારયોષાયાં પરોઢાયાં તથાધમમ્ ॥ ૧૪॥

તામસં ત્રિવિધં જ્ઞેયં વિદ્વદ્ભિઃ શાસ્ત્રદર્શિભિઃ ।
આતતાયિનિયુદ્ધં યત્તદુત્તમમુદાહૃતમ્ ॥ ૧૫॥

મધ્યમં ચાપિ વિદ્વેષાત્પાણ્ડવાનાં તથારિભિઃ ।
અધમં નિર્નિમિત્તં તુ વિવાદે કલહે તથા ॥ ૧૬॥

તદત્ર શ્રવણં મુખ્યં પુરાણસ્ય મહામતે ।
બુદ્ધિપ્રવર્ધનં પુણ્યં તતઃ પાપપ્રણાશનમ્ ॥ ૧૭॥

તદાખ્યાહિ મહાબુદ્ધે કથાં પૌરાણિકીં શુભામ્ ।
શ્રુતાં દ્વૈપાયનાત્પૂર્વં સર્વાર્થસ્ય પ્રસાધિનીમ્ ॥ ૧૮॥

સૂત ઉવાચ ।
યૂયં ધન્યા મહાભાગા ધન્યોઽહં પૃથિવીતલે ।
યેષાં શ્રવણબુદ્ધિશ્ચ મમાપિ કથને કિલ ॥ ૧૯॥

પુરા ચૈકાર્ણવે જાતે વિલીને ભુવનત્રયે ।
શેષપર્યઙ્કસુપ્તે ચ દેવદેવે જનાર્દને ॥ ૨૦॥

વિષ્ણુકર્ણમલોદ્ભૂતૌ દાનવૌ મધુકૈટભૌ ।
મહાબલૌ ચ તૌ દૈત્યૌ વિવૃદ્ધૌ સાગરે જલે ॥ ૨૧॥

ક્રીડમાનૌ સ્થિતૌ તત્ર વિચરન્તાવિતસ્તતઃ ।
તાવેકદા મહાકાયૌ ક્રીડાસક્તૌ મહાર્ણવે ॥ ૨૨॥

ચિન્તામવાપતુશ્ચિત્તે ભ્રાતરાવિવ સંસ્થિતૌ ।
નાકારણં ભવેત્કાર્યં સર્વત્રૈષા પરમ્પરા ॥ ૨૩॥

આધેયં તુ વિનાધારં ન તિષ્ઠતિ કથઞ્ચન ।
આધારાધેયભાવસ્તુ ભાતિ નો ચિત્તગોચરઃ ॥ ૨૪॥

ક્વ તિષ્ઠતિ જલં ચેદં સુખરૂપં સુવિસ્તરમ્ ।
કેન સૃષ્ટં કથં જાતં મગ્નાવાવાઞ્જલે સ્થિતૌ ॥ ૨૫॥

આવાં વા કથમુત્પન્નૌ કેન વોત્પાદિતાવુભૌ ।
પિતરૌ ક્વેતિ વિજ્ઞાનં નાસ્તિ કામં તથાવયોઃ ॥ ૨૬॥

સૂત ઉવાચ ।
એવં કામયમાનૌ તૌ જગ્મતુર્ન વિનિશ્ચયમ્ ।
ઉવાચ કૈટભસ્તત્ર મધું પાર્શ્વે સ્થિતં જલે ॥ ૨૭॥

કૈટભ ઉવાચ ।
મધો વામત્ર સલિલે સ્થાતું શક્તિર્મહાબલા ।
વર્તતે ભ્રાતરચલા કારણં સા હિ મે મતા ॥ ૨૮॥

તયા તતમિદં તોયં તદાધારં ચ તિષ્ઠતિ ।
સા એવ પરમા દેવી કારણઞ્ચ તથાવયોઃ ॥ ૨૯॥

એવં વિબુધ્યમાનૌ તૌ ચિન્તાવિષ્ટૌ યદાસુરૌ ।
તદાકાશે શ્રુતં તાભ્યાં વાગ્બીજં સુમનોહરમ્ ॥ ૩૦॥

ગૃહીતં ચ તતસ્તાભ્યાં તસ્યાભ્યાસો દૃઢઃ કૃતઃ ।
તદા સૌદામની દૃષ્ટા તાભ્યાં ખે ચોત્થિતા શુભા ॥ ૩૧॥

તાભ્યાં વિચારિતં તત્ર મન્ત્રોઽયં નાત્ર સંશયઃ ।
તથા ધ્યાનમિદં દૃષ્ટં ગગને સગુણં કિલ ॥ ૩૨॥

નિરાહારૌ જિતાત્માનૌ તન્મનસ્કૌ સમાહિતૌ ।
બભૂવતુર્વિચિન્ત્યૈવં જપધ્યાનપરાયણૌ ॥ ૩૩॥

એવં વર્ષસહસ્રં તુ તાભ્યાં તપ્તં મહત્તપઃ ।
પ્રસન્ના પરમા શક્તિર્જાતા સા પરમા તયોઃ ॥ ૩૪॥

ખિન્નૌ તૌ દાનવૌ દૃષ્ટ્વા તપસે કૃતનિશ્ચયૌ ।
તયોરનુગ્રહાર્થાય વાગુવાચાશરીરિણી ॥ ૩૫॥

વરં વાં વાઞ્છિતં દૈત્યૌ બ્રૂતં પરમસમ્મતમ્ ।
દદામિ પરિતુષ્ટાસ્મિ યુવયોસ્તપસા કિલ ॥ ૩૬॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા તુ તાં વાણીં દાનવાવૂચતુસ્તદા ।
સ્વેચ્છયા મરણં દેવિ વરં નૌ દેહિ સુવ્રતે ॥ ૩૭॥

વાગુવાચ ।
વાઞ્છિતં મરણં દૈત્યૌ ભવેદ્વા મત્પ્રસાદતઃ ।
અજેયૌ દેવદૈત્યૈશ્ચ ભ્રાતરૌ નાત્ર સંશયઃ ॥ ૩૮॥

સૂત ઉવાચ ।
ઇતિ દત્તવરૌ દેવ્યા દાનવૌ મદદર્પિતૌ ।
ચક્રતુઃ સાગરે ક્રીડાં યાદોગણસમન્વિતૌ ॥ ૩૯॥

કાલેન કિયતા વિપ્રા દાનવાભ્યાં યદૃચ્છયા ।
દૃષ્ટઃ પ્રજાપતિર્બ્રહ્મા પદ્માસનગતઃ પ્રભુઃ ॥ ૪૦॥

દૃષ્ટ્વા તુ મુદિતાવાસ્તાં યુદ્ધકામૌ મહાબલૌ ।
તમૂચતુસ્તદા તત્ર યુદ્ધં નૌ દેહિ સુવ્રત ॥ ૪૧॥

નોચેત્પદ્મં પરિત્યજ્ય યથેષ્ટં ગચ્છ માચિરમ્ ।
યદિ ત્વં નિર્બલશ્ચાસિ ક્વ યોગ્યં શુભમાસનમ્ ॥ ૪૨॥

વીરભોગ્યમિદં સ્થાનં કાતરોઽસિ ત્યજાશુ વૈ ।
તયોરિતિ વચઃ શ્રુત્વા ચિન્તામાપ પ્રજાપતિઃ ॥ ૪૩॥

દૃષ્ટ્વા ચ બલિનૌ વીરૌ કિં કરોમીતિ તાપસઃ ।
ચિન્તાવિષ્ટસ્તદા તસ્થૌ ચિન્તયન્મનસા તદા ॥ ૪૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે મધુકૈટભયોર્યુદ્ધોદ્યોગવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૧.૬॥

## ૧.૭ સપ્તમોઽધ્યાયઃ । વિષ્ણુપ્રબોધઃ ।

સૂત ઉવાચ ।
તૌ વીક્ષ્ય બલિનૌ બ્રહ્મા તદોપાયાનચિન્તયત્ ।
સામદાનભિદાદીંશ્ચ યુદ્ધાન્તાન્સર્વતન્ત્રવિત્ ॥ ૧॥

ન જાનેઽહં બલં નૂનમેતયોર્વા યથાતથમ્ ।
અજ્ઞાતે તુ બલે કામં નૈવ યુદ્ધં પ્રશસ્યતે ॥ ૨॥

સ્તુતિં કરોમિ ચેદદ્ય દુષ્ટયોર્મદમત્તયોઃ ।
પ્રકાશિતં ભવેન્નૂનં નિર્બલત્વં મયા સ્વયમ્ ॥ ૩॥

વધિષ્યતિ તદૈકોઽપિ નિર્બલત્વે પ્રકાશિતે ।
દાનં નૈવાદ્ય યોગ્યં વા ભેદઃ કાર્યો મયા કથમ્ ॥ ૪॥

વિષ્ણું પ્રબોધયામ્યદ્ય શેષે સુપ્તં જનાર્દનમ્ ।
ચતુર્ભુજં મહાવીર્યં દુઃખહા સ ભવિષ્યતિ ॥ ૫॥

ઇતિ સઞ્ચિન્ત્ય મનસા પદ્મનાલગતોઽબ્જજઃ ।
જગામ શરણં વિષ્ણું મનસા દુઃખનાશકમ્ ॥ ૬॥

તુષ્ટાવ બોધનાર્થં તં શુભૈઃ સમ્બોધનૈર્હરિમ્ ।
નારાયણં જગન્નાથં નિસ્પન્દં યોગનિદ્રયા ॥ ૭॥

બ્રહ્મોવાચ ।
દીનનાથ હરે વિષ્ણો વામનોત્તિષ્ઠ માધવ ।
ભક્તાર્તિહૃદ્ધૃષીકેશ સર્વાવાસ જગત્પતે ॥ ૮॥

અન્તર્યામિન્નમેયાત્મન્વાસુદેવ જગત્પતે ।
દુષ્ટારિનાશનૈકાગ્રચિત્ત ચક્રગદાધર ॥ ૯॥

સર્વજ્ઞ સર્વલોકેશ સર્વશક્તિસમન્વિત ।
ઉત્તિષ્ઠોત્તિષ્ઠ દેવેશ દુઃખનાશન પાહિ મામ્ ॥ ૧૦॥

વિશ્વમ્ભર વિશાલાક્ષ પુણ્યશ્રવણકીર્તન ।
જગદ્યોને નિરાકાર સર્ગસ્થિત્યન્તકારક ॥ ૧૧॥

ઇમૌ દૈત્યૌ મહારાજ હન્તુકામૌ મદોદ્ધતૌ ।
ન જાનાસ્યખિલાધાર કથં માં સઙ્કટે ગતમ્ ॥ ૧૨॥

ઉપેક્ષસેઽતિદુઃખાર્તં યદિ માં શરણં ગતમ્ ।
પાલકત્વં મહાવિષ્ણો નિરાધારં ભવેત્તતઃ ॥ ૧૩॥

એવં સ્તુતોઽપિ ભગવાન્ ન બુબોધ યદા હરિઃ ।
યોગનિદ્રાસમાક્રાન્તસ્તદા બ્રહ્મા હ્યચિન્તયત્ ॥ ૧૪॥

નૂનં શક્તિસમાક્રાન્તો વિષ્ણુર્નિદ્રાવશં ગતઃ ।
જજાગાર ન ધર્માત્મા કિં કરોમ્યદ્ય દુઃખિતઃ ॥ ૧૫॥

હન્તુકામાવુભૌ પ્રાપ્તૌ દાનવૌ મદગર્વિતૌ ।
કિં કરોમિ ક્વ ગચ્છામિ નાસ્તિ મે શરણં ક્વચિત્ ॥ ૧૬॥

ઇતિ સઞ્ચિન્ત્ય મનસા નિશ્ચયં પ્રતિપદ્ય ચ ।
તુષ્ટાવ યોગનિદ્રાં તામેકાગ્રહૃદયસ્થિતઃ ॥ ૧૭॥

વિચાર્ય મનસાપ્યેવં શક્તિર્મે રક્ષણે ક્ષમા ।
યયા હ્યચેતનો વિષ્ણુઃ કૃતોઽસ્તિ સ્પન્દવર્જિતઃ ॥ ૧૮॥

વ્યસુર્યથા ન જાનાતિ ગુણાચ્છબ્દાદિકાનિહ ।

તથા હરિર્ન જાનાતિ નિદ્રામીલિતલોચનઃ ॥ ૧૯॥

ન જહાતિ યતો નિદ્રાં બહુધા સંસ્તુતોઽપ્યસૌ ।
મન્યે નાસ્ય વશે નિદ્રા નિદ્રયાયં વશીકૃતઃ ॥ ૨૦॥

યો યસ્ય વશમાપન્તઃ સ તસ્ય કિઙ્કરઃ કિલ ।
તસ્માચ્ચ યોગનિદ્રેયં સ્વામિની માપતેર્હરેઃ ॥ ૨૧॥

સિન્ધુજાયા અપિ વશે યયા સ્વામી વશીકૃતઃ ।
નૂનં જગદિદં સર્વં ભગવત્યા વશીકૃતમ્ ॥ ૨૨॥

અહં વિષ્ણુસ્તથા શમ્ભુઃ સાવિત્રી ચ રમાપ્યુમા ।
સર્વે વયં વશે યસ્યા નાત્ર કિઞ્ચિદ્વિચારણા ॥ ૨૩॥

હરિરપ્યવશઃ શેતે યથાન્યઃ પ્રાકૃતો જનઃ ।
યયાભિભૂતઃ કા વાર્તા કિલાન્યેષાં મહાત્મનામ્ ॥ ૨૪॥

સ્તૌમ્યદ્ય યોગનિદ્રાં વૈ યયા મુક્તો જનાર્દનઃ ।
ઘટયિષ્યતિ યુદ્ધે ચ વાસુદેવઃ સનાતનઃ ॥ ૨૫॥

ઇતિ કૃત્વા મતિં બ્રહ્મા પદ્મનાલસ્થિતસ્તદા ।
તુષ્ટાવ યોગનિદ્રાં તાં વિષ્ણોરઙ્ગેષુ સંસ્થિતામ્ ॥ ૨૬॥

બ્રહ્મોવાચ ।
દેવિ ત્વમસ્ય જગતઃ કિલ કારણં હિ
જ્ઞાતં મયા સકલવેદવચોભિરમ્બ ।
યદ્વિષ્ણુરપ્યખિલલોકવિવેકકર્તા
નિદ્રાવશં ચ ગમિતઃ પુરુષોત્તમોઽદ્ય ॥ ૨૭॥

કો વેદ તે જનનિ મોહવિલાસલીલાં
મૂઢોઽસ્મ્યહં હરિરયં વિવશશ્ચ શેતે ।
ઈદૃક્ત્તયા સકલભૂતમનોનિવાસે
વિદ્વત્તમો વિબુધકોટિષુ નિર્ગુણાયાઃ ॥ ૨૮॥

સાઙ્ખ્યા વદન્તિ પુરુષં પ્રકૃતિં ચ યાં તાં
ચૈતન્યભાવરહિતાં જગતશ્ચ કર્ત્રીમ્ ।
કિં તાદૃશાસિ કથમત્ર જગન્નિવાસ-
શ્ચૈતન્યતાવિરહિતો વિહિતસ્ત્વયાદ્ય ॥ ૨૯॥

નાટ્યં તનોષિ સગુણા વિવિધપ્રકારં
નો વેત્તિ કોઽપિ તવ કૃત્યવિધાનયોગમ્ ।
ધ્યાયન્તિ યાં મુનિગણા નિયતં ત્રિકાલં
સન્ધ્યેતિ નામ પરિકલ્પ્ય ગુણાન્ ભવાનિ ॥ ૩૦॥

બુદ્ધિર્હિ બોધકરણા જગતાં સદા ત્વં
શ્રીશ્ચાસિ દેવિ સતતં સુખદા સુરાણામ્ ।
કીર્તિસ્તથા મતિધૃતી કિલ કાન્તિરેવ
શ્રદ્ધા રતિશ્ચ સકલેષુ જનેષુ માતઃ ॥ ૩૧॥

નાતઃ પરં કિલ વિતર્કશતૈઃ પ્રમાણં
પ્રાપ્તં મયા યદિહ દુઃખગતિં ગતેન ।
ત્વં ચાત્ર સર્વજગતાં જનનીતિ સત્યં
નિદ્રાલુતાં વિતરતા હરિણાત્ર દૃષ્ટમ્ ॥ ૩૨॥

ત્વં દેવિ વેદવિદુષામપિ દુર્વિભાવ્યા
વેદોઽપિ નૂનમખિલાર્થતયા ન વેદ ।
યસ્માત્ત્વદુદ્ભવમસૌ શ્રુતિરાપ્નુવાના
પ્રત્યક્ષમેવ સકલં તવ કાર્યમેતત્ ॥ ૩૩॥

કસ્તે ચરિત્રમખિલં ભુવિ વેદ ધીમા-
ન્નાહં હરિર્ન ચ ભવો ન સુરાસ્તથાન્યે ।
જ્ઞાતું ક્ષમાશ્ચ મુનયો ન મમાત્મજાશ્ચ
દુર્વાચ્ય એવ મહિમા તવ સર્વલોકે ॥ ૩૪॥

યજ્ઞેષુ દેવિ યદિ નામ ન તે વદન્તિ
સ્વાહેતિ વેદવિદુષો હવને કૃતેઽપિ ।
ન પ્રાપ્નુવન્તિ સતતં મખભાગધેયં
દેવાસ્ત્વમેવ વિબુધેષ્વપિ વૃત્તિદાસિ ॥ ૩૫॥

ત્રાતા વયં ભગવતિ પ્રથમં ત્વયા વૈ
દેવારિસમ્ભવભયાદધુના તથૈવ ।
ભીતોઽસ્મિ દેવિ વરદે શરણં ગતોઽસ્મિ
ઘોરં નિરીક્ષ્ય મધુના સહ કૈટભં ચ ॥ ૩૬॥

નો વેત્તિ વિષ્ણુરધુના મમ દુઃખમેત-
જ્જાને ત્વયાત્મવિવશીકૃતદેહયષ્ટિઃ ।

મુગ્ધાદિદેવમથવા જહિ દાનવેન્દ્રૌ
યદ્રોચતે તવ કુરુષ્વ મહાનુભાવે ॥ ૩૭॥

જાનન્તિ યે ન તવ દેવિ પરં પ્રભાવં
ધ્યાયન્તિ તે હરિહરાવપિ મન્દચિત્તાઃ ।
જ્ઞાતં મયાદ્ય જનનિ પ્રકટં પ્રમાણં
યદ્વિષ્ણુરપ્યતિતરાં વિવશોઽથ શેતે ॥ ૩૮॥

સિન્ધૂદ્ભવાપિ ન હરિં પ્રતિબોધિતું વૈ
શક્તા પતિં તવ વશાનુગમદ્ય શક્ત્યા ।
મન્યે ત્વયા ભગવતિ પ્રસભં રમાપિ
પ્રસ્વાપિતા ન બુબુધે વિવશીકૃતેવ ॥ ૩૯॥

ધન્યાસ્ત એવ ભુવિ ભક્તિપરાસ્તવાઙ્ઘ્રૌ
ત્યક્ત્વાન્યદેવભજનં ત્વયિ લીનભાવાઃ ।
કુર્વન્તિ દેવિ ભજનં સકલં નિકામં
જ્ઞાત્વા સમસ્તજનનીં કિલ કામધેનુમ્ ॥ ૪૦॥

ધીકાન્તિકીર્તિશુભવૃત્તિગુણાદયસ્તે
વિષ્ણોર્ગુણાસ્તુ પરિહૃત્ય ગતાઃ ક્વ ચાદ્ય ।
બન્દીકૃતો હરિરસૌ નનુ નિદ્રયાત્ર
શક્ત્યા તવૈવ ભગવત્યતિમાનવત્યાઃ ॥ ૪૧॥

ત્વં શક્તિરેવ જગતામખિલપ્રભાવા
ત્વન્નિર્મિતં ચ સકલં ખલુ ભાવમાત્રમ્ ।
ત્વં ક્રીડસે નિજવિનિર્મિતમોહજાલે
નાટ્યે યથા વિહરતે સ્વકૃતે નટો વૈ ॥ ૪૨॥

વિષ્ણુસ્ત્વયા પ્રકટિતઃ પ્રથમં યુગાદૌ
દત્તા ચ શક્તિરમલા ખલુ પાલનાય ।
ત્રાતં ચ સર્વમખિલં વિવશીકૃતોઽદ્ય
યદ્રોચતે તવ તથામ્બ કરોષિ નૂનમ્ ॥ ૪૩॥

સૃષ્ટ્વાત્ર માં ભગવતિ પ્રવિનાશિતું ચે-
ન્નેચ્છાસ્તિ તે કુરુ દયાં પરિહૃત્ય મૌનમ્ ।
કસ્માદિમૌ પ્રકટિતૌ કિલ કાલરૂપૌ
યદ્વા ભવાનિ હસિતું નુ કિમિચ્છસે મામ્ ॥ ૪૪॥

જ્ઞાતં મયા તવ વિચેષ્ટિતમદ્ભુતં વૈ
કૃત્વાખિલં જગદિદં રમસે સ્વતન્ત્રા ।
લીનં કરોષિ સકલં કિલ માં તથૈવ
હન્તું ત્વમિચ્છસિ ભવાનિ કિમત્ર ચિત્રમ્ ॥ ૪૫॥

કામં કુરુષ્વ વધમદ્ય મમૈવ માત-
ર્દુઃખં ન મે મરણજં જગદમ્બિકેઽત્ર ।
કર્તા ત્વયૈવ વિહિતઃ પ્રથમં સ ચાયં
દૈત્યાહતોઽથ મૃત ઇત્યયશો ગરિષ્ઠમ્ ॥ ૪૬॥

ઉત્તિષ્ઠ દેવિ કુરુ રૂપમિહાદ્ભુતં ત્વં
માં વા ત્વિમૌ જહિ યથેચ્છસિ બાલલીલે ।
નો ચેત્પ્રબોધય હરિં નિહનેદિમૌ ય-
સ્ત્વત્સાધ્યમેતદખિલં કિલ કાર્યજાતમ્ ॥ ૪૭॥

સૂત ઉવાચ ।
એવં સ્તુતા તદા દેવી તામસી તત્ર વેધસા ।
નિઃસૃત્ય હરિદેહાત્તુ સંસ્થિતા પાર્શ્વતસ્તદા ॥ ૪૮॥

ત્યક્ત્વાઙ્ગાનિ ચ સર્વાણિ વિષ્ણોરતુલતેજસઃ ।
નિર્ગતા યોગનિદ્રા સા નાશાય ચ તયોસ્તદા ॥ ૪૯॥

વિસ્પન્દિતશરીરોઽસૌ યદા જાતો જનાર્દનઃ ।
ધાતા પરમિકાં પ્રાપ્તો મુદં દૃષ્ટ્વા હરિં તતઃ ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે વિષ્ણુપ્રબોધો નામ સપ્તમોઽધ્યાયઃ ॥ ૧.૭॥

## ૧.૮ અષ્ટમોઽધ્યાયઃ । આરાધ્યનિર્ણયવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સન્દેહોઽત્ર મહાભાગ કથાયાં તુ મહાદ્ભુતઃ ।
વેદશાસ્ત્રપુરાણૈશ્ચ નિશ્ચિતં તુ સદા બુધૈઃ ॥ ૧॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ત્રયો દેવાઃ સનાતનાઃ ।
નાતઃ પરતરં કિઞ્ચિદ્બ્રહ્માણ્ડેઽસ્મિન્મહામતે ॥ ૨॥

બ્રહ્મા સૃજતિ લોકાન્વૈ વિષ્ણુઃ પાત્યખિલં જગત્ ।
રુદ્રઃ સંહરતે કાલે ત્રય એતેઽત્ર કારણમ્ ॥ ૩॥

એકા મૂર્તિસ્ત્રયો દેવા બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
રજઃસત્ત્વતમોભિશ્ચ સંયુતાઃ કાર્યકારકાઃ ॥ ૪॥

તેષાં મધ્યે હરિઃ શ્રેષ્ઠો માધવઃ પુરુષોત્તમઃ ।
આદિદેવો જગન્નાથઃ સમર્થઃ સર્વકર્મસુ ॥ ૫॥

નાન્યઃ કોઽપિ સમર્થોઽસ્તિ વિષ્ણોરતુલતેજસઃ ।
સ કથં સ્વાપિતઃ સ્વામી વિવશો યોગમાયયા ॥ ૬॥

ક્વ ગતં તસ્ય વિજ્ઞાનં જીવતશ્ચેષ્ટિતં કુતઃ ।
સન્દેહોઽયં મહાભાગ કથયસ્વ યથાશુભમ્ ॥ ૭॥

કા સા શક્તિઃ પુરા પ્રોક્તા યયા વિષ્ણુર્જિતઃ પ્રભુઃ ।
કુતો જાતા કથં શક્તા કા શક્તિર્વદ સુવ્રત ॥ ૮॥

યસ્તુ સર્વેશ્વરો વિષ્ણુર્વાસુદેવો જગદ્ગુરુઃ ।
પરમાત્મા પરાનન્દઃ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૯॥

સર્વકૃત્સર્વભૃત્સ્રષ્ટા વિરજઃ સર્વગઃ શુચિઃ ।
સ કથં નિદ્રયા નીતઃ પરતન્ત્રઃ પરાત્પરઃ ॥ ૧૦॥

એતદાશ્ચર્યભૂતો હિ સન્દેહો નઃ પરન્તપ ।
છિન્ધિ જ્ઞાનાસિના સૂત વ્યાસશિષ્ય મહામતે ॥ ૧૧॥

સૂત ઉવાચ ।
કઃ સન્દેહં ભિનત્ત્યેનં ત્રૈલોક્યે સચરાચરે ।
મુહ્યન્તિ મુનયઃ કામં બ્રહ્મપુત્રાઃ સનાતનાઃ ॥ ૧૨॥

નારદઃ કપિલશ્ચૈવ પ્રશ્નેઽસ્મિન્મુનિસત્તમાઃ ।
કિં બ્રવીમિ મહાભાગા દુર્ઘટેઽસ્મિન્વિમર્શને ॥ ૧૩॥

દેવેષુ વિષ્ણુઃ કથિતઃ સર્વગઃ સર્વપાલકઃ ।
યતો વિરાડિદં સર્વમુત્પન્નં સચરાચરમ્ ॥ ૧૪॥

તે સર્વે સમુપાસન્તે નત્વા દેવં પરાત્પરમ્ ।
નારાયણં હૃષીકેશં વાસુદેવં જનાર્દનમ્ ॥ ૧૫॥

તથા કેચિન્મહાદેવં શઙ્કરં શશિશેખરમ્ ।
ત્રિનેત્રં પઞ્ચવક્ત્રં ચ શૂલપાણિં વૃષધ્વજમ્ ॥ ૧૬॥

તથા વેદેષુ સર્વેષુ ગીતં નામ્ના ત્રિયમ્બકમ્ ।
કપર્દિનં પઞ્ચવક્ત્રં ગૌરીદેહાર્ધધારિણમ્ ॥ ૧૭॥

કૈલાસવાસનિરતં સર્વશક્તિસમન્વિતમ્ ।
ભૂતવૃન્દયુતં દેવં દક્ષયજ્ઞવિઘાતકમ્ ॥ ૧૮॥

તથા સૂર્યં વેદવિદઃ સાયમ્પ્રાતર્દિને દિને ।
મધ્યાહ્ને તુ મહાભાગાઃ સ્તુવન્તિ વિવિધૈઃ સ્તવૈઃ ॥ ૧૯॥

તથા વેદેષુ સર્વેષુ સૂર્યોપાસનમુત્તમમ્ ।
પરમાત્મેતિ વિખ્યાતં નામ તસ્ય મહાત્મનઃ ॥ ૨૦॥

અગ્નિઃ સર્વત્ર વેદેષુ સંસ્તુતો વેદવિત્તમૈઃ ।
ઇન્દ્રશ્ચાપિ ત્રિલોકેશો વરુણશ્ચ તથાપરઃ ॥ ૨૧॥

યથા ગઙ્ગા પ્રવાહૈશ્ચ બહુભિઃ પરિવર્તતે ।
તથૈવ સર્વદેવેષુ વિષ્ણુઃ પ્રોક્તો મહર્ષિભિઃ ॥ ૨૨॥

ત્રીણ્યેવ હિ પ્રમાણાનિ પઠિતાનિ સુપણ્ડિતૈઃ ।
પ્રત્યક્ષં ચાનુમાનં ચ શાબ્દં ચૈવ તૃતીયકમ્ ॥ ૨૩॥

ચત્વાર્યેવેતરે પ્રાહુરુપમાનયુતાનિ ચ ।
અર્થાપત્તિયુતાન્યન્યે પઞ્ચ પ્રાહુર્મહાધિયઃ ॥ ૨૪॥

સપ્ત પૌરાણિકાશ્ચૈવ પ્રવદન્તિ મનીષિણઃ ।
એતૈઃ પ્રમાણૈર્દુર્જ્ઞેયં યદ્બ્રહ્મ પરમં ચ તત્ ॥ ૨૫॥

વિતર્કશ્ચાત્ર કર્તવ્યો બુદ્ધ્યા ચૈવાગમેન ચ ।
નિશ્ચયાત્મિકયા યુક્ત્યા વિચાર્ય ચ પુનઃ પુનઃ ॥ ૨૬॥

પ્રત્યક્ષતસ્તુ વિજ્ઞાનં ચિન્ત્યં મતિમતા સદા ।
દૃષ્ટાન્તેનાપિ સતતં શિષ્ટમાર્ગાનુસારિણા ॥ ૨૭॥

વિદ્વાંસોઽપિ વદન્ત્યેવં પુરાણૈઃ પરિગીયતે ।
દ્રુહિણે સૃષ્ટિશક્તિશ્ચ હરૌ પાલનશક્તિતા ॥ ૨૮॥

હરે સંહારશક્તિશ્ચ સૂર્યે શક્તિઃ પ્રકાશિકા ।
ધરાધરણશક્તિશ્ચ શેષે કૂર્મે તથૈવ ચ ॥ ૨૯॥

સાદ્યા શક્તિઃ પરિણતા સર્વસ્મિન્યા પ્રતિષ્ઠિતા ।
દાહશક્તિસ્તથા વહ્નૌ સમીરે પ્રેરણાત્મિકા ॥ ૩૦॥

શિવોઽપિ શવતાં યાતિ કુણ્ડલિન્યા વિવર્જિતઃ ।
શક્તિહીનસ્તુ યઃ કશ્ચિદસમર્થઃ સ્મૃતો બુધૈઃ ॥ ૩૧॥

એવં સર્વત્ર ભૂતેષુ સ્થાવરેષુ ચરેષુ ચ ।
બ્રહ્માદિસ્તમ્બપર્યન્તં બ્રહ્માણ્ડેઽસ્મિન્મહાતપાઃ ॥ ૩૨॥

શક્તિહીનં તુ નિન્દ્યં સ્યાદ્વસ્તુમાત્રં ચરાચરમ્ ।
અશક્તઃ શત્રુવિજયે ગમને ભોજને તથા ॥ ૩૩॥

એવં સર્વગતા શક્તિઃ સા બ્રહ્મેતિ વિવિચ્યતે ।
સોપાસ્યા વિવિધૈઃ સમ્યગ્વિચાર્યા સુધિયા સદા ॥ ૩૪॥

વિષ્ણૌ ચ સાત્ત્વિકી શક્તિસ્તયા હીનોઽપ્યકર્મકૃત્ ।
દ્રુહિણે રાજસી શક્તિર્યયા હીનો હ્યસૃષ્ટિકૃત્ ॥ ૩૫॥

શિવે ચ તામસી શક્તિસ્તયા સંહારકારકઃ ।
ઇત્યૂહ્યં મનસા સર્વં વિચાર્ય ચ પુનઃ પુનઃ ॥ ૩૬॥

શક્તિઃ કરોતિ બ્રહ્માણ્ડં સા વૈ પાલયતેઽખિલમ્ ।
ઇચ્છયા સંહરત્યેષા જગદેતચ્ચરાચરમ્ ॥ ૩૭॥

ન વિષ્ણુર્ન હરઃ શક્રો ન બ્રહ્મા ન ચ પાવકઃ ।
ન સૂર્યો વરુણઃ શક્તઃ સ્વે સ્વે કાર્યે કથઞ્ચન ॥ ૩૮॥

તયા યુક્તા હિ કુર્વન્તિ સ્વાનિ કાર્યાણિ તે સુરાઃ ।
સૈવ કારણકાર્યેષુ પ્રત્યક્ષેણાવગમ્યતે ॥ ૩૯॥

સગુણા નિર્ગુણા સા તુ દ્વિધા પ્રોક્તા મનીષિભિઃ ।
સગુણા રાગિભિઃ સેવ્યા નિર્ગુણા તુ વિરાગિભિઃ ॥ ૪૦॥

ધર્માર્થકામમોક્ષાણાં સ્વામિની સા નિરાકુલા ।
દદાતિ વાઞ્છિતાન્કામાન્પૂજિતા વિધિપૂર્વકમ્ ॥ ૪૧॥

ન જાનન્તિ જના મૂઢાસ્તાં સદા માયયાવૃતાઃ ।
જાનન્તોઽપિ નરાઃ કેચિન્મોહયન્તિ પરાનપિ ॥ ૪૨॥

પણ્ડિતાઃ સ્વોદરાર્થં વૈ પાખણ્ડાનિ પૃથક્પૃથક્ ।

પ્રવર્તયન્તિ કલિના પ્રેરિતા મન્દચેતસઃ ॥ ૪૩॥

કલાવસ્મિન્મહાભાગા નાનાભેદસમુત્થિતાઃ ।
નાન્યે યુગે તથા ધર્મા વેદબાહ્યાઃ કથઞ્ચન ॥ ૪૪॥

વિષ્ણુશ્ચરત્યસાવુગ્ર તપો વર્ષાણ્યનેકશઃ ।
બ્રહ્મા હરસ્ત્રયો દેવા ધ્યાયન્તઃ કમપિ ધ્રુવમ્ ॥ ૪૫॥

કામયાનાઃ સદા કામં તે ત્રયઃ સર્વદૈવ હિ ।
યજન્તિ યજ્ઞાન્વિવિધાન્બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૪૬॥

તે વૈ શક્તિં પરાં દેવીં બ્રહ્માખ્યાં પરમાત્મિકામ્ ।
ધ્યાયન્તિ મનસા નિત્યં નિત્યાં મત્વા સનાતનીમ્ ॥ ૪૭॥

તસ્માચ્છક્તિઃ સદા સેવ્યા વિદ્વદ્ભિઃ કૃતનિશ્ચયૈઃ ।
નિશ્ચયઃ સર્વશાસ્ત્રાણાં જ્ઞાતવ્યો મુનિસત્તમાઃ ॥ ૪૮॥

કૃષ્ણાચ્છ્રુતં મયા ચૈતત્તેન જ્ઞાતં તુ નારદાત્ ।
પિતુઃ સકાશાત્તેનાપિ બ્રહ્મણા વિષ્ણુવાક્યતઃ ॥ ૪૯॥

ન શ્રોતવ્યં ન મન્તવ્યમન્યેષાં વચનં બુધૈઃ ।
શક્તિરેવ સદા સેવ્યા વિદ્વદ્ભિઃ કૃતનિશ્ચયૈઃ ॥ ૫૦॥

પ્રત્યક્ષમપિ દ્રષ્ટવ્યમશક્તસ્ય વિચેષ્ટિતમ્ ।
અતઃ સર્વેષુ ભૂતેષુ જ્ઞાતવ્યા શક્તિરેવ હિ ॥ ૫૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે આરાધ્યનિર્ણયવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૧.૮॥

## ૧.૯ નવમોઽધ્યાયઃ । હરિકૃતમધુકૈટભવધવર્ણનમ્ ।

સૂત ઉવાચ ।
યદા વિનિર્ગતા નિદ્રા દેહાત્તસ્ય જગદ્ગુરોઃ ।
નેત્રાસ્યનાસિકાબાહુહૃદયેભ્યસ્તથોરસઃ ॥ ૧॥

નિઃસૃત્ય ગગને તસ્થૌ તામસી શક્તિરુત્તમા ।
ઉદતિષ્ઠજ્જગન્નાથો જૃમ્ભમાણઃ પુનઃ પુનઃ ॥ ૨॥

તદાપશ્યત્ સ્થિતં તત્ર ભયત્રસ્તં પ્રજાપતિમ્ ।
ઉવાચ ચ મહાતેજા મેઘગમ્ભીરયા ગિરા ॥ ૩॥

વિષ્ણુરુવાચ ।
કિમાગતોઽસિ ભગવંસ્તપસ્ત્યક્ત્વાત્ર પદ્મજ ।
કસ્માચ્ચિન્તાતુરોઽસિ ત્વં ભયાકુલિતમાનસઃ ॥ ૪॥

બ્રહ્મોવાચ ।
ત્વત્કર્ણમલજૌ દેવ દૈત્યૌ ચ મધુકૈટભૌ ।
હન્તું માં સમુપાયાતૌ ઘોરરૂપૌ મહાબલૌ ॥ ૫॥

ભયાત્તયોઃ સમાયાતસ્ત્વત્સમીપં જગત્પતે ।
ત્રાહિ માં વાસુદેવાદ્ય ભયત્રસ્તં વિચેતનમ્ ॥ ૬॥

વિષ્ણુરુવાચ ।
તિષ્ઠાદ્ય નિર્ભયો જાતસ્તૌ હનિષ્યામ્યહં કિલ ।
યુદ્ધાયાજગ્મતુર્મૂઢૌ મત્સમીપં ગતાયુષૌ ॥ ૭॥

સૂત ઉવાચ ।
એવં વદતિ દેવેશે દાનવૌ તૌ મહાબલૌ ।
વિચિન્વાનાવજં ચોભૌ સમ્પ્રાપ્તૌ મદગર્વિતૌ ॥ ૮॥

નિરાધારૌ જલે તત્ર સંસ્થિતૌ વિગતજ્વરૌ ।
તાવૂચતુર્મદોન્મત્તૌ બ્રહ્માણં મુનિસત્તમાઃ ॥ ૯॥

પલાયિત્વા સમાયાતઃ સન્નિધાવસ્ય કિં તતઃ ।
યુદ્ધં કુરુ હનિષ્યાવઃ પશ્યતોઽસ્યૈવ સન્નિધૌ ॥ ૧૦॥

પશ્ચાદેનં હનિષ્યાવઃ સર્પભોગોપરિસ્થિતમ્ ।
ત્વમદ્ય કુરુ સઙ્ગ્રામં દાસોઽસ્મીતિ ચ વા વદ ॥ ૧૧॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં વિષ્ણુસ્તાવુવાચ જનાર્દનઃ ।
કુરુતં સમરં કામં મયા દાનવપુઙ્ગવૌ ॥ ૧૨॥

હરિષ્યામિ મદં ચાહં યુવયોર્મત્તયોઃ કિલ ।
આગચ્છતં મહાભાગૌ શ્રદ્ધા ચેદ્વાં મહાબલૌ ॥ ૧૩॥

સૂત ઉવાચ ।
શ્રુત્વા તદ્વચનં ચોભૌ ક્રોધવ્યાકુલલોચનૌ ।
નિરાધારૌ જલસ્થૌ ચ યુદ્ધોદ્યુક્તૌ બભૂવતુઃ ॥ ૧૪॥

મધુશ્ચ કુપિતસ્તત્ર હરિણા સહ સંયુગમ્ ।
કર્તું પ્રચલિતસ્તૂર્ણં કૈટભસ્તુ તથા સ્થિતઃ ॥ ૧૫॥

બાહુયુદ્ધં તયોરાસીન્મલ્લયોરિવ મત્તયોઃ ।
શ્રાન્તે મધૌ કૈટભસ્તુ સઙ્ગ્રામમકરોત્તદા ॥ ૧૬॥

પુનર્મધુઃ કૈટભશ્ચ યુયુધાતે પુનઃ પુનઃ ।
બાહુયુદ્ધેન રાગાન્ધૌ વિષ્ણુના પ્રભવિષ્ણુના ॥ ૧૭॥

પ્રેક્ષકસ્તુ તદા બ્રહ્મા દેવી ચૈવાન્તરિક્ષગા ।
ન મમ્લતુસ્તદા તૌ તુ વિષ્ણુસ્તુ ગ્લાનિમાપ્તવાન્ ॥ ૧૮॥

પઞ્ચવર્ષસહસ્રાણિ યદા જાતાનિ યુદ્ધ્યતા ।
હરિણા ચિન્તિતં તત્ર કારણં મરણે તયોઃ ॥ ૧૯॥

પઞ્ચવર્ષસહસ્રાણિ મયા યુદ્ધં કૃતં કિલ ।
ન શ્રાન્તૌ દાનવૌ ઘોરૌ શ્રાન્તોઽહં ચૈતદદ્ભુતમ્ ॥ ૨૦॥

ક્વ ગતં મે બલં શૌર્યં કસ્માચ્ચેમાવનામયૌ ।
કિમત્ર કારણં ચિન્ત્યં વિચાર્ય મનસા ત્વિહ ॥ ૨૧॥

ઇતિ ચિન્તાપરં દૃષ્ટ્વા હરિં હર્ષપરાવુભૌ ।
ઊચતુસ્તૌ મદોન્મત્તૌ મેઘગમ્ભીરનિઃસ્વનૌ ॥ ૨૨॥

તવ નોચેદ્બલં વિષ્ણો યદિ શ્રાન્તોઽસિ યુદ્ધતઃ ।
બ્રૂહિ દાસોઽસ્મિ વાં નૂનં કૃત્વા શિરસિ ચાઞ્જલિમ્ ॥ ૨૩॥

ન ચેદ્યુદ્ધં કુરુષ્વાદ્ય સમર્થોઽસિ મહામતે ।
હત્વા ત્વાં નિહનિષ્યાવઃ પુરુષં ચ ચતુર્મુખમ્ ॥ ૨૪॥

સૂત ઉવાચ ।
શ્રુત્વા તદ્ભાષિતં વિષ્ણુસ્તયોસ્તસ્મિન્મહોદધૌ ।
ઉવાચ વચનં શ્લક્ષ્ણં સામપૂર્વં મહામનાઃ ॥ ૨૫॥

હરિરુવાચ ।
શ્રાન્તે ભીતે ત્યક્તશસ્ત્રે પતિતે બાલકે તથા ।
પ્રહરન્તિ ન વીરાસ્તે ધર્મ એષ સનાતનઃ ॥ ૨૬॥

પઞ્ચવર્ષસહસ્રાણિ કૃતં યુદ્ધં મયા ત્વિહ ।

એકોઽહં ભ્રાતરૌ વાં ચ બલિનૌ સદૃશૌ તથા ॥ ૨૭॥

કૃતં વિશ્રમણં મધ્યે યુવાભ્યાં ચ પુનઃ પુનઃ ।
તથા વિશ્રમણં કૃત્વા યુધ્યેઽહં નાત્ર સંશયઃ ॥ ૨૮॥

તિષ્ઠતં હિ યુવાં તાવદ્બલવન્તૌ મદોત્કટૌ ।
વિશ્રમ્યાહં કરિષ્યામિ યુદ્ધં વા ન્યાયમાર્ગતઃ ॥ ૨૯॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય વિશ્રબ્ધૌ દાનવોત્તમૌ ।
સંસ્થિતૌ દૂરતસ્તત્ર સઙ્ગ્રામે કૃતનિશ્ચયૌ ॥ ૩૦॥

અતિદૂરે ચ તૌ દૃષ્ટ્વા વાસુદેવશ્ચતુર્ભુજઃ ।
દધ્યૌ ચ મનસા તત્ર કારણં મરણે તયોઃ ॥ ૩૧॥

ચિન્તનાજ્જ્ઞાનમુત્પન્નં દેવીદત્તવરાવુભૌ ।
કામં વાઞ્છિતમરણૌ ન મમ્લતુરતસ્ત્વિમૌ ॥ ૩૨॥

વૃથા મયા કૃતં યુદ્ધં શ્રમોઽયં મે વૃથા ગતઃ ।
કરોમિ ચ કથં યુદ્ધમેવં જ્ઞાત્વા વિનિશ્ચયમ્ ॥ ૩૩॥

અકૃતે ચ તથા યુદ્ધે કથમેતૌ ગમિષ્યતઃ ।
વિનાશં દુઃખદૌ નિત્યં દાનવૌ વરદર્પિતૌ ॥ ૩૪॥

ભગવત્યા વરો દત્તસ્તયા સોઽપિ ચ દુર્ઘટઃ ।
મરણં ચેચ્છયા કામં દુઃખિતોઽપિ ન વાઞ્છતિ ॥ ૩૫॥

રોગગ્રસ્તોઽપિ દીનોઽપિ ન મુમૂર્ષતિ કશ્ચન ।
કથં ચેમૌ મદોન્મત્તૌ મર્તુકામૌ ભવિષ્યતઃ ॥ ૩૬॥

નન્વદ્ય શરણં યામિ વિદ્યાં શક્તિં સુકામદામ્ ।
વિના તયા ન સિધ્યન્તિ કામાઃ સમ્યક્પ્રસન્નયા ॥ ૩૭॥

એવં સઞ્ચિન્ત્યમાનસ્તુ ગગને સંસ્થિતાં શિવામ્ ।
અપશ્યદ્ભગવાન્વિષ્ણુર્યોગનિદ્રાં મનોહરામ્ ॥ ૩૮॥

કૃતાઞ્જલિરમેયાત્મા તાં ચ તુષ્ટાવ યોગવિત્ ।
વિનાશાર્થં તયોસ્તત્ર વરદાં ભુવનેશ્વરીમ્ ॥ ૩૯॥

વિષ્ણુરુવાચ ।
નમો દેવિ મહામાયે સૃષ્ટિસંહારકારિણિ ।

અનાદિનિધને ચણ્ડિ ભુક્તિમુક્તિપ્રદે શિવે ॥ ૪૦॥

ન તે રૂપં વિજાનામિ સગુણં નિર્ગુણં તથા ।
ચરિત્રાણિ કુતો દેવિ સઙ્ખ્યાતીતાનિ યાનિ તે ॥ ૪૧॥

અનુભૂતો મયા તેઽદ્ય પ્રભાવશ્ચાતિદુર્ઘટઃ ।
યદહં નિદ્રયા લીનઃ સઞ્જાતોઽસ્મિ વિચેતનઃ ॥ ૪૨॥

બ્રહ્મણા ચાતિયત્નેન બોધિતોઽપિ પુનઃ પુનઃ ।
ન પ્રબુદ્ધઃ સર્વથાહં સઙ્કોચિતષડિન્દ્રિયઃ ॥ ૪૩॥

અચેતનત્વં સમ્પ્રાપ્તઃ પ્રભાવાત્તવ ચામ્બિકે ।
ત્વયા મુક્તઃ પ્રબુદ્ધોઽહં યુદ્ધં ચ બહુધા કૃતમ્ ॥ ૪૪॥

શ્રાન્તોઽહં ન ચ તૌ શ્રાન્તૌ ત્વયા દત્તવરૌ વરૌ ।
બ્રહ્માણં હન્તુમાયાતૌ દાનવૌ મદગર્વિતૌ ॥ ૪૫॥

આહૂતૌ ચ મયા કામં દ્વન્દ્વયુદ્ધાય માનદે ।
કૃતં યુદ્ધં મહાઘોરં મયા તાભ્યાં મહાર્ણવે ॥ ૪૬॥

મરણે વરદાનં તે તતો જ્ઞાતં મહાદ્ભુતમ્ ।
જ્ઞાત્વાહં શરણં પ્રાપ્તસ્ત્વામદ્ય શરણપ્રદામ્ ॥ ૪૭॥

સાહાય્યં કુરુ મે માતઃ ખિન્નોઽહં યુદ્ધકર્મણા ।
દૃપ્તૌ તૌ વરદાનેન તવ દેવાર્તિનાશને ॥ ૪૮॥

હન્તું મામુદ્યતૌ પાપૌ કિં કરોમિ ક્વ યામિ ચ ।
ઇત્યુક્ત્વા સા તદા દેવી સ્મિતપૂર્વમુવાચ હ ॥ ૪૯॥

પ્રણમન્તં જગન્નાથં વાસુદેવં સનાતનમ્ ।
દેવદેવ હરે વિષ્ણો કુરુ યુદ્ધં પુનઃ સ્વયમ્ ॥ ૫૦॥

વઞ્ચયિત્વા ત્વિમૌ શૂરૌ હન્તવ્યૌ ચ વિમોહિતૌ ।
મોહયિષ્યામ્યહં નૂનં દાનવૌ વક્રયા દૃશા ॥ ૫૧॥

જહિ નારાયણાશુ ત્વં મમ માયાવિમોહિતૌ ।
સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં વિષ્ણુસ્તસ્યાઃ પ્રીતિરસાન્વિતમ્ ॥ ૫૨॥

સઙ્ગ્રામસ્થલમાસાદ્ય તસ્થૌ તત્ર મહાર્ણવે ।
તદાયાતૌ ચ તૌ વીરૌ યુદ્ધકામૌ મહાબલૌ ॥ ૫૩॥

વીક્ષ્ય વિષ્ણું સ્થિતં તત્ર હર્ષયુક્તૌ બભૂવતુઃ ।
તિષ્ઠ તિષ્ઠ મહાકામ કુરુ યુદ્ધં ચતુર્ભુજ ॥ ૫૪॥

દૈવાધીનૌ વિદિત્વાદ્ય નૂનં જયપરાજયૌ ।
સબલો જયમાપ્નોતિ દૈવાજ્જયતિ દુર્બલઃ ॥ ૫૫॥

સર્વથૈવ ન કર્તવ્યૌ હર્ષશોકૌ મહાત્મના ।
પુરા વૈ બહવો દૈત્યા જિતા દાનવવૈરિણા ॥ ૫૬॥

અધુના ચાવયોઃ સાર્ધં યુધ્યમાનઃ પરાજિતઃ ।
સૂત ઉવાચ ।
ઇત્યુક્ત્વા તૌ મહાબાહૂ યુદ્ધાય સમુપસ્થિતૌ ॥ ૫૭॥

વીક્ષ્ય વિષ્ણુર્જઘાનાશુ મુષ્ટિનાદ્ભુતકર્મણા ।
તાવપ્યતિબલોન્મત્તૌ જઘ્નતુર્મુષ્ટિના હરિમ્ ॥ ૫૮॥

એવં પરસ્પરં જાતં યુદ્ધં પરમદારુણમ્ ।
યુધ્યમાનૌ મહાવીર્યૌ દૃષ્ટ્વા નારાયણસ્તદા ॥ ૫૯॥

અપશ્યત્સમ્મુખં દેવ્યાઃ કૃત્વા દીનાં દૃશં હરિઃ ।
સૂત ઉવાચ ।
તં વીક્ષ્ય તાદૃશં વિષ્ણું કરુણારસસંયુતમ્ ॥ ૬૦॥

જહાસાતીવ તામ્રાક્ષી વીક્ષમાણા તદાસુરૌ ।
તૌ જઘાન કટાક્ષૈશ્ચ કામબાણૈરિવાપરૈઃ ॥ ૬૧॥

મન્દસ્મિતયુતૈઃ કામં પ્રેમભાવયુતૈરનુ ।
દૃષ્ટ્વા મુમુહતુઃ પાપૌ દેવ્યા વક્રવિલોકનમ્ ॥ ૬૨॥

વિશેષમિતિ મન્વાનૌ કામબાણાતિપીડિતૌ ।
વીક્ષમાણૌ સ્થિતૌ તત્ર તાં દેવીં વિશદપ્રભામ્ ॥ ૬૩॥

હરિણાપિ ચ તદ્દૃષ્ટં દેવ્યાસ્તત્ર ચિકીર્ષિતમ્ ।
મોહિતૌ તૌ પરિજ્ઞાય ભગવાન્કાર્યવિત્તમઃ ॥ ૬૪॥

ઉવાચ તૌ હસન્ શ્લક્ષ્ણં મેઘગમ્ભીરયા ગિરા ।
વરં વરયતાં વીરૌ યુવયોર્યોઽભિવાઞ્છિતઃ ॥ ૬૫॥

દદામિ પરમપ્રીતો યુદ્ધેન યુવયોઃ કિલ ।

દાનવા બહવો દૃષ્ટા યુધ્યમાના મયા પુરા ॥ ૬૬॥

યુવયોઃ સદૃશઃ કોઽપિ ન દૃષ્ટો ન ચ વૈ શ્રુતઃ ।
તસ્માત્તુષ્ટોઽસ્મિ કામં વૈ નિસ્તુલેન બલેન ચ ॥ ૬૭॥

ભ્રાત્રોશ્ચ વાઞ્છિતં કામં પ્રયચ્છામિ મહાબલૌ ।
સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં વિષ્ણોઃ સાભિમાનૌ સ્મરાતુરૌ ॥ ૬૮॥

વીક્ષમાણૌ મહામાયાં જગદાનન્દકારિણીમ્ ।
તમૂચતુશ્ચ કામાર્તૌ વિષ્ણું કમલલોચનૌ ॥ ૬૯॥

હરે ન યાચકાવાવાં ત્વં કિં દાતુમિહેચ્છસિ ।
દદાવ તુલ્યં દેવેશ દાતારૌ નૌ ન યાચકૌ ॥ ૭૦॥

પ્રાર્થય ત્વં હૃષીકેશ મનોઽભિલષિતં વરમ્ ।
તુષ્ટૌ સ્વસ્તવ યુદ્ધેન વાસુદેવાદ્ભુતેન ચ ॥ ૭૧॥

તયોસ્તદ્વચનં શ્રુત્વા પ્રત્યુવાચ જનાર્દનઃ ।
ભવેતામદ્ય મે તુષ્ટૌ મમ વધ્યાવુભાવપિ ॥ ૭૨॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં વિષ્ણોર્દાનવૌ ચાતિવિસ્મિતૌ ।
વઞ્ચિતાવિતિ મન્વાનૌ તસ્થતુઃ શોકસંયુતૌ ॥ ૭૩॥

વિચાર્ય મનસા તૌ તુ દાનવૌ વિષ્ણુમૂચતુઃ ।
પ્રેક્ષ્ય સર્વં જલમયં ભૂમિં સ્થલવિવર્જિતામ્ ॥ ૭૪॥

હરે યોઽયં વરો દત્તસ્ત્વયા પૂર્વં જનાર્દન ।
સત્યવાગસિ દેવેશ દેહિ તં વાઞ્છિતં વરમ્ ॥ ૭૫॥

નિર્જલે વિપુલે દેશે હનસ્વ મધુસૂદન ।
વધ્યાવાવાં તુ ભવતઃ સત્યવાગ્ભવ માધવ ॥ ૭૬॥

સ્મૃત્વા ચક્રં તદા વિષ્ણુસ્તાવુવાચ હસન્હરિઃ ।
હન્મ્યદ્ય વાં મહાભાગૌ નિર્જલે વિપુલે સ્થલે ॥ ૭૭॥

ઇત્યુક્ત્વા દેવદેવેશ ઊરૂ કૃત્વાતિવિસ્તરૌ ।
દર્શયામાસ તૌ તત્ર નિર્જલં ચ જલોપરિ ॥ ૭૮॥

નાસ્ત્યત્ર દાનવૌ વારિ શિરસી મુઞ્ચતામિહ ।

સત્યવાગહમદ્યૈવ ભવિષ્યામિ ચ વાં તથા ॥ ૭૯॥

તદાકર્ણ્ય વચસ્તથ્યં વિચિન્ત્ય મનસા ચ તૌ ।
વર્ધયામાસતુર્દેહં યોજનાનાં સહસ્રકમ્ ॥ ૮૦॥

ભગવાન્દ્વિગુણં ચક્રે જઘનં વિસ્મિતૌ તદા ।
શીર્ષે સન્દધતાં તત્ર જઘને પરમાદ્ભુતે ॥ ૮૧॥

રથાઙ્ગેન તદા છિન્ને વિષ્ણુના પ્રભવિષ્ણુના ।
જઘનોપરિ વેગેન પ્રકૃષ્ટે શિરસી તયોઃ ॥ ૮૨॥

ગતપ્રાણૌ તદા જાતૌ દાનવૌ મધુકૈટભૌ ।
સાગરઃ સકલો વ્યાપ્તસ્તદા વૈ મેદસા તયોઃ ॥ ૮૩॥

મેદિનીતિ તતો જાતં નામ પૃથ્વ્યાઃ સમન્તતઃ ।
અભક્ષ્યા મૃત્તિકા તેન કારણેન મુનીશ્વરાઃ ॥ ૮૪॥

ઇતિ વઃ કથિતં સર્વં યત્પૃષ્ટોઽસ્મિ સુનિશ્ચિતમ્ ।
મહાવિદ્યા મહામાયા સેવનીયા સદા બુધૈઃ ॥ ૮૫॥

આરાધ્યા પરમા શક્તિઃ સર્વૈરપિ સુરાસુરૈઃ ।
નાતઃ પરતરં કિઞ્ચિદધિકં ભુવનત્રયે ॥ ૮૬॥

સત્યં સત્યં પુનઃ સત્યં વેદશાસ્ત્રાર્થનિર્ણયઃ ।
પૂજનીયા પરા શક્તિર્નિર્ગુણા સગુણાથવા ॥ ૮૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે હરિકૃતમધુકૈટભવધવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૧.૯॥

## ૧.૧૦ દશમોઽધ્યાયઃ । શિવવરદાનવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સૂત પૂર્વં ત્વયા પ્રોક્તં વ્યાસેનામિતતેજસા ।
કૃત્વા પુરાણમખિલં શુકાયાધ્યાપિતં શુભમ્ ॥ ૧॥

વ્યાસેન તુ તપસ્તપ્ત્વા કથમુત્પાદિતઃ શુકઃ ।
વિસ્તરં બ્રૂહિ સકલં યચ્છ્રુતં કૃષ્ણતસ્ત્વયા ॥ ૨॥

સૂત ઉવાચ ।
પ્રવક્ષ્યામિ શુકોત્પત્તિં વ્યાસાત્સત્યવતીસુતાત્ ।

યથોત્પન્નઃ શુકઃ સાક્ષાદ્યોગિનાં પ્રવરો મુનિઃ ॥ ૩॥

મેરુશ‍ૃઙ્ગે મહારમ્યે વ્યાસઃ સત્યવતીસુતઃ ।
તપશ્ચચાર સોઽત્યુગ્રં પુત્રાર્થં કૃતનિશ્ચયઃ ॥ ૪॥

જપન્નેકાક્ષરં મન્ત્રં વાગ્બીજં નારદાચ્છ્રુતમ્ ।
ધ્યાયન્પરાં મહામાયાં પુત્રકામસ્તપોનિધિઃ ॥ ૫॥

અગ્નેર્ભૂમેસ્તથા વાયોરન્તરિક્ષસ્ય ચાપ્યયમ્ ।
વીર્યેણ સમ્મિતઃ પુત્રો મમ ભૂયાદિતિ સ્મ હ ॥ ૬॥

અતિષ્ઠત્સ ગતાહારઃ શતસંવત્સરં પ્રભુઃ ।
આરાધયન્મહાદેવં તથૈવ ચ સદાશિવામ્ ॥ ૭॥

શક્તિઃ સર્વત્ર પૂજ્યેતિ વિચાર્ય ચ પુનઃ પુનઃ ।
અશક્તો નિન્દ્યતે લોકે શક્તસ્તુ પરિપૂજ્યતે ॥ ૮॥

યત્ર પર્વતશ‍ૃઙ્ગે વૈ કર્ણિકારવનાદ્ભુતે ।
ક્રીડન્તિ દેવતાઃ સર્વે મુનયશ્ચ તપોઽધિકાઃ ॥ ૯॥

આદિત્યા વસવો રુદ્રા મરુતશ્ચાશ્વિનૌ તથા ।
વસન્તિ મુનયો યત્ર યે ચાન્યે બ્રહ્મવિત્તમાઃ ॥ ૧૦॥

તત્ર હેમગિરેઃ શ‍ૃઙ્ગે સઙ્ગીતધ્વનિનાદિતે ।
તપશ્ચચાર ધર્માત્મા વ્યાસઃ સત્યવતીસુતઃ ॥ ૧૧॥

તતોઽસ્ય તેજસા વ્યાપ્તં વિશ્વં સર્વં ચરાચરમ્ ।
અગ્નિવર્ણા જટા જાતા પારાશર્યસ્ય ધીમતઃ ॥ ૧૨॥

તતોઽસ્ય તેજ આલક્ષ્ય ભયમાપ શચીપતિઃ ।
તુરાસાહં તદા દૃષ્ટ્વા ભયત્રસ્તં શ્રમાતુરમ્ ॥ ૧૩॥

ઉવાચ ભગવાન્ રુદ્રો મઘવન્તં તથાસ્થિતમ્ ।
શઙ્કર ઉવાચ ।
કથમિન્દ્રાદ્ય ભીતોઽસિ કિં દુઃખં તે સુરેશ્વર ॥ ૧૪॥

અમર્ષો નૈવ કર્તવ્યસ્તાપસેષુ કદાચન ।
તપશ્ચરન્તિ મુનયો જ્ઞાત્વા માં શક્તિસંયુતમ્ ॥ ૧૫॥

ન ત્વેતેઽહિતમિચ્છન્તિ તાપસાઃ સર્વથૈવ હિ ।
ઇત્યુક્તવચનઃ શક્રસ્તમુવાચ વૃષધ્વજમ્ ॥ ૧૬॥

કસ્માત્તપસ્યતિ વ્યાસઃ કોઽર્થસ્તસ્ય મનોગતઃ ।
શિવ ઉવાચ ।
પારાશર્યસ્તુ પુત્રાર્થી તપશ્ચરતિ દુશ્ચરમ્ ॥ ૧૭॥

પૂર્ણવર્ષશતં જાતં દદામ્યદ્ય સુતં શુભમ્ ।
સૂત ઉવાચ ।
ઇત્યુક્ત્યા વાસવં રુદ્રો દયયા મુદિતાનનઃ ॥ ૧૮॥

ગત્વા ઋષિસમીપં તુ તમુવાચ જગદ્ગુરુઃ ।
ઉત્તિષ્ઠ વાસવીપુત્ર પુત્રસ્તે ભવિતા શુભઃ ॥ ૧૯॥

સર્વતેજોમયો જ્ઞાની કીર્તિકર્તા તવાનઘ ।
અખિલસ્ય જનસ્યાત્ર વલ્લભસ્તે સુતઃ સદા ॥ ૨૦॥

ભવિષ્યતિ ગુણૈઃ પૂર્ણઃ સાત્ત્વિકૈઃ સત્યવિક્રમઃ ।
સૂત ઉવાચ ।
તદાકર્ણ્ય વચઃ શ્લક્ષ્ણં કૃષ્ણદ્વૈપાયનસ્તદા ॥ ૨૧॥

શૂલપાણિં નમસ્કૃત્ય જગામાશ્રમમાત્મનઃ ।
સ ગત્વાશ્રમમેવાશુ બહુવર્ષશ્રમાતુરઃ ॥ ૨૨॥

અરણીસહિતં ગુહ્યં મમન્થાગ્નિં ચિકીર્ષયા ।
મન્થનં કુર્વતસ્તસ્ય ચિત્તે ચિન્તાભરસ્તદા ॥ ૨૩॥

પ્રાદુર્બભૂવ સહસા સુતોત્પત્તૌ મહાત્મનઃ ।
મન્થાનારણિસંયોગાન્મન્થનાચ્ચ સમુદ્ભવઃ ॥ ૨૪॥

પાવકસ્ય યથા તદ્વત્કથં મે સ્યાત્સુતોદ્ભવઃ ।
પુત્રારણિસ્તુ યા ખ્યાતા સા મમાદ્ય ન વિદ્યતે ॥ ૨૫॥

તરુણી રૂપસમ્પન્ના કુલોત્પન્ના પતિવ્રતા ।
કથં કરોમિ કાન્તાં ચ પાદયોઃ શ‍ૃઙ્ખલાસમામ્ ॥ ૨૬॥

પુત્રોત્પાદનદક્ષાં ચ પાતિવ્રત્યે સદા સ્થિતામ્ ।
પતિવ્રતાપિ દક્ષાપિ રૂપવત્યપિ કામિની ॥ ૨૭॥

સદા બન્ધનરૂપા ચ સ્વેચ્છાસુખવિધાયિની ।
શિવોઽપિ વર્તતે નિત્યં કામિનીપાશસંયુતઃ ॥ ૨૮॥

કથં કરોમ્યહં ચાત્ર દુર્ઘટં ચ ગૃહાશ્રમમ્ ।
એવં ચિન્તયતસ્તસ્ય ઘૃતાચી દિવ્યરૂપિણી ॥ ૨૯॥

પ્રાપ્તા દૃષ્ટિપથં તત્ર સમીપે ગગને સ્થિતા ।
તાં દૃષ્ટ્વા ચઞ્ચલાપાઙ્ગીં સમીપસ્થાં વરાપ્સરામ્ ॥ ૩૦॥

પઞ્ચબાણપરીતાઙ્ગસ્તૂર્ણમાસીદ્ધૃતવ્રતઃ ।
ચિન્તયામાસ ચ તદા કિં કરોમ્યદ્ય સઙ્કટે ॥ ૩૧॥

ધર્મસ્ય પુરતઃ પ્રાપ્તે કામભાવે દુરાસદે ।
અઙ્ગીકરોમિ યદ્યેનાં વઞ્ચનાર્થમિહાગતામ્ ॥ ૩૨॥

હસિષ્યન્તિ મહાત્માનસ્તાપસા માં તુ વિહ્વલમ્ ।
તપસ્તપ્ત્વા મહાઘોરં પૂર્ણવર્ષશતં ત્વિહ ॥ ૩૩॥

દૃષ્ટ્વાપ્સરાં ચ વિવશઃ કથં જાતો મહાતપાઃ ।
કામં નિન્દાપિ ભવતુ યદિ સ્યાદતુલં સુખમ્ ॥ ૩૪॥

ગહસ્થાશ્રમસમ્ભૂતં સુખદં પુત્રકામદમ્ ।
સ્વર્ગદં ચ તથા પ્રોક્તં જ્ઞાનિનાં મોક્ષદં તથા ॥ ૩૫॥

ન ભવિષ્યતિ તન્નૂનમયા દેવકન્યયા ।
નારદાચ્ચ મયા પૂર્વં શ્રુતમસ્તિ કથાનકમ્ ।
યથોર્વશીવશો રાજા પરાભૂતઃ પુરૂરવાઃ ॥ ૩૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે શિવવરદાનવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૧.૧૦॥

## ૧.૧૧ એકાદશોઽધ્યાયઃ । બુધોત્પત્તિઃ ।

ઋષય ઊચુઃ ।
કોઽસૌ પુરૂરવા રાજા કોર્વશી દેવકન્યકા ।
કથં કષ્ટં ચ સમ્પ્રાપ્તં તેન રાજ્ઞા મહાત્મના ॥ ૧॥

સર્વં કથાનકં બ્રૂહિ લોમહર્ષણજાધુના ।
શ્રોતુકામા વયં સર્વે ત્વન્મુખાબ્જચ્યુતં રસમ્ ॥ ૨॥

અમૃતાદપિ મિષ્ટા તે વાણી સૂત રસાત્મિકા ।
ન તૃપ્યામો વયં સર્વે સુધયા ચ યથામરાઃ ॥ ૩॥

સૂત ઉવાચ ।
શ‍ૃણુધ્વં મુનયઃ સર્વે કથાં દિવ્યાં મનોરમામ્ ।
વક્ષ્યામ્યહં યથાબુદ્ધ્યા શ્રુતાં વ્યાસવરોત્તમાત્ ॥ ૪॥

ગુરોસ્તુ દયિતા ભાર્યા તારા નામેતિ વિશ્રુતા ।
રૂપયૌવનયુક્તા સા ચાર્વઙ્ગી મદવિહ્વલા ॥ ૫॥

ગતૈકદા વિધોર્ધામ યજમાનસ્ય ભામિની ।
દૃષ્ટા ચ શશિનાત્યર્થં રૂપયૌવનશાલિની ॥ ૬॥

કામાતુરસ્તદા જાતઃ શશી શશિમુખીં પ્રતિ ।
સાપિ વીક્ષ્ય વિધું કામં જાતા મદનપીડિતા ॥ ૭॥

તાવન્યોન્યં પ્રેમયુક્તૌ સ્મરાર્તૌ ચ બભૂવતુઃ ।
તારા શશી મદોન્મત્તૌ કામબાણપ્રપીડિતૌ ॥ ૮॥

રેમાતે મદમત્તૌ તૌ પરસ્પરસ્પૃહાન્વિતૌ ।
દિનાનિ કતિચિત્તત્ર જાતાનિ રમમાણયોઃ ॥ ૯॥

બૃહસ્પતિસ્તુ દુઃખાર્તસ્તારામાનયિતું ગૃહમ્ ।
પ્રેષયામાસ શિષ્યં તુ નાયાતા સા વશીકૃતા ॥ ૧૦॥

પુનઃ પુનર્યદા શિષ્યં પરાવર્તત ચન્દ્રમાઃ ।
બૃહસ્પતિસ્તદા ક્રુદ્ધો જગામ સ્વયમેવ હિ ॥ ૧૧॥

ગત્વા સોમગૃહં તત્ર વાચસ્પતિરુદારધીઃ ।
ઉવાચ શશિનં ક્રુદ્ધઃ સ્મયમાનં મદાન્વિતમ્ ॥ ૧૨॥

કિં કૃતં કિલ શીતાંશો કર્મ ધર્મવિગર્હિતમ્ ।
રક્ષિતા મમ ભાર્યેયં સુન્દરી કેન હેતુના ॥ ૧૩॥

તવ દેવ ગુરુશ્ચાહં યજમાનોઽસિ સર્વથા ।
ગુરુભાર્યા કથં મૂઢ ભુક્તા કિં રક્ષિતાથવા ॥ ૧૪॥

બ્રહ્મહા હેમહારી ચ સુરાપો ગુરુતલ્પગઃ ।
મહાપાતકિનો હ્યેતે તત્સંસર્ગી ચ પઞ્ચમઃ ॥ ૧૫॥

મહાપાતકયુક્તસ્ત્વં દુરાચારોઽતિગર્હિતઃ ।
ન દેવસદનાર્હોઽસિ યદિ ભુક્તેયમઙ્ગના ॥ ૧૬॥

મુઞ્ચેમામસિતાપાઙ્ગીં નયામિ સદનં મમ ।

નોચેદ્ધક્ષ્યામિ દુષ્ટાત્મન્ ગુરુદારાપહારિણમ્ ॥ ૧૭॥

ઇત્યેવં ભાષમાણં તમુવાચ રોહિણીપતિઃ ।
ગુરું ક્રોધસમાયુક્તં કાન્તાવિરહદુઃખિતમ્ ॥ ૧૮॥

ઇન્દુરુવાચ ।
ક્રોધાત્તે તુ દુરારાધ્યા બ્રાહ્મણાઃ ક્રોધવર્જિતાઃ ।
પૂજાર્હા ધર્મશાસ્ત્રજ્ઞા વર્જનીયાસ્તતોઽન્યથા ॥ ૧૯॥

આગમિષ્યતિ સા કામં ગૃહં તે વરવર્ણિની ।
અત્રૈવ સંસ્થિતા બાલા કા તે હાનિરિહાનઘ ॥ ૨૦॥

ઇચ્છયા સંસ્થિતા ચાત્ર સુખકામાર્થિની હિ સા ।
દિનાનિ કતિચિત્સ્થિત્વા સ્વેચ્છયા ચાગમિષ્યતિ ॥ ૨૧॥

ત્વયૈવોદાહૃતં પૂર્વં ધર્મશાસ્ત્રમતં તથા ।
ન સ્ત્રી દુષ્યતિ ચારેણ ન વિપ્રો વેદકર્મણા ॥ ૨૨॥

ઇત્યુક્તઃ શશિના તત્ર ગુરુરત્યન્તદુઃખિતઃ ।
જગામ સ્વગૃહં તૂર્ણં ચિન્તાવિષ્ટઃ સ્મરાતુરઃ ॥ ૨૩॥

દિનાનિ કતિચિત્તત્ર સ્થિત્વા ચિન્તાતુરો ગુરુઃ ।
યયાવથ ગૃહં તસ્ય ત્વરિતશ્ચૌષધીપતેઃ ॥ ૨૪॥

સ્થિતઃ ક્ષત્રા નિષિદ્ધોઽસૌ દ્વારદેશે રુષાન્વિતઃ ।
નાજગામ શશી તત્ર ચુકોપાતિ બૃહસ્પતિઃ ॥ ૨૫॥

અયં મે શિષ્યતાં યાતો ગુરુપત્નીં તુ માતરમ્ ।
જગ્રાહ બલતોઽધર્મી શિક્ષણીયો મયાધુના ॥ ૨૬॥

ઉવાચ વાચં કોપાત્તુ દ્વારદેશસ્થિતો બહિઃ ।
કિં શેષે ભવને મન્દ પાપાચાર સુરાધમ ॥ ૨૭॥

દેહિ મે કામિનીં શીઘ્રં નોચેચ્છાપં દદામ્યહમ્ ।
કરોમિ ભસ્મસાન્નૂનં ન દદાસિ પ્રિયાં મમ ॥ ૨૮॥

સૂત ઉવાચ ।
ક્રૂરાણિ ચૈવમાદીનિ ભાષણાનિ બૃહસ્પતેઃ ।
શ્રુત્વા દ્વિજપતિઃ શીઘ્રં નિર્ગતઃ સદનાદ્બહિઃ ॥ ૨૯॥

તમુવાચ હસન્સોમઃ કિમિદં બહુ ભાષસે ।

ન તે યોગ્યાસિતાપાઙ્ગી સર્વલક્ષણસંયુતા ॥ ૩૦॥

કુરૂપાં ચ સ્વસદૃશીં ગૃહાણાન્યાં સ્ત્રિયં દ્વિજ ।
ભિક્ષુકસ્ય ગૃહે યોગ્યા નેદૃશી વરવર્ણિની ॥ ૩૧॥

રતિઃ સ્વસદૃશે કાન્તે નાર્યાઃ કિલ નિગદ્યતે ।
ત્વં ન જાનાસિ મન્દાત્મન્ કામશાસ્ત્રવિનિર્ણયમ્ ॥ ૩૨॥

યથેષ્ટં ગચ્છ દુર્બુદ્ધે નાહં દાસ્યામિ કામિનીમ્ ।
યચ્છક્યં કુરુ તત્કામં ન દેયા વરવર્ણિની ॥ ૩૩॥

કામાર્તસ્ય ચ તે શાપો ન માં બાધિતુમર્હતિ ।
નાહં દદે ગુરો કાન્તાં યથેચ્છસિ તથા કુરુ ॥ ૩૪॥

સૂત ઉવાચ ।
ઇત્યુક્તઃ શશિના ચેજ્યશ્ચિન્તામાપ રુષાન્વિતઃ ।
જગામ તરસા સદ્મ ક્રોધયુક્તઃ શચીપતેઃ ॥ ૩૫॥

દૃષ્ટ્વા શતક્રતુસ્તત્ર ગુરું દુઃખાતુરં સ્થિતમ્ ।
પાદ્યાર્ઘ્યાચમનીયાદ્યૈઃ પૂજયિત્વા સુસંસ્થિતઃ ॥ ૩૬॥

પપ્રચ્છ પરમોદારસ્તં તથાવસ્થિતં ગુરુમ્ ।
કા ચિન્તા તે મહાભાગ શોકાર્તોઽસિ મહામુને ॥ ૩૭॥

કેનાપમાનિતોઽસિ ત્વં મમ રાજ્યે ગુરુશ્ચ મે ।
ત્વદધીનમિદં સર્વં સૈન્યં લોકાધિપૈઃ સહ ॥ ૩૮॥

બ્રહ્મા વિષ્ણુસ્તથા શમ્ભુર્યે ચાન્યે દેવસત્તમાઃ ।
કરિષ્યન્તિ ચ સાહાય્યં કા ચિન્તા વદ સામ્પ્રતમ્ ॥ ૩૯॥

ગુરુરુવાચ ।
શશિનાપહૃતા ભાર્યા તારા મમ સુલોચના ।
ન દદાતિ સ દુષ્ટાત્મા પ્રાર્થિતોઽપિ પુનઃ પુનઃ ॥ ૪૦॥

કિં કરોમિ સુરેશાન ત્વમેવ શરણં મમ ।
સાહાય્યં કુરુ દેવેશ દુઃખિતોઽસ્મિ શતક્રતો ॥ ૪૧॥

ઇન્દ્ર ઉવાચ ।
મા શોકં કુરુ ધર્મજ્ઞ દાસોઽસ્મિ તવ સુવ્રત ।
આનયિષ્યામ્યહં નૂનં ભાર્યાં તવ મહામતે ॥ ૪૨॥

પ્રેષિતે ચેન્મયા દૂતે ન દાસ્યતિ મદાકુલઃ ।
તતો યુદ્ધં કરિષ્યામિ દેવસૈન્યૈઃ સમાવૃતઃ ॥ ૪૩॥

ઇત્યાશ્વાસ્ય ગુરું શક્રો દૂતં વક્તૃવિચક્ષણમ્ ।
પ્રેષયામાસ સોમાય વાર્તાશંસિનમદ્ભુતમ્ ॥ ૪૪॥

સ ગત્વા શશિલોકં તુ ત્વરિતઃ સુવિચક્ષણઃ ।
ઉવાચ વચનેનૈવ વચનં રોહિણીપતિમ્ ॥ ૪૫॥

પ્રેષિતોઽહં મહાભાગ શક્રેણ ત્વાં વિવક્ષયા ।
કથિતં પ્રભુણા યચ્ચ તદ્બ્રવીમિ મહામતે ॥ ૪૬॥

ધર્મજ્ઞોઽસિ મહાભાગ નીતિં જાનાસિ સુવ્રત ।
અત્રિઃ પિતા તે ધર્માત્મા ન નિદ્યં કર્તુમર્હસિ ॥ ૪૭॥

ભાર્યા રક્ષ્યા સર્વભૂતૈર્યથાશક્તિ હ્યતન્દ્રિતૈઃ ।
તદર્થે કલહઃ કામં ભવિતા નાત્ર સંશયઃ ॥ ૪૮॥

યથા તવ તથા તસ્ય યત્નઃ સ્યાદ્દારરક્ષણે ।
આત્મવત્સર્વભૂતાનિ ચિન્તય ત્વં સુધાનિધે ॥ ૪૯॥

અષ્ટાવિંશતિસઙ્ખ્યાસ્તે કામિન્યો દક્ષજાઃ શુભાઃ ।
ગુરુપત્નીં કથં ભોક્તું ત્વમિચ્છસિ સુધાનિધે ॥ ૫૦॥

સ્વર્ગે સદા વસન્ત્યેતા મેનકાદ્યા મનોરમાઃ ।
ભુઙ્ક્ષ્વ તાઃ સ્વેચ્છયા કામં મુઞ્ચ પત્નીં ગુરોરપિ ॥ ૫૧॥

ઈશ્વરા યદિ કુર્વન્તિ જુગુપ્સિતમહન્તયા ।
અજ્ઞાસ્તદનુવર્તન્તે તદા ધર્મક્ષયો ભવેત્ ॥ ૫૨॥

તસ્માન્મુઞ્ચ મહાભાગ ગુરોઃ પત્નીં મનોરમામ્ ।
કલહસ્ત્વન્નિમિત્તોઽદ્ય સુરાણાં ન ભવેદ્યથા ॥ ૫૩॥

સૂત ઉવાચ ।
સોમઃ શક્રવચઃ શ્રુત્વા કિઞ્ચિત્ક્રોધસમાકુલઃ ।
ભઙ્ગ્યા પ્રતિવચઃ પ્રાહ શક્રદૂતં તદા શશી ॥ ૫૪॥

ઇન્દુરાવાચ ।
ધર્મજ્ઞોઽસિ મહાબાહો દેવાનામધિપઃ સ્વયમ્ ।
પુરોધાપિ ચ તે તાદૃગ્યુવયોઃ સદૃશી મતિઃ ॥ ૫૫॥

પરોપદેશે કુશલા ભવન્તિ બહવો જનાઃ ।
દુર્લભસ્તુ સ્વયં કર્તા પ્રાપ્તે કર્મણિ સર્વદા ॥ ૫૬॥

બાર્હસ્પત્યપ્રણીતં ચ શાસ્ત્રં ગૃહ્ણન્તિ માનવાઃ ।
કો વિરોધોઽત્ર દેવેશ કામયાનાં ભજન્સ્ત્રિયમ્ ॥ ૫૭॥

સ્વકીયં બલિનાં સર્વં દુર્બલાનાં ન કિઞ્ચન ।
સ્વીયા ચ પરકીયા ચ ભ્રમોઽયં મન્દચેતસામ્ ॥ ૫૮॥

તારા મય્યનુરક્તા ચ યથા ન તુ તથા ગુરૌ ।
અનુરક્તા કથં ત્યાજ્યા ધર્મતો ન્યાયતસ્તથા ॥ ૫૯॥

ગૃહારમ્ભસ્તુ રક્તાયાં વિરક્તાયાં કથં ભવેત્ ।
વિરક્તેયં યદા જાતા ચકમેઽનુજકામિનીમ્ ॥ ૬૦॥

ન દાસ્યેઽહં વરારોહાં ગચ્છ દૂત વદ સ્વયમ્ ।
ઈશ્વરોઽસિ સહસ્રાક્ષ યદિચ્છસિ કુરુષ્વ તત્ ॥ ૬૧॥

સૂત ઉવાચ ।
ઇત્યુક્તઃ શશિના દૂતઃ પ્રયયૌ શક્રસન્નિધિમ્ ।
ઇન્દ્રાયાચષ્ટ તત્સર્વં યદુક્તં શીતરશ્મિના ॥ ૬૨॥

તુરાષાડપિ તચ્છ્રુત્વા ક્રોધયુક્તો બભૂવ હ ।
સેનોદ્યોગં તથા ચક્રે સાહાય્યાર્થં ગુરોર્વિભુઃ ॥ ૬૩॥

શુક્રસ્તુ વિગ્રહં શ્રુત્વા ગુરુદ્વેષાત્તતો યયૌ ।
મા દદસ્વેતિ તં વાક્યમુવાચ શશિનં પ્રતિ ॥ ૬૪॥

સાહાય્યં તે કરિષ્યામિ મન્ત્રશક્ત્યા મહામતે ।
ભવિતા યદિ સઙ્ગ્રામસ્તવ ચેન્દ્રેણ મારિષ ॥ ૬૫॥

શઙ્કરસ્તુ તદાકર્ણ્ય ગુરુદારાભિમર્શનમ્ ।
ગુરુશત્રું ભૃગું મત્વા સાહાય્યમકરોત્તદા ॥ ૬૬॥

સઙ્ગ્રામસ્તુ તદા વૃત્તો દેવદાનવયોર્દ્રુતમ્ ।
બહૂનિ તત્ર વર્ષાણિ તારકાસુરવત્કિલ ॥ ૬૭॥

દેવાસુરકૃતં યુદ્ધં દૃષ્ટ્વા તત્ર પિતામહઃ ।
હંસારૂઢો જગામાશુ તં દેશં ક્લેશશાન્તયે ॥ ૬૮॥

રાકાપતિં તદા પ્રાહ મુઞ્ચ ભાર્યાં ગુરોરિતિ ।

નોચેદ્દ્વિષણું સમાહૂય કરિષ્યામિ તુ સઙ્ક્ષયમ્ ॥ ૬૯॥

ભૃગું નિવારયામાસ બ્રહ્મા લોકપિતામહઃ ।
કિમન્યાયમતિર્જાતા સઙ્ગદોષાન્મહામતે ॥ ૭૦॥

નિષેધયામાસ તતો ભૃગુસ્તં ચૌષધીપતિમ્ ।
મુઞ્ચ ભાર્યાં ગુરોરદ્ય પિત્રાહં પ્રેષિતસ્તવ ॥ ૭૧॥

સૂત ઉવાચ ।
દ્વિજરાજસ્તુ તચ્છ્રુત્વા ભૃગોર્વચનમદ્ભુતમ્ ।
દદૌ ચ તત્પ્રિયાં ભાર્યાં ગુરોર્ગર્ભવતીં શુભામ્ ॥ ૭૨॥

પ્રાપ્ય કાન્તાં ગુરુર્હૃષ્ટઃ સ્વગૃહં મુદિતો યયૌ ।
તતો દેવાસ્તતો દૈત્યા યયુઃ સ્વાન્સ્વાન્ગૃહાન્પ્રતિ ॥ ૭૩॥

બ્રહ્મા સ્વસદનં પ્રાપ્તઃ કૈલાસં ચાપિ શઙ્કરઃ ।
બૃહસ્પતિસ્તુ સન્તુષ્ટઃ પ્રાપ્ય ભાર્યાં મનોરમામ્ ॥ ૭૪॥

તતઃ કાલેન કિયતા તારાસૂત સુતં શુભમ્ ।
સુદિને શુભનક્ષત્રે તારાપતિસમં ગુણૈઃ ॥ ૭૫॥

દૃષ્ટ્વા પુત્રં ગુરુર્જાતં ચકાર વિધિપૂર્વકમ્ ।
જાતકર્માદિકં સર્વં પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૭૬॥

શ્રુતં ચન્દ્રમસા જન્મ પુત્રસ્ય મુનિસત્તમાઃ ।
દૂતં ચ પ્રેષયામાસ ગુરું પ્રતિ મહામતિઃ ॥ ૭૭॥

ન ચાયં તવ પુત્રોઽસ્તિ મમ વીર્યસમુદ્ભવઃ ।
કથં ત્વં કૃતવાન્કામં જાતકર્માદિકં વિધિમ્ ॥ ૭૮॥

તચ્છ્રુત્વા વચનં તસ્ય દૂતસ્ય ચ બૃહસ્પતિઃ ।
ઉવાચ મમ પુત્રો મે સદૃશો નાત્ર સંશયઃ ॥ ૭૯॥

પુનર્વિવાદઃ સઞ્જાતો મિલિતા દેવદાનવાઃ ।
યુદ્ધાર્થમાગતાસ્તેષાં સમાજઃ સમજાયત ॥ ૮૦॥

તત્રાગતઃ સ્વયં બ્રહ્મા શાન્તિકામઃ પ્રજાપતિઃ ।
નિવારયામાસ મુખે સંસ્થિતાન્યુદ્ધદુર્મદાન્ ॥ ૮૧॥

તારાં પપ્રચ્છ ધર્માત્મા કસ્યાયં તનયઃ શુભે ।
સત્યં વદ વરારોહે યથા ક્લેશઃ પ્રશામ્યતિ ॥ ૮૨॥

તમુવાચાસિતાપાઙ્ગી લજ્જમાનાપ્યધોમુખી ।
ચન્દ્રસ્યેતિ શનૈરન્તર્જગામ વરવર્ણિની ॥ ૮૩॥

જગ્રાહ તં સુતં સોમઃ પ્રહૃષ્ટેનાન્તરાત્મના ।
નામ ચક્રે બુધ ઇતિ જગામ સ્વગૃહં પુનઃ ॥ ૮૪॥

યયૌ બ્રહ્મા સ્વકં ધામ સર્વે દેવાઃ સવાસવાઃ ।
યથાગતં ગતં સર્વૈઃ સર્વશઃ પ્રેક્ષકૈર્જનૈઃ ॥ ૮૫॥

કથિતેયં બુધોત્પત્તિર્ગુરુક્ષેત્રે ચ સોમતઃ ।
યથા શ્રુતા મયા પૂર્વં વ્યાસાત્સત્યવતીસુતાત્ ॥ ૮૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે બુધોત્પત્તિર્નામૈકાદશોઽધ્યાયઃ ॥ ૧.૧૧॥

## ૧.૧૨ દ્વાદશોઽધ્યાયઃ । સુદ્યુમ્નસ્તુતિઃ ।

સૂત ઉવાચ ।
તતઃ પુરૂરવા જજ્ઞે ઇલાયાં કથયામિ વઃ ।
બુધપુત્રોઽતિધર્માત્મા યજ્ઞકૃદ્દાનતત્પરઃ ॥ ૧॥

સુદ્યુમ્નો નામ ભૂપાલઃ સત્યવાદી જિતેન્દ્રિયઃ ।
સૈન્ધવં હયમારુહ્ય ચચાર મૃગયાં વને ॥ ૨॥

યુતઃ કતિપયામાત્યૈર્દંશિતશ્ચારુકુણ્ડલઃ ।
ધનુરાજગવં બદ્ધ્વા બાણસઙ્ઘં તથાદ્ભુતમ્ ॥ ૩॥

સ ભ્રમંસ્તદ્વનોદ્દેશે હન્યમાનો રુરૂન્મૃગાન્ ।
શશાંશ્ચ સૂકરાંશ્ચૈવ ખડ્ગાંશ્ચ ગવયાંસ્તથા ॥ ૪॥

શરભાન્મહિષાંશ્ચૈવ સામ્ભરાન્વનકુક્કુટાન્ ।
નિઘ્નન્મેધ્યાન્ પશૂન્ રાજા કુમારવનમાવિશત્ ॥ ૫॥

મેરોરધસ્તલે દિવ્યં મન્દારદ્રુમરાજિતમ્ ।
અશોકલતિકાકીર્ણં બકુલૈરધિવાસિતમ્ ॥ ૬॥

સાલૈસ્તાલૈસ્તમાલૈશ્ચ ચમ્પકૈઃ પનસૈસ્તથા ।
આમ્રૈર્નીપૈર્મધૂકૈશ્ચ માધવીમણ્ડપાવૃતમ્ ॥ ૭॥

દાડિમૈર્નારિકેલૈશ્ચ કદલીખણ્ડમણ્ડિતમ્ ।
યૂથિકામાલતીકુન્દપુષ્પવલ્લીસમાવૃતમ્ ॥ ૮॥

હંસકારણ્ડવાકીર્ણં કીચકધ્વનિનાદિતમ્ ।
ભ્રમરાલિરુતારામં વનં સર્વસુખાવહમ્ ॥ ૯॥

દૃષ્ટ્વા પ્રમુદિતો રાજા સુદ્યુમ્નઃ સેવકૈર્વૃતઃ ।
વૃક્ષાન્સુપુષ્પિતાન્વીક્ષ્ય કોકિલારાવમણ્ડિતાન્ ॥ ૧૦॥

પ્રવિષ્ટસ્તત્ર રાજર્ષિઃ સ્ત્રીત્વમાપ ક્ષણાત્તતઃ ।
અશ્વોઽપિ વડવા જાતશ્ચિન્તાવિષ્ટઃ સ ભૂપતિઃ ॥ ૧૧॥

કિમેતદિતિ ચિન્તાર્તશ્ચિન્ત્યમાનઃ પુનઃ પુનઃ ।
દુઃખં બહુતરં પ્રાપ્તઃ સુદ્યુમ્નો લજ્જયાન્વિતઃ ॥ ૧૨॥

કિં કરોમિ કથં યામિ ગૃહં સ્ત્રીભાવસંયુતઃ ।
કથં રાજ્યં કરિષ્યામિ કેન વા વઞ્ચિતો હ્યહમ્ ॥ ૧૩॥

ઋષય ઊચુઃ ।
સૂતાશ્ચર્યમિદં પ્રોક્તં ત્વયા યલ્લોમહર્ષણ ।
સુદ્યુમ્નઃ સ્ત્રીત્વમાપન્નો ભૂપતિર્દેવસન્નિભઃ ॥ ૧૪॥

કિં તત્કારણમાચક્ષ્વ વને તત્ર મનોહરે ।
કિં કૃતં તેન રાજ્ઞા ચ વિસ્તરં વદ સુવ્રત ॥ ૧૫॥

સૂત ઉવાચ ।
એકદા ગિરિશં દ્રષ્ટુમૃષયઃ સનકાદયઃ ।
દિશો વિતિમિરાભાસાઃ કુર્વન્તઃ સમુપાગમન્ ॥ ૧૬॥

તસ્મિંશ્ચ સમયે તત્ર શઙ્કરઃ પ્રમદાયુતઃ ।
ક્રીડાસક્તો મહાદેવો વિવસ્ત્રા કામિની શિવા ॥ ૧૭॥

ઉત્સઙ્ગે સંસ્થિતા ભર્તૂ રમમાણા મનોરમા ।
તાન્વિલોક્યામ્બિકા દેવી વિવસ્ત્રા વ્રીડિતા ભૃશમ્ ॥ ૧૮॥

ભર્તુરઙ્કાત્સમુત્થાય વસ્ત્રમાદાય પર્યધાત્ ।
લજ્જાવિષ્ટા સ્થિતા તત્ર વેપમાનાતિમાનિની ॥ ૧૯॥

ઋષયોઽપિ તયોર્વીક્ષ્ય પ્રસઙ્ગં રમમાણયોઃ ।
પરિવૃત્ય યયુસ્તૂર્ણં નરનારાયણાશ્રમમ્ ॥ ૨૦॥

હ્રીયુતાં કામિનીં વીક્ષ્ય પ્રોવાચ ભગવાન્હરઃ ।
કથં લજ્જાતુરાસિ ત્વં સુખં તે પ્રકરોમ્યહમ્ ॥ ૨૧॥

અદ્યપ્રભૃતિ યો મોહાત્પુમાન્કોઽપિ વરાનને ।
વનં ચ પ્રવિશેદેતત્સ વૈ યોષિદ્ભવિષ્યતિ ॥ ૨૨॥

ઇતિ શપ્તં વનં તેન યે જાનન્તિ જનાઃ ક્વચિત્ ।
વર્જયન્તીહ તે કામં વનં દોષસમૃદ્ધિમત્ ॥ ૨૩॥

સુદ્યુમ્નસ્તુ તદજ્ઞાનાત્પ્રવિષ્ટઃ સચિવૈઃ સહ ।
તથૈવ સ્ત્રીત્વમાપન્નસ્તૈઃ સહેતિ ન સંશયઃ ॥ ૨૪॥

ચિન્તાવિષ્ટઃ સ રાજર્ષિર્ન જગામ ગૃહં હ્રિયા ।
વિચચાર બહિસ્તસ્માદ્વનદેશાદિતસ્તતઃ ॥ ૨૫॥

ઇલેતિ નામ સમ્પ્રાપ્તં સ્ત્રીત્વે તેન મહાત્મના ।
વિચરંસ્તત્ર સમ્પ્રાપ્તો બુધઃ સોમસુતો યુવા ॥ ૨૬॥

સ્ત્રીભિઃ પરિવૃતાં તાં તુ દૃષ્ટ્વા કાન્તાં મનોરમામ્ ।
હાવભાવકલાયુક્તાં ચકમે ભગવામ્બુધઃ ॥ ૨૭॥

સાપિ તં ચકમે કાન્તં બુધં સોમસુતં પતિમ્ ।
સંયોગસ્તત્ર સઞ્જાતસ્તયોઃ પ્રેમ્ણા પરસ્પરમ્ ॥ ૨૮॥

સ તસ્યાં જનયામાસ પુરૂરવસમાત્મજમ્ ।
ઇલાયાં સોમપુત્રસ્તુ ચક્રવર્તિનમુત્તમમ્ ॥ ૨૯॥

સા પ્રાસૂત સુતં બાલા ચિન્તાવિષ્ટા વને સ્થિતા ।
સસ્માર સ્વકુલાચાર્યં વસિષ્ઠં મુનિસત્તમમ્ ॥ ૩૦॥

સ તદાસ્ય દશાં દૃષ્ટ્વા સુદ્યુમ્નસ્ય કૃપાન્વિતઃ ।
અતોષયન્મહાદેવં શઙ્કરં લોકશઙ્કરમ્ ॥ ૩૧॥

તસ્મૈ સ ભગવાંસ્તુષ્ટઃ પ્રદદૌ વાઞ્છિતં વરમ્ ।
વસિષ્ઠઃ પ્રાર્થયામાસ પુંસ્ત્વં રાજ્ઞઃ પ્રિયસ્ય ચ ॥ ૩૨॥

શઙ્કરસ્તુ નિજાં વાચમૃતાં કુર્વન્નુવાચ હ ।
માસં પુમાંસ્તુ ભવિતા માસં સ્ત્રી ભૂપતિઃ કિલ ॥ ૩૩॥

ઇત્થં પ્રાપ્ય વરં રાજા જગામ સ્વગૃહં પુનઃ ।
ચક્રે રાજ્યં સ ધર્માત્મા વસિષ્ઠસ્યાપ્યનુગ્રહાત્ ॥ ૩૪॥

સ્ત્રીત્વે તિષ્ઠતિ હર્મ્યેષુ પુંસ્ત્વે રાજ્યં પ્રશાસ્તિ ચ ।
પ્રજાસ્તસ્મિન્સમુદ્વિગ્ના નાભ્યનન્દન્મહીપતિમ્ ॥ ૩૫॥

કાલે તુ યૌવનં પ્રાપ્તઃ પુત્રઃ પુરૂરવાસ્તદા ।
પ્રતિષ્ઠાં નૃપતિસ્તસ્મૈ દત્ત્વા રાજ્યં વનં યયૌ ॥ ૩૬॥

ગત્વા તસ્મિન્વને રમ્યે નાનાદ્રુમસમાકુલે ।
નારદાન્મન્ત્રમાસાદ્ય નવાક્ષરમનુત્તમમ્ ॥ ૩૭॥

જજાપ મન્ત્રમત્યર્થં પ્રેમપૂરિતમાનસઃ ।
પરિતુષ્ટા તદા દેવી સગુણા તારિણી શિવા ॥ ૩૮॥

સિંહારૂઢા સ્થિતા ચાગ્રે દિવ્યરૂપા મનોરમા ।
વારુણીપાનસમ્મત્તા મદાઘૂર્ણિતલોચના ॥ ૩૯॥

દૃષ્ટ્વા તાં દિવ્યરૂપાં ચ પ્રેમાકુલિતલોચનઃ ।
પ્રણમ્ય શિરસા પ્રીત્યા તુષ્ટાવ જગદમ્બિકામ્ ॥ ૪૦॥

ઇલોવાચ ।
દિવ્યં ચ તે ભગવતિ પ્રથિતં સ્વરૂપં
દૃષ્ટં મયા સકલલોકહિતાનુરૂપમ્ ।
વન્દે ત્વદઙ્ઘ્રિકમલં સુરસઙ્ઘસેવ્યં
કામપ્રદં જનનિ ચાપિ વિમુક્તિદં ચ ॥ ૪૧॥

કો વેત્તિ તેઽમ્બ ભુવિ મર્ત્યતનુર્નિકામં
મુહ્યન્તિ યત્ર મુનયશ્ચ સુરાશ્ચ સર્વે ।
ઐશ્વર્યમેતદખિલં કૃપણે દયાં ચ
દૃષ્ટ્વૈવ દેવિ સકલં કિલ વિસ્મયો મે ॥ ૪૨॥

શમ્ભુર્હરિઃ કમલજો મઘવા રવિશ્ચ
વિત્તેશવહ્નિવરુણાઃ પવનશ્ચ સોમઃ ।
જાનન્તિ નૈવ વસવોઽપિ હિ તે પ્રભાવં
બુધ્યેત્કથં તવ ગુણાનગુણો મનુષ્યઃ ॥ ૪૩॥

જાનાતિ વિષ્ણુરમિતદ્યુતિરમ્બ સાક્ષા-
ત્ત્વાં સાત્ત્વિકીમુદધિજાં સકલાર્થદાં ચ ।
કો રાજસીં હર ઉમાં કિલ તામસીં ત્વાં

વેદામ્બિકે ન તુ પુનઃ ખલુ નિર્ગુણાં ત્વામ્ ॥ ૪૪॥

ક્વાહં સુમન્દમતિરપ્રતિમપ્રભાવઃ
ક્વાયં તવાતિનિપુણો મયિ સુપ્રસાદઃ ।
જાને ભવાનિ ચરિતં કરુણાસમેતં
યત્સેવકાંશ્ચ દયસે ત્વયિ ભાવયુક્તાન્ ॥ ૪૫॥

વૃત્તસ્ત્વયા હરિરસૌ વનજેશયાપિ
નૈવાચરત્યપિ મુદં મધુસૂદનશ્ચ ।
પાદૌ તવાદિપુરુષઃ કિલ પાવકેન
કૃત્વા કરોતિ ચ કરેણ શુભૌ પવિત્રૌ ॥ ૪૬॥

વાઞ્છત્યહો હરિરશોક ઇવાતિકામં
પાદાહતિં પ્રમુદિતઃ પુરુષઃ પુરાણઃ ।
તાં ત્વં કરોષિ રુષિતા પ્રણતં ચ પાદે
દૃષ્ટ્વા પતિં સકલદેવનુતં સ્મરાર્તમ્ ॥ ૪૭॥

વક્ષઃસ્થલે વસસિ દેવિ સદૈવ તસ્ય
પર્યઙ્કવત્સુચરિતે વિપુલેઽતિશાન્તે ।
સૌદામિનીવ સુઘને સુવિભૂષિતે ચ
કિં તે ન વાહનમસૌ જગદીશ્વરોઽપિ ॥ ૪૮॥

ત્વં ચેજ્જહાસિ મધુસૂદનમમ્બ કોપા-
ન્નૈવાર્ચિતોઽપિ સ ભવેત્કિલ શક્તિહીનઃ ।
પ્રત્યક્ષમેવ પુરુષં સ્વજનાસ્ત્વજન્તિ
શાન્તં શ્રિયોજ્ઝિતમતીવ ગુણૈર્વિયુક્તમ્ ॥ ૪૯॥

બ્રહ્માદયઃ સુરગણા ન તુ કિં યુવત્યો
યે ત્વત્પદામ્બુજમહર્નિશમાશ્રયન્તિ ।
મન્યે ત્વયૈવ વિહિતાઃ ખલુ તે પુમાંસઃ
કિં વર્ણયામિ તવ શક્તિમનન્તવીર્યે ॥ ૫૦॥

ત્વં નાપુમાન્ન ચ પુમાનિતિ મે વિકલ્પો
યાકાસિ દેવિ સગુણા નનુ નિર્ગુણા વા ।
તાં ત્વાં નમામિ સતતં કિલ ભાવયુક્તો
વાઞ્છામિ ભક્તિમચલાં ત્વયિ માતરં તુ ॥ ૫૧॥

સૂત ઉવાચ ।
ઇતિ સ્તુત્વા મહીપાલો જગામ શરણં તદા ।
પરિતુષ્ટા દદૌ દેવી તત્ર સાયુજ્યમાત્મનિ ॥ ૫૨॥

સુદ્યુમ્નસ્તુ તતઃ પ્રાપ પદં પરમકં સ્થિરમ્ ।
તસ્યા દેવ્યાઃ પ્રસાદેન મુનીનામપિ દુર્લભમ્ ॥ ૫૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે સુદ્યુમ્નસ્તુતિર્નામ દ્વાદશોઽધ્યાયઃ ॥ ૧.૧૨॥

## ૧.૧૩ ત્રયોદશોઽધ્યાયઃ । પુરૂરવસ ઉર્વશ્યાશ્ચ ચરિત્રવર્ણનમ્ ।

સૂત ઉવાચ ।
સુદ્યુને તુ દિવં યાતે રાજ્યં ચક્રે પુરૂરવાઃ ।
સગુણશ્ચ સુરૂપશ્ચ પ્રજારઞ્જનતત્પરઃ ॥ ૧॥

પ્રતિષ્ઠાને પુરે રમ્યે રાજ્યં સર્વનમસ્કૃતમ્ ।
ચકાર સર્વધર્મજ્ઞઃ પ્રજારક્ષણતત્પરઃ ॥ ૨॥

મન્ત્રઃ સુગુપ્તસ્તસ્યાસીત્પરત્રાભિજ્ઞતા તથા ।
સદૈવોત્સાહશક્તિશ્ચ પ્રભુશક્તિસ્તથોત્તમા ॥ ૩॥

સામદાનાદયઃ સર્વે વશગાસ્તસ્ય ભૂપતેઃ ।
વર્ણાશ્રમાન્સ્વધર્મસ્થાન્કુર્વન્ રાજ્યં શશાસ હ ॥ ૪॥

યજ્ઞાંશ્ચ વિવિધાંશ્ચક્રે સ રાજા બહુદક્ષિણાન્ ।
દાનાનિ ચ પવિત્રાણિ દદાવથ નરાધિપઃ ॥ ૫॥

તસ્ય રૂપગુણૌદાર્યશીલદ્રવિણવિક્રમાન્ ।
શ્રુત્વોર્વશી વશીભૂતા ચકમે તં નરાધિપમ્ ॥ ૬॥

બ્રહ્મશાપાભિતપ્તા સા માનુષં લોકમાસ્થિતા ।
ગુણિનં તં નૃપં મત્વા વરયામાસ માનિની ॥ ૭॥

સમયં ચેદૃશં કૃત્વા સ્થિતા તત્ર વરાઙ્ગના ।
એતાવુરણકૌ રાજન્ન્યસ્તૌ રક્ષસ્વ માનદ ॥ ૮॥

ઘૃતં મે ભક્ષણં નિત્યં નાન્યત્કિઞ્ચિન્નૃપાશનમ્ ।
નેક્ષે ત્વાં ચ મહારાજ નગ્નમન્યત્ર મૈથુનાત્ ॥ ૯॥

ભાષાબન્ધસ્ત્વયં રાજન્ યદિ ભગ્નો ભવિષ્યતિ ।
તદા ત્યક્ત્વા ગમિષ્યામિ સત્યમેતદ્બ્રવીમ્યહમ્ ॥ ૧૦॥

અઙ્ગીકૃતં ચ તદ્રાજ્ઞા કામિન્યા ભાષિતં તુ યત્ ।
સ્થિતા ભાષણબન્ધેન શાપાનુગહકામ્યયા ॥ ૧૧॥

રેમે તદા સ ભૂપાલો લીનો વર્ષગણાન્બહૂન્ ।
ધર્મકર્માદિકં ત્યક્ત્વા ચોર્વશ્યા મદમોહિતઃ ॥ ૧૨॥

એકચિત્તસ્તુ સઞ્જાતસ્તન્મનસ્કો મહીપતિઃ ।
ન શશાક તયા હીનઃ ક્ષણમપ્યતિમોહિતઃ ॥ ૧૩॥

એવં વર્ષગણાન્તે તુ સ્વર્ગસ્થઃ પાકશાસનઃ ।
ઉર્વશીં નાગતાં દૃષ્ટ્વા ગન્ધર્વાનાહ દેવરાટ્ ॥ ૧૪॥

ઉર્વશીમાનયધ્વં ભો ગન્ધર્વાઃ સર્વ એવ હિ ।
હૃત્વોરણૌ ગૃહાત્તસ્ય ભૂપતેઃ સમયે કિલ ॥ ૧૫॥

ઉર્વશીરહિતં સ્થાનં મદીયં નાતિશોભતે ।
યેન કેનાપ્યુપાયેન તામાનયત કામિનીમ્ ॥ ૧૬॥

ઇત્યુક્તાસ્તેઽથ ગન્ધર્વા વિશ્વાવસુપુરોગમાઃ ।
તતો ગત્વા મહાગાઢે તમસિ પ્રત્યુપસ્થિતે ॥ ૧૭॥

જહ્રુસ્તાવુરણૌ દેવા રમમાણં વિલોક્ય તમ્ ।
ચક્રન્દતુસ્તદા તૌ તુ હ્રિયમાણૌ વિહાયસા ॥ ૧૮॥

ઉર્વશી તદુપાકર્ણ્ય ક્રન્દિતં સુતયોરિવ ।
કુપિતોવાચ રાજાનં સમયોઽયં કૃતો મયા ॥ ૧૯॥

નષ્ટાહં તવ વિશ્વાસાદ્ધૃતૌ ચોરૈર્મમોરણૌ ।
રાજન્પુત્રસમાવેતૌ ત્વં કિં શેષે સ્ત્રિયા સમઃ ॥ ૨૦॥

હતાસ્મ્યહં કુનાથેન નપુંસા વીરમાનિના ।
ઉરણૌ મે ગતૌ ચાદ્ય સદા પ્રાણપ્રિયૌ મમ ॥ ૨૧॥

એવં વિલપ્યમાનાં તાં દૃષ્ટ્વા રાજા વિમોહિતઃ ।
નગ્ન એવ યયૌ તૂર્ણં પૃષ્ઠતઃ પૃથિવીપતિઃ ॥ ૨૨॥

વિદ્યુત્પ્રકાશિતા તત્ર ગન્ધર્વૈર્નૃપવેશ્મનિ ।
નગ્નભૂતસ્તયા દૃષ્ટો ભૂપતિર્ગન્તુકામયા ॥ ૨૩॥

ત્યક્ત્વોરણૌ ગતાઃ સર્વે ગન્ધર્વાઃ પથિ પાર્થિવઃ ।
નગ્નો જગ્રાહ તૌ શ્રાન્તો જગામ સ્વગૃહં પ્રતિ ॥ ૨૪॥

તદોર્વશીં ગતાં દૃષ્ટ્વા વિલલાપાતિદુઃખિતઃ ।
નગ્નં વીક્ષ્ય પતિં નારી ગતા સા વરવર્ણિની ॥ ૨૫॥

ક્રન્દન્સ દેશદેશેષુ બભ્રામ નૃપતિઃ સ્વયમ્ ।
તચ્ચિત્તો વિહ્વલઃ શોચન્વિવશઃ કામમોહિતઃ ॥ ૨૬॥

ભ્રમન્વૈ સકલાં પૃથ્વીં કુરુક્ષેત્રે દદર્શ તામ્ ।
દૃષ્ટ્વા સંહૃષ્ટવદનઃ પ્રાહ સૂક્તં નૃપોત્તમઃ ॥ ૨૭॥

અયે જાયે તિષ્ઠ તિષ્ઠ ઘોરે ન ત્યક્તુમર્હસિ ।
માં ત્વં ત્વન્મનસં કાન્તં વશગં ચાપ્યનાગસમ્ ॥ ૨૮॥

સ દેહોઽયં પતત્યત્ર દેવિ દૂરં હૃતસ્ત્વયા ।
ખાદન્ત્યેનં વૃકાઃ કાકાસ્ત્વયા ત્યક્તં વરોરુ યત્ ॥ ૨૯॥

એવં વિલપમાનં તં રાજાનં પ્રાહ ચોર્વશી ।
દુઃખિતં કૃપણં શ્રાન્તં કામાર્તં વિવશં ભૃશમ્ ॥ ૩૦॥

ઉર્વશ્યુવાચ ।
મૂર્ખોઽસિ નૃપશાર્દૂલ જ્ઞાનં કુત્ર ગતં તવ ।
ક્વાપિ સખ્યં ન ચ સ્ત્રીણાં વૃકાણામિવ પાર્થિવ ॥ ૩૧॥

ન વિશ્વાસો હિ કર્તવ્યઃ સ્ત્રીષુ ચૌરેષુ પાર્થિવૈઃ ।
ગૃહં ગચ્છ સુખં ભુઙ્ક્ષ્વ મા વિષાદે મનઃ કૃથાઃ ॥ ૩૨॥

ઇત્યેવં બોધિતો રાજા ન વિવેદાતિમોહિતઃ ।
દુઃખં ચ પરમં પ્રાપ્તઃ સ્વૈરિણીસ્નેહયન્ત્રિતઃ ॥ ૩૩॥

સૂત ઉવાચ ।
ઇતિ સર્વં સમાખ્યાતમુર્વશીચરિતં મહત્ ।
વેદે વિસ્તરિતં ચૈતત્સઙ્ક્ષેપાત્કથિતં મયા ॥ ૩૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં પ્રથમસ્કન્ધે
પુરૂરવસ ઉર્વશ્યાશ્ચ ચરિત્રવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧.૧૩॥

# ૧.૧૪ ચતુર્દશોઽધ્યાયઃ । વ્યાસેન ગૃહસ્થધર્મવર્ણનમ્ ।

સૂત ઉવાચ ।
દૃષ્ટ્વા તામસિતાપાઙ્ગીં વ્યાસશ્ચિન્તાપરોઽભવત્ ।
કિં કરોમિ ન મે યોગ્યા દેવકન્યેયમપ્સરાઃ ॥ ૧॥

એવં ચિન્તયમાનં તુ દૃષ્ટ્વા વ્યાસં તદાપ્સરાઃ ।
ભયભીતા હિ સઞ્જાતા શાપં મા વિસૃજેદયમ્ ॥ ૨॥

સા કૃત્વાથ શુકીરૂપં નિર્ગતા ભયવિહ્વલા ।
કૃષ્ણસ્તુ વિસ્મયં પ્રાપ્તો વિહઙ્ગીં તાં વિલોકયન્ ॥ ૩॥

કામસ્તુ દેહે વ્યાસસ્ય દર્શનાદેવ સઙ્ગતઃ ।
મનોઽતિવિસ્મિતં જાતં સર્વગાત્રેષુ વિસ્મિતઃ ॥ ૪॥

સ તુ ધૈર્યેણ મહતા નિગૃહ્ણન્માનસં મુનિઃ ।
ન શશાક નિયન્તું ચ સ વ્યાસઃ પ્રસૃતં મનઃ ॥ ૫॥

બહુશો ગૃહ્યમાણં ચ ઘૃતાચ્યા મોહિતં મનઃ ।
ભાવિત્વાન્નૈવ વિધૃતં વ્યાસસ્યામિતતેજસઃ ॥ ૬॥

મન્થનં કુર્વતસ્તસ્ય મુનેરગ્નિચિકીર્ષયા ।
અરણ્યામેવ સહસા તસ્ય શુક્રમથાપતત્ ॥ ૭॥

સોઽવિચિન્ત્ય તથા પાતં મમન્થારણિમેવ ચ ।
તસ્માચ્છુકઃ સમુદ્ભૂતો વ્યાસાકૃતિમનોહરઃ ॥ ૮॥

વિસ્મયં જનયન્બાલઃ સઞ્જાતસ્તદરણ્યજઃ ।
યથાધ્વરે સમિદ્ધોઽગ્નિર્ભાતિ હવ્યેન દીપ્તિમાન્ ॥ ૯॥

વ્યાસસ્તુ સુતમાલોક્ય વિસ્મયં પરમં ગતઃ ।
કિમેતદિતિ સઞ્ચિન્ત્ય વરદાનાચ્છિવસ્ય વૈ ॥ ૧૦॥

તેજોરૂપી શુકો જાતોઽપ્યરણીગર્ભસમ્ભવઃ ।
દ્વિતીયોઽગ્નિરિવાત્યર્થં દીપ્યમાનઃ સ્વતેજસા ॥ ૧૧॥

વિલોકયામાસ તદા વ્યાસસ્તુ મુદિતં સુતમ્ ।
દિવ્યેન તેજસા યુક્તં ગાર્હપત્યમિવાપરમ્ ॥ ૧૨॥

ગઙ્ગાન્તઃ સ્નાપયામાસ સમાગત્ય ગિરેસ્તદા ।
પુષ્પવૃષ્ટિસ્તુ ખાજ્જાતા શિશોરુપરિ તાપસાઃ ॥ ૧૩॥

જાતકર્માદિકં ચક્રે વ્યાસસ્તસ્ય મહાત્મનઃ ।
દેવદુન્દુભયો નેદુર્નનૃતુશ્ચાપ્સરોગણાઃ ॥ ૧૪॥

જગુર્ગન્ધર્વપતયો મુદિતાસ્તે દિદૃક્ષવઃ ।
વિશ્વાવસુર્નારદશ્ચ તુમ્બુરુઃ શુકસમ્ભવે ॥ ૧૫॥

તુષ્ટુવુર્મુદિતાઃ સર્વે દેવા વિદ્યાધરાસ્તથા ।
દૃષ્ટ્વા વ્યાસસુતં દિવ્યમરણીગર્ભસમ્ભવમ્ ॥ ૧૬॥

અન્તરિક્ષાત્પપાતોર્વ્યાં દણ્ડઃ કૃષ્ણાજિનં શુભમ્ ।
કમણ્ડલુસ્તથા દિવ્યઃ શુકસ્યાર્થે દ્વિજોત્તમાઃ ॥ ૧૭॥

સદ્યઃ સ વવૃધે બાલો જાતમાત્રોઽતિદીપ્તિમાન્ ।
તસ્યોપનયનં ચક્રે વ્યાસો વિદ્યાવિધાનવિત્ ॥ ૧૮॥

ઉત્પન્નમાત્રં તં વેદાઃ સરહસ્યાઃ સસઙ્ગ્રહાઃ ।
ઉપતસ્થુર્મહાત્માનં યથાસ્ય પિતરં તથા ॥ ૧૯॥

યતો દૃષ્ટં શુકીરૂપં ઘૃતાચ્યાઃ સમ્ભવે તદા ।
શુકેતિ નામ પુત્રસ્ય ચકાર મુનિસત્તમઃ ॥ ૨૦॥

બૃહસ્પતિમુપાધ્યાયં કૃત્વા વ્યાસસુતસ્તદા ।
વ્રતાનિ બ્રહ્મચર્યસ્ય ચકાર વિધિપૂર્વકમ્ ॥ ૨૧॥

સોઽધીત્ય નિખિલાન્વેદાન્ સરહસ્યાન્સસઙ્ગ્રહાન્ ।
ધર્મશાસ્ત્રાણિ સર્વાણિ કૃત્વા ગુરુકુલે શુકઃ ॥ ૨૨॥

ગુરવે દક્ષિણાં દત્ત્વા સમાવૃત્તો મુનિસ્તદા ।
આજગામ પિતુઃ પાર્શ્વં કૃષ્ણદ્વૈપાયનસ્ય ચ ॥ ૨૩॥

દૃષ્ટ્વા વ્યાસઃ શુકં પ્રાપ્તં પ્રેમ્ણોત્થાય સસમ્ભ્રમઃ ।
આલિલિઙ્ગ મુહુર્ઘ્રાણં મૂર્ધ્નિ તસ્ય ચકાર હ ॥ ૨૪॥

પપ્રચ્છ કુશલં વ્યાસસ્તથા ચાધ્યયનં શુચિ ।
આશ્વાસ્ય સ્થાપયામાસ શુકં તત્રાશ્રમે શુભે ॥ ૨૫॥

દારકર્મ તતો વ્યાસઃ શુકસ્ય પર્યચિન્તયત્ ।
કન્યાં મુનિસુતાં કાન્તામપૃચ્છદતિવેગવાન્ ॥ ૨૬॥

શુકં પ્રાહ સુતં વ્યાસો વેદોઽધીતસ્ત્વયાનઘ ।

ધર્મશાસ્ત્રાણિ સર્વાણિ કુરુ ભાર્યાં મહામતે ॥ ૨૭॥

ગાર્હસ્થ્યં ચ સમાસાદ્ય યજ દેવાન્પિતૄનથ ।
ઋણાન્મોચય માં પુત્ર પ્રાપ્ય દારાન્મનોરમાન્ ॥ ૨૮॥

અપુત્રસ્ય ગતિર્નાસ્તિ સ્વર્ગો નૈવ ચ નૈવ ચ ।
તસ્માત્પુત્ર મહાભાગ કુરુષ્વાદ્ય ગૃહાશ્રમમ્ ॥ ૨૯॥

કૃત્વા ગૃહાશ્રમં પુત્ર સુખિનં કુરુ માં શુક ।
આશા મે મહતી પુત્ર પૂરયસ્વ મહામતે ॥ ૩૦॥

તપસ્તપ્ત્વા મહાઘોરં પ્રાપ્તોઽસિ ત્વમયોનિજઃ ।
દેવરૂપી મહાપ્રાજ્ઞ પાહિ માં પિતરં શુક ॥ ૩૧॥

સૂત ઉવાચ ।
ઇતિ વાદિનમભ્યાશે પ્રાપ્તઃ પ્રાહ શુકસ્તદા ।
વિરક્તઃ સોઽતિરક્તં તં સાક્ષાત્પિતરમાત્મનઃ ॥ ૩૨॥

શુક ઉવાચ ।
કિં ત્વં વદસિ ધર્મજ્ઞ વેદવ્યાસ મહામતે ।
તત્ત્વેન શાધિ શિષ્યં માં ત્વદાજ્ઞાં કરવાણ્યલમ્ ॥ ૩૩॥

વ્યાસ ઉવાચ ।
ત્વદર્થે યત્તપસ્તપ્તં મયા પુત્ર શતં સમાઃ ।
પ્રાપ્તસ્ત્વં ચાતિદુઃખેન શિવસ્યારાધનેન ચ ॥ ૩૪॥

દદામિ તવ વિત્તં તુ પ્રાર્થયિત્વાથ ભૂપતિમ્ ।
સુખં ભુઙ્ક્ષ્વ મહાપ્રાજ્ઞ પ્રાપ્ય યૌવનમુત્તમમ્ ॥ ૩૫॥

શુક ઉવાચ ।
કિં સુખં માનુષે લોકે બ્રૂહિ તાત નિરામયમ્ ।
દુઃખવિદ્ધં સુખં પ્રાજ્ઞા ન વદન્તિ સુખં કિલ ॥ ૩૬॥

સ્ત્રિયં કૃત્વા મહાભાગ ભવામિ તદ્વશાનુગઃ ।
સુખં કિં પરતન્ત્રસ્ય સ્ત્રીજિતસ્ય વિશેષતઃ ॥ ૩૭॥

કદાચિદપિ મુચ્યેત લોહકાષ્ઠાદિયન્ત્રિતઃ ।
પુત્રદારૈર્નિબદ્ધસ્તુ ન વિમુચ્યેત કર્હિચિત્ ॥ ૩૮॥

વિણ્મૂત્રસમ્ભવો દેહો નારીણાં તન્મયસ્તથા ।

કઃ પ્રીતિં તત્ર વિપ્રેન્દ્ર વિબુધઃ કર્તુમિચ્છતિ ॥ ૩૯॥

અયોનિજોઽહં વિપ્રર્ષે યોનૌ મે કીદૃશી મતિઃ ।
ન વાઞ્છામ્યહમગ્રેઽપિ યોનાવેવ સમુદ્ભવમ્ ॥ ૪૦॥

વિટ્સુખં કિમુ વાઞ્છામિ ત્યક્ત્વાઽઽત્મસુખમદ્ભુતમ્ ।
આત્મારામશ્ચ ભૂયોઽપિ ન ભવત્યતિલોલુપઃ ॥ ૪૧॥

પ્રથમં પઠિતા વેદા મયા વિસ્તારિતાશ્ચ તે ।
હિંસામયાસ્તે પતિતાઃ કર્મમાર્ગપ્રવર્તકાઃ ॥ ૪૨॥

બૃહસ્પતિર્ગુરુઃ પ્રાપ્તઃ સોઽપિ મગ્નો ગૃહાર્ણવે ।
અવિદ્યાગ્રસ્તહૃદયઃ કથં તારયિતું ક્ષમઃ ॥ ૪૩॥

રોગગ્રસ્તો યથા વૈદ્યઃ પરરોગચિકિત્સકઃ ।
તથા ગુરુર્મુમુક્ષોર્મે ગૃહસ્થોઽયં વિડમ્બના ॥ ૪૪॥

કૃત્વા પ્રણામં ગુરવે ત્વત્સમીપમુપાગતઃ ।
ત્રાહિ માં તત્ત્વબોધેન ભીતં સંસારસર્પતઃ ॥ ૪૫॥

સંસારેઽસ્મિન્મહાઘોરે ભ્રમણં નભચક્રવત્ ।
ન ચ વિશ્રમણં ક્વાપિ સૂર્યસ્યેવ દિવાનિશિ ॥ ૪૬॥

કિં સુખં તાત સંસારે નિજતત્ત્વવિચારણાત્ ।
મૂઢાનાં સુખબુદ્ધિસ્તુ વિટ્સુ કીટસુખં યથા ॥ ૪૭॥

અધીત્ય વેદશાસ્ત્રાણિ સંસારે રાગિણશ્ચ યે ।
તેભ્યઃ પરો ન મૂર્ખોઽસ્તિ સધર્મા શ્વાશ્વસૂકરૈઃ ॥ ૪૮॥

માનુષ્યં દુર્લભં પ્રાપ્ય વેદશાસ્ત્રાણ્યધીત્ય ચ ।
બધ્યતે યદિ સંસારે કો વિમુચ્યેત માનવઃ ॥ ૪૯॥

નાતઃ પરતરં લોકે ક્વચિદાશ્ચર્યમદ્ભુતમ્ ।
પુત્રદારગૃહાસક્તઃ પણ્ડિતઃ પરિગીયતે ॥ ૫૦॥

ન બાધ્યતે યઃ સંસારે નરો માયાગુણૈસ્ત્રિભિઃ ।
સ વિદ્વાન્સ ચ મેધાવી શાસ્ત્રપારં ગતો હિ સઃ ॥ ૫૧॥

કિં વૃથાધ્યયનેનાત્ર દૃઢબન્ધકરેણ ચ ।
પઠિતવ્યં તદેવાશુ મોચયેદ્ભવબન્ધનાત્ ॥ ૫૨॥

ગૃહ્ણાતિ પુરુષં યસ્માદ્ગૃહં તેન પ્રકીર્તિતમ્ ।
ક્વ સુખં બન્ધનાગારે તેન ભીતોઽસ્મ્યહં પિતઃ ॥ ૫૩॥

યેઽબુધા મન્દમતયો વિધિના મુષિતાશ્ચ યે ।
તે પ્રાપ્ય માનુષં જન્મ પુનર્બન્ધં વિશન્ત્યુત ॥ ૫૪॥

વ્યાસ ઉવાચ ।
ન ગૃહં બન્ધનાગારં બન્ધને ન ચ કારણમ્ ।
મનસા યો વિનિર્મુક્તો ગૃહસ્થોઽપિ વિમુચ્યતે ॥ ૫૫॥

ન્યાયાગતધનઃ કુર્વન્વેદોક્તં વિધિવત્ક્રમાત્ ।
ગૃહસ્થોઽપિ વિમુચ્યેત શ્રાદ્ધકૃત્સત્યવાક્ શુચિઃ ॥ ૫૬॥

બ્રહ્મચારી યતિશ્ચૈવ વાનપ્રસ્થો વ્રતસ્થિતઃ ।
ગૃહસ્થં સમુપાસન્તે મધ્યાહ્નાતિક્રમે સદા ॥ ૫૭॥

શ્રદ્ધયા ચાન્નદાનેન વાચા સૂનૃતયા તથા ।
ઉપકુર્વન્તિ ધર્મસ્થા ગૃહાશ્રમનિવાસિનઃ ॥ ૫૮॥

ગૃહાશ્રમાત્પરો ધર્મો ન દૃષ્ટો ન ચ વૈ શ્રુતઃ ।
વસિષ્ઠાદિભિરાચાર્યૈર્જ્ઞાનિભિઃ સમુપાશ્રિતઃ ॥ ૫૯॥

કિમસાધ્યં મહાભાગ વેદોક્તાનિ ચ કુર્વતઃ ।
સ્વર્ગં મોક્ષં ચ સજ્જન્મ યદ્યદ્વાઞ્છતિ તદ્ભવેત્ ॥ ૬૦॥

આશ્રમાદાશ્રમં ગચ્છેદિતિ ધર્મવિદો વિદુઃ ।
તસ્માદગ્નિં સમાધાય કુરુ કર્માણ્યતન્દ્રિતઃ ॥ ૬૧॥

દેવાન્પિતૄન્મનુષ્યાંશ્ચ સન્તર્પ્ય વિધિવત્સુત ।
પુત્રમુત્પાદ્ય ધર્મજ્ઞ સંયોજ્ય ચ ગૃહાશ્રમે ॥ ૬૨॥

ત્યક્ત્વાગૃહં વનં ગત્વા કર્તાસિ વ્રતમુત્તમમ્ ।
વાનપ્રસ્થાશ્રમં કૃત્વા સંન્યાસં ચ તતઃ પરમ્ ॥ ૬૩॥

ઇન્દ્રિયાણિ મહાભાગ માદકાનિ સુનિશ્ચિતમ્ ।
અદારસ્ય દુરન્તાનિ પઞ્ચૈવ મનસા સહ ॥ ૬૪॥

તસ્માદ્દારાન્પ્રકુર્વીત તજ્જયાય મહામતે ।
વાર્ધકે તપ આતિષ્ઠેદિતિ શાસ્ત્રોદિતં વચઃ ॥ ૬૫॥

વિશ્વામિત્રો મહાભાગ તપઃ કૃત્વાતિદુશ્ચરમ્ ।

ત્રીણિ વર્ષસહસ્રાણિ નિરાહારો જિતેન્દ્રિયઃ ॥ ૬૬॥

મોહિતશ્ચ મહાતેજા વને મેનકયા સ્થિતઃ ।
શકુન્તલા સમુત્પન્ના પુત્રી તદ્વીર્યજા શુભા ॥ ૬૭॥

દૃષ્ટ્વા દાશસુતાં કાલીં પિતા મમ પરાશરઃ ।
કામબાણાર્દિતઃ કન્યાં તાં જગ્રાહોડુપે સ્થિતઃ ॥ ૬૮॥

બ્રહ્માપિ સ્વસુતાં દૃષ્ટ્વા પઞ્ચબાણપ્રપીડિતઃ ।
ધાવમાનશ્ચ રુદ્રેણ મૂર્ચ્છિતશ્ચ નિવારિતઃ ॥ ૬૯॥

તસ્માત્ત્વમપિ કલ્યાણ કુરુ મે વચનં હિતમ્ ।
કુલજાં કન્યકાં વૃત્વા વેદમાર્ગં સમાશ્રય ॥ ૭૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં પ્રથમસ્કન્ધે
વ્યાસેન ગૃહસ્થધર્મવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧.૧૪॥

## ૧.૧૫ પઞ્ચદશોઽધ્યાયઃ । શુકવૈરાગ્યવર્ણનમ્ ।

શ્રીશુક ઉવાચ ।
નાહં ગૃહં કરિષ્યામિ દુઃખદં સર્વદા પિતઃ ।
વાગુરાસદૃશં નિત્યં બન્ધનં સર્વદેહિનામ્ ॥ ૧॥

ધનચિન્તાતુરાણાં હિ ક્વ સુખં તાત દૃશ્યતે ।
સ્વજનૈઃ ખલુ પીડ્યન્તે નિર્ધના લોલુપા જનાઃ ॥ ૨॥

ઇન્દ્રોઽપિ ન સુખી તાદૃગ્યાદૃશો ભિક્ષુનિઃસ્પૃહઃ ।
કોઽન્યઃ સ્યાદિહ સંસારે ત્રિલોકીવિભવે સતિ ॥ ૩॥

તપન્તં તાપસં દૃષ્ટ્વા મઘવા દુઃખિતોઽભવત્ ।
વિઘ્નાન્બહુવિધાનસ્ય કરોતિ ચ દિવસ્પતિઃ ॥ ૪॥

બ્રહ્માપિ ન સુખી વિષ્ણુર્લક્ષ્મીં પ્રાપ્ય મનોરમામ્ ।
ખેદં પ્રાપ્નોતિ સતતં સઙ્ગ્રામૈરસુરૈઃ સહ ॥ ૫॥

કરોતિ વિપુલાન્યત્નાંસ્તપશ્ચરતિ દુશ્ચરમ્ ।
રમાપતિરપિ શ્રીમાન્કસ્યાસ્તિ વિપુલં સુખમ્ ॥ ૬॥

શઙ્કરોઽપિ સદા દુઃખી ભવત્યેવ ચ વેદ્મ્યહમ્ ।
તપશ્ચર્યાં પ્રકુર્વાણો દૈત્યયુદ્ધકરઃ સદા ॥ ૭॥

કદાચિન્ન સુખી શેતે ધનવાનપિ લોલુપઃ ।
નિર્ધનસ્તુ કથં તાત સુખં પ્રાપ્નોતિ માનવઃ ॥ ૮॥

જાનન્નપિ મહાભાગ પુત્રં વા વીર્યસમ્ભવમ્ ।
નિયોક્ષ્યસિ મહાઘોરે સંસારે દુઃખદે સદા ॥ ૯॥

જન્મદુઃખં જરાદુઃખં દુઃખં ચ મરણે તથા ।
ગર્ભવાસે પુનર્દુઃખં વિષ્ઠામૂત્રમયે પિતઃ ॥ ૧૦॥

તસ્માદતિશયં દુઃખં તૃષ્ણાલોભસમુદ્ભવમ્ ।
યાચ્ઞાયાં પરમં દુઃખં મરણાદપિ માનદ ॥ ૧૧॥

પ્રતિગ્રહધના વિપ્રા ન બુદ્ધિબલજીવનાઃ ।
પરાશા પરમં દુઃખં મરણં ચ દિને દિને ॥ ૧૨॥

પઠિત્વા સકલાન્ વેદાઞ્છાસ્ત્રાણિ ચ સમન્તતઃ ।
ગત્વા ચ ધનિનાં કાર્યા સ્તુતિઃ સર્વાત્મના બુધૈઃ ॥ ૧૩॥

એકોદરસ્ય કા ચિન્તા પત્રમૂલફલાદિભિઃ ।
યેનકેનાપ્યુપાયેન સન્તુષ્ટ્યા ચ પ્રપૂર્યતે ॥ ૧૪॥

ભાર્યા પુત્રાસ્તથા પૌત્રાઃ કુટુમ્બે વિપુલે સતિ ।
પૂરણાર્થં મહદ્દુઃખં ક્વ સુખં પિતરદ્ભુતમ્ ॥ ૧૫॥

યોગશાસ્ત્રં વદ મમ જ્ઞાનશાસ્ત્રં સુખાકરમ્ ।
કર્મકાણ્ડેઽખિલે તાત ન રમેઽહં કદાચન ॥ ૧૬॥

વદ કર્મક્ષયોપાયં પ્રારબ્ધં સઞ્ચિતં તથા ।
વર્તમાનં યથા નશ્યેત્ ત્રિવિધં કર્મમૂલજમ્ ॥ ૧૭॥

જલૂકેવ સદા નારી રુધિરં પિબતીતિ વૈ ।
મૂર્ખસ્તુ ન વિજાનાતિ મોહિતો ભાવચેષ્ટિતૈઃ ॥ ૧૮॥

ભોગૈર્વીર્યં ધનં પૂર્ણં મનઃ કુટિલભાષણૈઃ ।
કાન્તા હરતિ સર્વસ્વં કઃ સ્તેનસ્તાદૃશોઽપરઃ ॥ ૧૯॥

નિદ્રાસુખવિનાશાર્થં મૂર્ખસ્તુ દારસઙ્ગ્રહમ્ ।
કરોતિ વઞ્ચિતો ધાત્રા દુઃખાય ન સુખાય ચ ॥ ૨૦॥

સૂત ઉવાચ ।

એવંવિધાનિ વાક્યાનિ શ્રુત્વા વ્યાસઃ શુકસ્ય ચ ।
સમ્પ્રાપ મહતીં ચિન્તાં કિં કરોમીત્યસંશયમ્ ॥ ૨૧॥

તસ્ય સુસ્રુવુરશ્રૂણિ લોચનાદુઃખજાનિ ચ ।
વેપથુશ્ચ શરીરેઽભૂદ્ગ્લાનિં પ્રાપ મનસ્તથા ॥ ૨૨॥

શોચન્તં પિતરં દૃષ્ટ્વા દીનં શોકપરિપ્લુતમ્ ।
ઉવાચ પિતરં વ્યાસં વિસ્મયોત્ફુલ્લલોચનઃ ॥ ૨૩॥

અહો માયાબલં ચોગ્રં યન્મોહયતિ પણ્ડિતમ્ ।
વેદાન્તસ્ય ચ કર્તારં સર્વજ્ઞં વેદસમ્મિતમ્ ॥ ૨૪॥

ન જાને કા ચ સા માયા કિંસ્વિત્સાતીવ દુષ્કરા ।
યા મોહયતિ વિદ્વાંસં વ્યાસં સત્યવતીસુતમ્ ॥ ૨૫॥

પુરાણાનાં ચ વક્તા ચ નિર્માતા ભારતસ્ય ચ ।
વિભાગકર્તા વેદાનાં સોઽપિ મોહમુપાગતઃ ॥ ૨૬॥

તાં યામિ શરણં દેવીં યા મોહયતિ વૈ જગત્ ।
બ્રહ્મવિષ્ણુહરાદીંશ્ચ કથાન્યેષાં ચ કીદૃશી ॥ ૨૭॥

કોઽપ્યસ્તિ ત્રિષુ લોકેષુ યો ન મુહ્યતિ માયયા ।
યન્મોહં ગમિતાઃ પૂર્વે બ્રહ્મવિષ્ણુહરાદયઃ ॥ ૨૮॥

અહો બલમહો વીર્યં દેવ્યા ખલુ વિનિર્મિતમ્ ।
માયયૈવ વશં નીતઃ સર્વજ્ઞ ઈશ્વરઃ પ્રભુઃ ॥ ૨૯॥

વિષ્ણ્વંશસમ્ભવો વ્યાસ ઇતિ પૌરાણિકા જગુઃ ।
સોઽપિ મોહાર્ણવે મગ્નો ભગ્નપોતો વણિગ્યથા ॥ ૩૦॥

અશ્રુપાતં કરોત્યદ્ય વિવશઃ પ્રાકૃતો યથા ।
અહો માયાબલં ચૈતદ્દુસ્ત્યજં પણ્ડિતૈરપિ ॥ ૩૧॥

કોઽયં કોઽહં કથં ચેહ કીદૃશોઽયં ભ્રમઃ કિલ ।
પઞ્ચભૂતાત્મકે દેહે પિતાપુત્રેતિ વાસના ॥ ૩૨॥

બલિષ્ઠા ખલુ માયેયં માયિનામપિ મોહિની ।
યયાભિભૂતઃ કૃષ્ણોઽપિ કરોતિ રોદનં દ્વિજઃ ॥ ૩૩॥

સૂત ઉવાચ ।
તાં નત્વા મનસા દેવીં સર્વકારણકારણામ્ ।

જનનીં સર્વદેવાનાં બ્રહ્માદીનાં તથેશ્વરીમ્ ॥ ૩૪॥

પિતરં પ્રાહ દીનં તં શોકાર્ણવપરિપ્લુતમ્ ।
અરણીસમ્ભવો વ્યાસં હેતુમદ્વચનં શુભમ્ ॥ ૩૫॥

પારાશર્ય મહાભાગ સર્વેષાં બોધદઃ સ્વયમ્ ।
કિં શોકં કુરુષે સ્વામિન્યથાજ્ઞઃ પ્રાકૃતો નરઃ ॥ ૩૬॥

અદ્યાહં તવ પુત્રોઽસ્મિ ન જાને પૂર્વજન્મનિ ।
કોઽહં કસ્ત્વં મહાભાગ વિભ્રમોઽયં મહાત્મનિ ॥ ૩૭॥

કુરુ ધૈર્યં પ્રબુધ્યસ્વ મા વિષાદે મનઃ કૃથાઃ ।
મોહજાલમિમં મત્વા મુઞ્ચ શોકં મહામતે ॥ ૩૮॥

ક્ષુધાનિવૃત્તિર્ભક્ષ્યેણ ન પુત્રદર્શનેન ચ ।
પિપાસા જલપાનેન યાતિ નૈવાત્મજેક્ષણાત્ ॥ ૩૯॥

ઘ્રાણં સુખં સુગન્ધેન કર્ણજં શ્રવણેન ચ ।
સ્ત્રીસુખં તુ સ્ત્રિયા નૂનં પુત્રોઽહં કિં કરોમિ તે ॥ ૪૦॥

અજીગર્તેન પુત્રોઽપિ હરિશ્ચન્દ્રાય ભૂભુજે ।
પશુકામાય યજ્ઞાર્થે દત્તો મૌલ્યેન સર્વથા ॥ ૪૧॥

સુખાનાં સાધનં દ્રવ્યં ધનાત્સુખસમુચ્ચયઃ ।
ધનમર્જય લોભશ્ચેત્પુત્રોઽહં કિં કરોમ્યહમ્ ॥ ૪૨॥

માં પ્રબોધય બુદ્ધ્યા ત્વં દૈવજ્ઞોઽસિ મહામતે ।
યથા મુચ્યેયમત્યન્તં ગર્ભવાસભયાન્મુને ॥ ૪૩॥

દુર્લભં માનુષં જન્મ કર્મભૂમાવિહાનઘ ।
તત્રાપિ બ્રાહ્મણત્વં વૈ દુર્લભં ચોત્તમે કુલે ॥ ૪૪॥

બદ્ધોઽહમિતિ મે બુદ્ધિર્નાપસર્પતિ ચિત્તતઃ ।
સંસારવાસનાજાલે નિવિષ્ટા વૃદ્ધિગામિની ॥ ૪૫॥

સૂત ઉવાચ ।
ઇત્યુક્તસ્તુ તદા વ્યાસઃ પુત્રેણામિતબુદ્ધિના ।
પ્રત્યુવાચ શુકં શાન્તં ચતુર્થાશ્રમમાનસમ્ ॥ ૪૬॥

વ્યાસ ઉવાચ ।
પઠ પુત્ર મહાભાગ મયા ભાગવતં કૃતમ્ ।

શુભં ન ચાતિવિસ્તીર્ણં પુરાણં બ્રહ્મસમ્મિતમ્ ॥ ૪૭॥

સ્કન્ધા દ્વાદશ તત્રૈવ પઞ્ચલક્ષણસંયુતમ્ ।
સર્વેષાં ચ પુરાણાનાં ભૂષણં મમ સમ્મતમ્ ॥ ૪૮॥

સદસજ્જ્ઞાનવિજ્ઞાનં શ્રુતમાત્રેણ જાયતે ।
યેન ભાગવતેનેહ તત્પઠ ત્વં મહામતે ॥ ૪૯॥

વટપત્રશયાનાય વિષ્ણવે બાલરૂપિણે ।
કેનાસ્મિ બાલભાવેન નિર્મિતોઽહં ચિદાત્મના ॥ ૫૦॥

કિમર્થં કેન દ્રવ્યેણ કથં જાનામિ ચાખિલમ્ ।
ઇત્યેવં ચિન્ત્યમાનાય મુકુન્દાય મહાત્મને ॥ ૫૧॥

શ્લોકાર્ધેન તયા પ્રોક્તં ભગવત્યાખિલાર્થદમ્ ।
સર્વં ખલ્વિદમેવાહં નાન્યદસ્તિ સનાતનમ્ ॥ ૫૨॥

તદ્વચો વિષ્ણુના પૂર્વં સંવિજ્ઞાતં મનસ્યપિ ।
કેનોક્તા વાગિયં સત્યા ચિન્તયામાસ ચેતસા ॥ ૫૩॥

કથં વેદ્મિ પ્રવક્તારં સ્ત્રીપુંસૌ વા નપુંસકમ્ ।
ઇતિ ચિન્તાપ્રપન્નેન ધૃતં ભાગવતં હૃદિ ॥ ૫૪॥

પુનઃ પુનઃ કૃતોચ્ચારસ્તસ્મિનેવાસ્તચેતસા ।
વટપત્રે શયાનઃ સન્નભૂચ્ચિન્તાસમન્વિતઃ ॥ ૫૫॥

તદા શાન્તા ભગવતી પ્રાદુરાસ ચતુર્ભુજા ।
શઙ્ખચક્રગદાપદ્મવરાયુધધરા શિવા ॥ ૫૬॥

દિવ્યામ્બરધરા દેવી દિવ્યભૂષણભૂષિતા ।
સંયુતા સદૃશીભિશ્ચ સખીભિઃ સ્વવિભૂતિભિઃ ॥ ૫૭॥

પ્રાદુર્બભૂવ તસ્યાગ્રે વિષ્ણોરમિતતેજસઃ ।
મન્દહાસ્યં પ્રયુઞ્જાના મહાલક્ષ્મીઃ શુભાનના ॥ ૫૮॥

સૂત ઉવાચ ।
તાં તથા સંસ્થિતાં દૃષ્ટ્વા હૃદયે કમલેક્ષણઃ ।
વિસ્મિતઃ સલિલે તસ્મિન્નિરાધારા મનોરમામ્ ॥ ૫૯॥

રતિર્ભૂતિસ્તથા બુદ્ધિર્મતિઃ કીર્તિઃ સ્મૃતિર્ધૃતિઃ ।
શ્રદ્ધા મેધા સ્વધા સ્વાહા ક્ષુધા નિદ્રા દયા ગતિઃ ॥ ૬૦॥

તુષ્ટિઃ પુષ્ટિઃ ક્ષમા લજ્જા જૃમ્ભા તન્દ્રા ચ શક્તયઃ ।
સંસ્થિતાઃ સર્વતઃ પાર્શ્વે મહાદેવ્યાઃ પૃથક્પૃથક્ ॥ ૬૧॥

વરાયુધધરાઃ સર્વા નાનાભૂષણભૂષિતાઃ ।
મન્દારમાલાકુલિતા મુક્તાહારવિરાજિતાઃ ॥ ૬૨॥

તાં દૃષ્ટ્વા તાશ્ચ સંવીક્ષ્ય તસ્મિન્નેકાર્ણવે જલે ।
વિસ્મયાવિષ્ટહૃદયઃ સમ્બભૂવ જનાર્દનઃ ॥ ૬૩॥

ચિન્તયામાસ સર્વાત્મા દૃષ્ટમાયોઽતિવિસ્મિતઃ ।
કુતો ભૂતાઃ સ્ત્રિયઃ સર્વાઃ કુતોઽહં વટતલ્પગઃ ॥ ૬૪॥

અસ્મિન્નેકાર્ણવે ઘોરે ન્યગ્રોધઃ કથમુત્થિતઃ ।
કેનાહં સ્થાપિતોઽસ્મ્યત્ર શિશું કૃત્વા શુભાકૃતિમ્ ॥ ૬૫॥

મમેયં જનની નો વા માયા વા કાપિ દુર્ઘટા ।
દર્શનં કેનચિત્ત્વદ્ય દત્તં વા કેન હેતુના ॥ ૬૬॥

કિં મયા ચાત્ર વક્તવ્યં ગન્તવ્યં વા ન વા ક્વચિત્ ।
મૌનમાસ્થાય તિષ્ઠેયં બાલભાવાદતન્દ્રિતઃ ॥ ૬૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે શુકવૈરાગ્યવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧.૧૫॥

## ૧.૧૬ ષોડશોઽધ્યાયઃ । વ્યાસોપદેશવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
દૃષ્ટ્વા તં વિસ્મિતં દેવં શયાનં વટપત્રકે ।
ઉવાચ સસ્મિતં વાક્યં વિષ્ણો કિં વિસ્મિતો હ્યસિ ॥ ૧॥

મહાશક્ત્યાઃ પ્રભાવેણ ત્વં માં વિસ્મૃતવાન્પુરા ।
પ્રભવે પ્રલયે જાતે ભૂત્વા ભૂત્વા પુનઃ પુનઃ ॥ ૨॥

નિર્ગુણા સા પરા શક્તિઃ સગુણસ્ત્વં તથાપ્યહમ્ ।
સાત્ત્વિકી કિલ યા શક્તિસ્તાં શક્તિં વિદ્ધિ મામિકામ્ ॥ ૩॥

ત્વન્નાભિકમલાદ્બ્રહ્મા ભવિષ્યતિ પ્રજાપતિઃ ।
સ કર્તા સર્વલોકસ્ય રજોગુણસમન્વિતઃ ॥ ૪॥

સ તદા તપ આસ્થાય પ્રાપ્ય શક્તિમનુત્તમામ્ ।
રજસા રક્તવર્ણઞ્ચ કરિષ્યતિ જગત્ત્રયમ્ ॥ ૫॥

સગુણાન્પઞ્ચભૂતાંશ્ચ સમુત્પાદ્ય મહામતિઃ ।
ઇન્દ્રિયાણીન્દ્રિયેશાંશ્ચ મનઃપૂર્વાન્સમન્તતઃ ॥ ૬॥

કરિષ્યતિ તતઃ સર્ગં તેન કર્તા સ ઉચ્યતે ।
વિશ્વસ્યાસ્ય મહાભાગ ત્વં વૈ પાલયિતા તથા ॥ ૭॥

તદ્ભ્રુવોર્મધ્યદેશાચ્ચ ક્રોધાદ્રુદ્રો ભવિષ્યતિ ।
તપઃ કૃત્વા મહાઘોરં પ્રાપ્ય શક્તિં તુ તામસીમ્ ॥ ૮॥

કલ્પાન્તે સોઽપિ સંહર્તા ભવિષ્યતિ મહામતે ।
તેનાહં ત્વામુપાયાતા સાત્ત્વિકીં ત્વમવેહિ મામ્ ॥ ૯॥

સ્થાસ્યેઽહં ત્વત્સમીપસ્થા સદાહં મધુસૂદન ।
હૃદયે તે કૃતાવાસા ભવામિ સતતં કિલ ॥ ૧૦॥

વિષ્ણુરુવાચ ।
શ્લોકસ્યાર્ધં મયા પૂર્વં શ્રુતં દેવિ સ્ફુટાક્ષરમ્ ।
તત્કેનોક્તં વરારોહે રહસ્યં પરમં શિવમ્ ॥ ૧૧॥

તન્મે બ્રૂહિ વરારોહે સંશયોઽયં વરાનને ।
નિર્ધનો હિ યથા દ્રવ્યં તત્સ્મરામિ પુનઃ પુનઃ ॥ ૧૨॥

વ્યાસ ઉવાચ ।
વિષ્ણોસ્તદ્વચનં શ્રુત્વા મહાલક્ષ્મીઃ સ્મિતાનના ।
ઉવાચ પરયા પ્રીત્યા વચનં ચારુહાસિની ॥ ૧૩॥

મહાલક્ષ્મીરુવાચ ।
શ‌ૃણુ શૌરે વચો મહ્યં સગુણાહં ચતુર્ભુજા ।
માં જાનાસિ ન જાનાસિ નિર્ગુણાં સગુણાલયામ્ ॥ ૧૪॥

ત્વં જાનીહિ મહાભાગ તયા તત્પ્રકટીકૃતમ્ ।
પુણ્યં ભાગવતં વિદ્ધિ વેદસારં શુભાવહમ્ ॥ ૧૫॥

કૃપાં ચ મહતીં મન્યે દેવ્યાઃ શત્રુનિષૂદન ।
યયા પ્રોક્તં પરં ગુહ્યં હિતાય તવ સુવ્રત ॥ ૧૬॥

રક્ષણીયં સદા ચિત્તે ન વિસ્માર્યં કદાચન ।

સારં હિ સર્વશાસ્ત્રાણાં મહાવિદ્યાપ્રકાશિતમ્ ॥ ૧૭॥

નાતઃ પરં વેદિતવ્યં વર્તતે ભુવનત્રયે ।
પ્રિયોઽસિ ખલુ દેવ્યાસ્ત્વં તેન તે વ્યાહૃતં વચઃ ॥ ૧૮॥

વ્યાસ ઉવાચ ।
ઇતિ શ્રુત્વા વચો દેવ્યા મહાલક્ષ્યાશ્ચતુર્ભુજઃ ।
દધાર હૃદયે નિત્યં મત્વા મન્ત્રમનુત્તમમ્ ॥ ૧૯॥

કાલેન કિયતા તત્ર તન્નાભિકમલોદ્ભવઃ ।
બ્રહ્મા દૈત્યભયાત્ત્રસ્તો જગામ શરણં હરેઃ ॥ ૨૦॥

તતઃ કૃત્વા મહાયુદ્ધં હત્વા તૌ મધુકૈટભૌ ।
જજાપ ભગવાન્વિષ્ણુઃ શ્લોકાર્ધં વિશદાક્ષરમ્ ॥ ૨૧॥

જપન્તં વાસુદેવં ચ દૃષ્ટ્વા દેવઃ પ્રજાપતિઃ ।
પપ્રચ્છ પરમપ્રીતઃ કઞ્જજઃ કમલાપતિમ્ ॥ ૨૨॥

કિં ત્વં જપસિ દેવેશ ત્વત્તઃ કોઽપ્યધિકોઽસ્તિ વૈ ।
યત્કૃત્વા પુણ્ડરીકાક્ષ પ્રીતોઽસિ જગદીશ્વર ॥ ૨૩॥

હરિરુવાચ ।
મયિ ત્વયિ ચ યા શક્તિઃ ક્રિયાકારણલક્ષણા ।
વિચારય મહાભાગ યા સા ભગવતી શિવા ॥ ૨૪॥

યસ્યાધારે જગત્સર્વં તિષ્ઠત્યત્ર મહાર્ણવે ।
સાકારા યા મહાશક્તિરમેયા ચ સનાતની ॥ ૨૫॥

યયા વિસૃજ્યતે વિશ્વં જગદેતચ્ચરાચરમ્ ।
સૈષા પ્રસન્ના વરદા નૃણાં ભવતિ મુક્તયે ॥ ૨૬॥

સા વિદ્યા પરમા મુક્તેર્હેતુભૂતા સનાતની ।
સંસારબન્ધહેતુશ્ચ સૈવ સર્વેશ્વરેશ્વરી ॥ ૨૭॥

અહં ત્વમખિલં વિશ્વં તસ્યાશ્ચિચ્છક્તિસમ્ભવમ્ ।
વિદ્ધિ બ્રહ્મન્ન સન્દેહઃ કર્તવ્યઃ સર્વદાનઘ ॥ ૨૮॥

શ્લોકાર્ધેન તયા પ્રોક્તં તદ્વૈ ભાગવતં કિલ ।
વિસ્તરો ભવિતા તસ્ય દ્વાપરાદૌ યુગે તથા ॥ ૨૯॥

વ્યાસ ઉવાચ ।

બ્રહ્મણા સઙ્ગૃહીતં ચ વિષ્ણોસ્તુ નાભિપઙ્કજે ।
નારદાય ચ તેનોક્તં પુત્રાયામિતબુદ્ધયે ॥ ૩૦॥

નારદેન તથા મહ્યં દત્તં હિ મુનિના પુરા ।
મયા કૃતમિદં પૂર્ણં દ્વાદશસ્કન્ધવિસ્તરમ્ ॥ ૩૧॥

તત્પઠસ્વ મહાભાગ પુરાણં બ્રહ્મસમ્મિતમ્ ।
પઞ્ચલક્ષણયુક્તં ચ દેવ્યાશ્ચરિતમુત્તમમ્ ॥ ૩૨॥

તત્ત્વજ્ઞાનરસોપેતં સર્વેષામુત્તમોત્તમમ્ ।
ધર્મશાસ્ત્રસમં પુણ્યં વેદાર્થેનોપબૃંહિતમ્ ॥ ૩૩॥

વૃત્રાસુરવધોપેતં નાનાખ્યાનકથાયુતમ્ ।
બ્રહ્મવિદ્યાનિધાનં તુ સંસારાર્ણવતારકમ્ ॥ ૩૪॥

ગૃહાણ ત્વં મહાભાગ યોગ્યોઽસિ મતિમત્તરઃ ।
પુણ્યં ભાગવતં નામ પુરાણં પુરુષર્ષભ ॥ ૩૫॥

અષ્ટાદશસહસ્રાણાં શ્લોકાનાં કુરુ સઙ્ગ્રહમ્ ।
અજ્ઞાનનાશનં દિવ્યં જ્ઞાનભાસ્કરબોધકમ્ ॥ ૩૬॥

સુખદં શાન્તિદં ધન્યં દીર્ઘાયુષ્યકરં શિવમ્ ।
શૃણ્વતાં પઠતાં ચેદં પુત્રપૌત્રવિવર્ધનમ્ ॥ ૩૭॥

શિષ્યોઽયં મમ ધર્માત્મા લોમહર્ષણસમ્ભવઃ ।
પઠિષ્યતિ ત્વયા સાર્ધં પુરાણીં સંહિતાં શુભામ્ ॥ ૩૮॥

સૂત ઉવાચ ।
ઇત્યુક્તં તેન પુત્રાય મહ્યં ચ કથિતં કિલ ।
મયા ગૃહીતં તત્સર્વં પુરાણં ચાતિવિસ્તરમ્ ॥ ૩૯॥

શુકોઽધીત્ય પુરાણં તુ સ્થિતો વ્યાસાશ્રમે શુભે ।
ન લેભે શર્મ ધર્માત્મા બ્રહ્માત્મજ ઇવાપરઃ ॥ ૪૦॥

એકાન્તસેવી વિકલઃ સ શૂન્ય ઇવ લક્ષ્યતે ।
નાત્યન્તભોજનાસક્તો નોપવાસરતસ્તથા ॥ ૪૧॥

ચિન્તાવિષ્ટં શુકં દૃષ્ટ્વા વ્યાસઃ પ્રાહ સુતં પ્રતિ ।
કિં પુત્ર ચિન્ત્યતે નિત્યં કસ્માદ્વ્યગ્રોઽસિ માનદ ॥ ૪૨॥

આસ્સે ધ્યાનપરો નિત્યમૃણગ્રસ્ત ઇવાધનઃ ।

કા ચિન્તા વર્તતે પુત્ર મયિ તાતે તુ તિષ્ઠતિ ॥ ૪૩॥

સુખં ભુઙ્ક્ષ્વ યથાકામં મુઞ્ચ શોકં મનોગતમ્ ।
જ્ઞાનં ચિન્તય શાસ્ત્રોક્તં વિજ્ઞાને ચ મતિં કુરુ ॥ ૪૪॥

ન ચેન્મનસિ તે શાન્તિર્વચસા મમ સુવ્રત ।
ગચ્છ ત્વં મિથિલાં પુત્ર પાલિતાં જનકેન હ ॥ ૪૫॥

સ તે મોહં મહાભાગ નાશયિષ્યતિ ભૂપતિઃ ।
જનકો નામ ધર્માત્મા વિદેહઃ સત્યસાગરઃ ॥ ૪૬॥

તં ગત્વા નૃપતિં પુત્ર સન્દેહં સ્વં નિવર્તય ।
વર્ણાશ્રમાણાં ધર્માંસ્ત્વં પૃચ્છ પુત્ર યથાતથમ્ ॥ ૪૭॥

જીવન્મુક્તઃ સ રાજર્ષિર્બ્રહ્મજ્ઞાનમતિઃ શુચિઃ ।
તથ્યવક્તાતિશાન્તશ્ચ યોગી યોગપ્રિયઃ સદા ॥ ૪૮॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય વ્યાસસ્યામિતતેજસઃ ।
પ્રત્યુવાચ મહાતેજાઃ શુકશ્ચારણિસમ્ભવઃ ॥ ૪૯॥

દમ્ભોઽયં કિલ ધર્માત્મન્ભાતિ ચિત્તે મમાધુના ।
જીવન્મુક્તો વિદેહશ્ચ રાજ્યં શાસ્તિ મુદાન્વિતઃ ॥ ૫૦॥

વન્ધ્યાપુત્ર ઇવાભાતિ રાજાસૌ જનકઃ પિતઃ ।
કુર્વન્ રાજ્યં વિદેહઃ કિં સન્દેહોઽયં મમાદ્ભુતઃ ॥ ૫૧॥

દ્રષ્ટુમિચ્છામ્યહં ભૂપં વિદેહં નૃપસત્તમમ્ ।
કથં તિષ્ઠતિ સંસારે પદ્મપત્રમિવામ્ભસિ ॥ ૫૨॥

સન્દેહોઽયં મહાંસ્તાત વિદેહે પરિવર્તતે ।
મોક્ષઃ કિં વદતાં શ્રેષ્ઠ સૌગતાનામિવાપરઃ ॥ ૫૩॥

કથં ભુક્તમભુક્તં સ્યાદકૃતં ચ કૃતં કથમ્ ।
વ્યવહારઃ કથં ત્યાજ્ય ઇન્દ્રિયાણાં મહામતે ॥ ૫૪॥

માતા પુત્રસ્તથા ભાર્યા ભગિની કુલટા તથા ।
ભેદાભેદઃ કથં ન સ્યાદ્યદ્યેતન્મુક્તતા કથમ્ ॥ ૫૫॥

કટુ ક્ષારં તથા તીક્ષ્ણાં કષાયં મિષ્ટમેવ ચ ।
રસના યદિ જાનાતિ ભુઙ્ક્તે ભોગાનનુત્તમાન્ ॥ ૫૬॥

શીતોષ્ણસુખદુઃખાદિપરિજ્ઞાનં યદા ભવેત્ ।
મુક્તતા કીદૃશી તાત સન્દેહોઽયં મમાદ્ભુતઃ ॥ ૫૭॥

શત્રુમિત્રપરિજ્ઞાનં વૈરં પ્રીતિકરં સદા ।
વ્યવહારે પરે તિષ્ઠન્કથં ન કુરુતે નૃપઃ ॥ ૫૮॥

ચૌરં વા તાપસં વાપિ સમાનં મન્યતે કથમ્ ।
અસમા યદિ બુદ્ધિઃ સ્યાન્મુક્તતા તર્હિ કીદૃશી ॥ ૫૯॥

દૃષ્ટપૂર્વો ન મે કશ્ચિજ્જીવન્મુક્તશ્ચ ભૂપતિઃ ।
શઙ્કેયં મહતી તાત ગૃહે મુક્તઃ કથં નૃપઃ ॥ ૬૦॥

દિદૃક્ષા મહતી જાતા શ્રુત્વા તં ભૂપતિં તથા ।
સન્દેહવિનિવૃત્ત્યર્થં ગચ્છામિ મિથિલાં પ્રતિ ॥ ૬૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે શુકં પ્રતિ વ્યાસોપદેશવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૧.૧૬॥

## ૧.૧૭ સપ્તદશોઽધ્યાયઃ । શુકસ્ય રાજમન્દિરપ્રવેશવર્ણનમ્ ।

સૂત ઉવાચ ।
ઇત્યુક્ત્વા પિતરં પુત્રઃ પાદયોઃ પતિતઃ શુકઃ ।
બદ્ધાઞ્જલિરુવાચેદં ગન્તુકામો મહામનાઃ ॥ ૧॥

આપૃચ્છે ત્વાં મહાભાગ ગ્રાહ્યં તે વચનં મયા ।
વિદેહાન્દ્રષ્ટુમિચ્છામિ પાલિતાઞ્જનકેન તુ ॥ ૨॥

વિના દણ્ડં કથં રાજ્યં કરોતિ જનકઃ કિલ ।
ધર્મે ન વર્તતે લોકો દણ્ડશ્ચેન્ન ભવેદ્યદિ ॥ ૩॥

ધર્મસ્ય કારણં દણ્ડો મન્વાદિપ્રહિતઃ સદા ।
સ કથં વર્તતે તાત સંશયોઽયં મહાન્મમ ॥ ૪॥

મમ માતા ત્વિયં વન્ધ્યા તદ્વદ્ભાતિ વિચેષ્ટિતમ્ ।
પૃચ્છામિ ત્વાં મહાભાગ ગચ્છામિ ચ પરન્તપ ॥ ૫॥

સૂત ઉવાચ ।
તં દૃષ્ટ્વા ગન્તુકામં ચ શુકં સત્યવતીસુતઃ ।

આલિઙ્ગ્યોવાચ પુત્રં તં જ્ઞાનિનં નિઃસ્પૃહં દૃઢમ્ ॥ ૬॥

વ્યાસ ઉવાચ ।
સ્વસ્ત્યસ્તુ શક દીર્ઘાયુર્ભવ પુત્ર મહામતે ।
સત્યાં વાચં પ્રદત્ત્વા મે ગચ્છ તાત યથાસુખમ્ ॥ ૭॥

આગન્તવ્યં પુનર્ગત્વા મમાશ્રમમનુત્તમમ્ ।
ન કુત્રાપિ ચ ગન્તવ્યં ત્વયા પુત્ર કથઞ્ચન ॥ ૮॥

સુખં જીવામિ પુત્રાહં દૃષ્ટ્વા તે મુખપઙ્કજમ્ ।
અપશ્યન્દુઃખમાપ્નોમિ પ્રાણસ્ત્વમસિ મે સુત ॥ ૯॥

દૃષ્ટ્વા ત્વં જનકં પુત્ર સન્દેહં વિનિવર્ત્ય ચ ।
અત્રાગત્ય સુખં તિષ્ઠ વેદાધ્યયનતત્પરઃ ॥ ૧૦॥

સૂત ઉવાચ ।
ઇત્યુક્તઃ સોઽભિવાદ્યાર્યં કૃત્વા ચૈવ પ્રદક્ષિણામ્ ।
ચલિતસ્તરસાતીવ ધનુર્મુક્તઃ શરો યથા ॥ ૧૧॥

સમ્પશ્યન્વિવિધાન્દેશાઁલ્લોકાંશ્ચ વિત્તધર્મિણઃ ।
વનાનિ પાદપાંશ્ચૈવ ક્ષેત્રાણિ ફલિતાનિ ચ ॥ ૧૨॥

તાપસાંસ્તપ્યમાનાંશ્ચ યાજકાન્દીક્ષયાન્વિતાન્ ।
યોગાભ્યાસરતાન્યોગિવાનપ્રસ્થાન્વનૌકસઃ ॥ ૧૩॥

શૈવાન્પાશુપતાંશ્ચૈવ સૌરાઞ્છાક્તાંશ્ચ વૈષ્ણવાન્ ।
વીક્ષ્ય નાનાવિધાન્ધર્માઞ્જગામાતિસ્મયન્મુનિઃ ॥ ૧૪॥

વર્ષદ્વયેન મેરું ચ સમુલ્લઙ્ઘ્ય મહામતિઃ ।
હિમાચલં ચ વર્ષેણ જગામ મિથિલાં પ્રતિ ॥ ૧૫॥

પ્રવિષ્ટો મિથિલાં મધ્યે પશ્યન્સર્વર્દ્ધિમુત્તમામ્ ।
પ્રજાશ્ચ સુખિતાઃ સર્વાઃ સદાચારાઃ સુસંસ્થિતાઃ ॥ ૧૬॥

ક્ષત્રા નિવારિતસ્તત્ર કસ્ત્વમત્ર સમાગતઃ ।
કિં તે કાર્યં વદસ્વેતિ પૃષ્ટસ્તેન ન ચાબ્રવીત્ ॥ ૧૭॥

નિઃસૃત્ય નગરદ્વારાત્સ્થિતઃ સ્થાણુરિવાચલઃ ।
વિસ્મિતોઽતિહસંસ્તસ્થૌ વચો નોવાચ કિઞ્ચન ॥ ૧૮॥

પ્રતીહાર ઉવાચ ।

બ્રૂહિ મૂકોઽસિ કિં બ્રહ્મન્કિમર્થં ત્વમિહાગતઃ ।
ચલનં ચ વિના કાર્યં ન ભવેદિતિ મે મતિઃ ॥ ૧૯॥

રાજાજ્ઞયા પ્રવેષ્ટવ્યં નગરેઽસ્મિન્સદા દ્વિજ ।
અજ્ઞાતકુલશીલસ્ય પ્રવેશો નાત્ર સર્વથા ॥ ૨૦॥

તેજસ્વી ભાસિ નૂનં ત્વં બ્રાહ્મણો વેદવિત્તમઃ ।
કુલં કાર્યં ચ મે બ્રૂહિ યથેષ્ટં ગચ્છ માનદ ॥ ૨૧॥

શુક ઉવાચ ।
યદર્થમાગતોઽસ્મ્યત્ર તત્પ્રાપ્તં વચનાત્તવ ।
વિદેહનગરં દ્રષ્ટું પ્રવેશો યત્ર દુર્લભઃ ॥ ૨૨॥

મોહોઽયં મમ દુર્બુદ્ધેઃ સમુલ્લઙ્ઘ્ય ગિરિદ્વયમ્ ।
રાજાનં દ્રષ્ટુકામોઽહં પર્યટન્સમુપાગતઃ ॥ ૨૩॥

વઞ્ચિતોઽહં સ્વયં પિત્રા દૂષણં કસ્ય દીયતે ।
ભ્રામિતોઽહં મહાભાગ કર્મણા વા મહીતલે ॥ ૨૪॥

ધનાશા પુરુષસ્યેહ પરિભ્રમણકારણમ્ ।
સા મે નાસ્તિ તથાપ્યત્ર સમ્પ્રાપ્તોઽસ્મિ ભ્રમાત્કિલ ॥ ૨૫॥

નિરાશસ્ય સુખં નિત્યં યદિ મોહે ન મજ્જતિ ।
નિરાશોઽહં મહાભાગ મગ્નોઽસ્મિન્મોહસાગરે ॥ ૨૬॥

ક્વ મેરુર્મિથિલા ક્વેયં પદ્ભ્યાં ચ સમુપાગતઃ ।
પરિશ્રમફલં કિં મે વઞ્ચિતો વિધિના કિલ ॥ ૨૭॥

પ્રારબ્ધં કિલ ભોક્તવ્યં શુભં વાપ્યથવાશુભમ્ ।
ઉદ્યમસ્તદ્વશે નિત્યં કારયત્યેવ સર્વથા ॥ ૨૮॥

ન તીર્થં ન ચ વેદોઽત્ર યદર્થમિહ મે શ્રમઃ ।
અપ્રવેશઃ પુરે જાતો વિદેહો નામ ભૂપતિઃ ॥ ૨૯॥

ઇત્યુક્ત્વા વિરરામાશુ મૌનીભૂત ઇવ સ્થિતઃ ।
જ્ઞાતો હિ પ્રતિહારેણ જ્ઞાની કશ્ચિદ્દ્વિજોત્તમઃ ॥ ૩૦॥

સામપૂર્વમુવાચાસૌ તં ક્ષત્તા સંસ્થિતં મુનિમ્ ।
ગચ્છ ભો યત્ર તે કાર્યં યથેષ્ટં દ્વિજસત્તમ ॥ ૩૧॥

અપરાધો મમ બ્રહ્મન્યન્નિવારિતવાનહમ્ ।

તત્ક્ષન્તવ્યં મહાભાગ વિમુક્તાનાં ક્ષમા બલમ્ ॥ ૩૨॥

શુક ઉવાચ ।
કિં તેऽત્ર દૂષણં ક્ષત્તઃ પરતન્ત્રોऽસિ સર્વદા ।
પ્રભુકાર્યં પ્રકર્તવ્યં સેવકેન યથોચિતમ્ ॥ ૩૩॥

ન ભૂપદૂષણં ચાત્ર યદહં રક્ષિતસ્ત્વયા ।
ચોરશત્રુપરિજ્ઞાનં કર્તવ્યં સર્વથા બુધૈઃ ॥ ૩૪॥

મમૈવ સર્વથા દોષો યદહં સમુપાગતઃ ।
ગમનં પરગેહે યલ્લઘુતાયાશ્ચ કારણમ્ ॥ ૩૫॥

પ્રતીહાર ઉવાચ ।
કિં સુખં દ્વિજ કિં દુઃખં કિં કાર્યં શુભમિચ્છતા ।
કઃ શત્રુર્હિતકર્તા કો બ્રૂહિ સર્વં મમાદ્ય વૈ ॥ ૩૬॥

શુક ઉવાચ ।
દ્વૈવિધ્યં સર્વલોકેષુ સર્વત્ર દ્વિવિધો જનઃ ।
રાગી ચૈવ વિરાગી ચ તયોશ્ચિત્તં દ્વિધા પુનઃ ॥ ૩૭॥

વિરાગી ત્રિવિધઃ કામં જ્ઞાતોऽજ્ઞાતશ્ચ મધ્યમઃ ।
રાગી ચ દ્વિવિધઃ પ્રોક્તો મૂર્ખશ્ચ ચતુરસ્તથા ॥ ૩૮॥

ચાતુર્યં દ્વિવિધં પ્રોક્તં શાસ્ત્રજં મતિજં તથા ।
મતિસ્તુ દ્વિવિધા લોકે યુક્તાયુક્તેતિ સર્વથા ॥ ૩૯॥

પ્રતીહાર ઉવાચ ।
યદુક્તં ભવતા વિદ્વન્નાર્થજ્ઞોऽહં દ્વિજોત્તમ ।
તત્સર્વં વિસ્તરેણાદ્ય યથાર્થં વદ સત્તમ ॥ ૪૦॥

શુક ઉવાચ ।
રાગો યસ્યાસ્તિ સંસારે સ રાગીત્યુચ્યતે ધ્રુવમ્ ।
દુઃખં બહુવિધં તસ્ય સુખં ચ વિવિધં પુનઃ ॥ ૪૧॥

ધનં પ્રાપ્ય સુતાન્દારાન્માનં ચ વિજયં તથા ।
તદપ્રાપ્ય મહદ્દુઃખં ભવત્યેવ ક્ષણે ક્ષણે ॥ ૪૨॥

કાર્યસ્તસ્ય સુખોપાયઃ કર્તવ્યં સુખસાધનમ્ ।
તસ્યારાતિઃ સ વિજ્ઞેયઃ સુખવિઘ્નં કરોતિ યઃ ॥ ૪૩॥

સુખોત્પાદયિતા મિત્રં રાગયુક્તસ્ય સર્વદા ।
ચતુરો નૈવ મુહ્યેત મૂર્ખઃ સર્વત્ર મુહ્યતિ ॥ ૪૪॥

વિરક્તસ્યાત્મરક્તસ્ય સુખમેકાન્તસેવનમ્ ।
આત્માનુચિન્તનં ચૈવ વેદાન્તસ્ય ચ ચિન્તનમ્ ॥ ૪૫॥

દુઃખં તદેતત્સર્વં હિ સંસારકથનાદિકમ્ ।
શત્રવો બહવસ્તસ્ય વિજ્ઞસ્ય શુભમિચ્છતઃ ॥ ૪૬॥

કામઃ ક્રોધઃ પ્રમાદશ્ચ શત્રવો વિવિધાઃ સ્મૃતાઃ ।
બન્ધુઃ સન્તોષ એવાસ્ય નાન્યોઽસ્તિ ભુવનત્રયે ॥ ૪૭॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય મત્વા તં જ્ઞાનિનં દ્વિજમ્ ।
ક્ષત્તા પ્રવેશયામાસ કક્ષાં ચાતિમનોરમામ્ ॥ ૪૮॥

નગરં વીક્ષમાણઃ સંસ્ત્રૈવિધ્યજનસઙ્કુલમ્ ।
નાનાવિપણિદ્રવ્યાઢ્યં ક્રયવિક્રયકારકમ્ ॥ ૪૯॥

રાગદ્વેષયુતં કામલોભમોહાકુલં તથા ।
વિવદત્સુજનાકીર્ણં વસુપૂર્ણં મહત્તરમ્ ॥ ૫૦॥

પશ્યન્સ ત્રિવિધાઁલ્લોકાન્પ્રાસરદ્રાજમન્દિરમ્ ।
પ્રાપ્તઃ પરમતેજસ્વી દ્વિતીય ઇવ ભાસ્કરઃ ॥ ૫૧॥

નિવારિતશ્ચ તત્રૈવ પ્રતીહારેણ કાષ્ઠવત્ ।
તત્રૈવ ચ સ્થિતો દ્વારિ મોક્ષમેવાનુચિન્તયન્ ॥ ૫૨॥

છાયાયામાતપે ચૈવ સમદર્શી મહાતપાઃ ।
ધ્યાનં કૃત્વા તથૈકાન્તે સ્થિતઃ સ્થાણુરિવાચલઃ ॥ ૫૩॥

તં મુહૂર્તાદુપાગત્ય રાજ્ઞોઽમાત્યઃ કૃતાઞ્જલિઃ ।
પ્રાવેશયત્તતઃ કક્ષાં દ્વિતીયાં રાજવેશ્મનઃ ॥ ૫૪॥

તત્ર દિવ્યં મનોરમ્યં પુષ્પિતં દિવ્યપાદપમ્ ।
તદ્વનં દર્શયિત્વા તુ કૃત્વા ચાતિથિસત્ક્રિયામ્ ॥ ૫૫॥

વારમુખ્યાઃ સ્ત્રિયસ્તત્ર રાજસેવાપરાયણાઃ ।
ગીતવાદિત્રકુશલાઃ કામશાસ્ત્રવિશારદાઃ ॥ ૫૬॥

તા આદિશ્ય ચ સેવાર્થં શુકસ્ય મન્ત્રિસત્તમઃ ।

નિર્ગતઃ સદનાત્તસ્માદ્વ્યાસપુત્રઃ સ્થિતસ્તદા ॥ ૫૭॥

પૂજિતઃ પરયા ભક્ત્યા તાભિઃ સ્ત્રીભિર્યથાવિધિ ।
દેશકાલોપપન્નેન નાનાન્નેનાતિતોષિતઃ ॥ ૫૮॥

તતોઽન્તઃપુરવાસિન્યસ્તસ્યાન્તઃપુરકાનનમ્ ।
રમ્યં સન્દર્શયામાસુરઙ્ગનાઃ કામમોહિતાઃ ॥ ૫૯॥

સ યુવા રૂપવાન્કાન્તો મૃદુભાષી મનોરમઃ ।
દૃષ્ટ્વા તા મુમુહુઃ સર્વાસ્તં ચ કામમિવાપરમ્ ॥ ૬૦॥

જિતેન્દ્રિયં મુનિં મત્ત્વા સર્વાઃ પર્યચરંસ્તદા ।
આરણેયસ્તુ શુદ્ધાત્મા માતૃભાવમકલ્પયત્ ॥ ૬૧॥

આત્મારામો જિતક્રોધો ન હૃષ્યતિ ન તપ્યતિ ।
પશ્યંસ્તાસાં વિકારાંશ્ચ સ્વસ્થ એવ સ તસ્થિવાન્ ॥ ૬૨॥

તસ્મૈ શય્યાં સુરમ્યાં ચ દદુર્નાર્યઃ સુસંસ્કૃતામ્ ।
પરાર્ધ્યાસ્તરણોપેતાં નાનોપસ્કરસંવૃતામ્ ॥ ૬૩॥

સ કૃત્વા પાદશૌચં ચ કુશપાણિરતન્દ્રિતઃ ।
ઉપાસ્ય પશ્ચિમાં સન્ધ્યાં ધ્યાનમેવાન્વપદ્યત ॥ ૬૪॥

યામમેકં સ્થિતો ધ્યાને સુષ્વાપ તદનન્તરમ્ ।
સુપ્ત્વા યામદ્વયં તત્ર ચોદતિષ્ઠત્તતઃ શુકઃ ॥ ૬૫॥

પાશ્ચાત્યં યામિનીયામં ધ્યાનમેવાન્વપદ્યત ।
સ્નાત્વા પ્રાતઃક્રિયાઃ કૃત્વા પુનરાસ્તે સમાહિતઃ ॥ ૬૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે શુકસ્ય રાજમન્દિરપ્રવેશવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૧.૧૭॥

## ૧.૧૮ અષ્ટાદશોઽધ્યાયઃ । જનકોપદેશવર્ણનમ્ ।

સૂત ઉવાચ ।
શ્રુત્વા તમાગતં રાજા મન્ત્રિભિઃ સહિતઃ શુચિઃ ।
પુરઃ પુરોહિતં કૃત્વા ગુરુપુત્રં સમભ્યગાત્ ॥ ૧॥

કૃત્વાર્હણાં નૃપઃ સમ્યગ્દત્ત્વાસનમનુત્તમમ્ ।
પપ્રચ્છ કુશલં ગાં ચ વિનિવેદ્ય પયસ્વિનીમ્ ॥ ૨॥

સ ચ તાં નૃપપૂજાં વૈ પ્રત્યગૃહ્ણાદ્યથાવિધિ ।
પપ્રચ્છ કુશલં રાજ્ઞે સ્વં નિવેદ્ય નિરામયમ્ ॥ ૩॥

કૃત્વા કુશલસમ્પ્રશ્નમુપવિષ્ટં સુખાસને ।
શુક વ્યાસસુતં શાન્તં પર્યપૃચ્છત પાર્થિવઃ ॥ ૪॥

કિં નિમિત્તં મહાભાગ નિઃસ્પૃહસ્ય ચ માં પ્રતિ ।
જાતં હ્યાગમનં બ્રૂહિ કાર્યં તન્મુનિસત્તમ ॥ ૫॥

શુક ઉવાચ ।
વ્યાસેનોક્તો મહારાજ કુરુ દારપરિગ્રહમ્ ।
સર્વેષામાશ્રમાણાં ચ ગૃહસ્થાશ્રમ ઉત્તમઃ ॥ ૬॥

મયા નાઙ્ગીકૃતં વાક્યં મત્ત્વા બન્ધં ગુરોરપિ ।
ન બન્ધોઽસ્તીતિ તેનોક્તો નાહં તત્કૃતવાન્પુનઃ ॥ ૭॥

ઇતિ સન્દિગ્ધમનસં મત્વા સ મુનિસત્તમઃ ।
ઉવાચ વચનં તથ્યં મિથિલાં ગચ્છ મા શુચઃ ॥ ૮॥

યાજ્યોઽસ્તિ જનકસ્તત્ર જીવન્મુક્તો નરાધિપઃ ।
વિદેહો લોકવિદિતઃ પાતિ રાજ્યમકણ્ટકમ્ ॥ ૯॥

કુર્વન્ રાજ્યં તથા રાજા માયાપાશૈર્ન બધ્યતે ।
ત્વં બિભેષિ કથં પુત્ર વનવૃત્તિઃ પરન્તપ ॥ ૧૦॥

પશ્ય તં નૃપશાર્દૂલં ત્યજ મોહં મનોગતમ્ ।
કુરુ દારાન્મહાભાગ પૃચ્છ વા ભૂપતિં ચ તમ્ ॥ ૧૧॥

સન્દેહં તે મનોજાતં કથયિષ્યતિ પાર્થિવઃ ।
તચ્છ્રુત્વા વચનં તસ્ય મામેહિ તરસા સુત ॥ ૧૨॥

સમ્પ્રાપ્તોઽહં મહારાજ ત્વત્પુરે ચ તદાજ્ઞયા ।
મોક્ષકામોઽસ્મિ રાજેન્દ્ર બ્રૂહિ કૃત્યં મમાનઘ ॥ ૧૩॥

તપસ્તીર્થવ્રતેજ્યાશ્ચ સ્વાધ્યાયસ્તીર્થસેવનમ્ ।
જ્ઞાનં વા વદ રાજેન્દ્ર મોક્ષં પ્રતિ ચ કારણમ્ ॥ ૧૪॥

જનક ઉવાચ ।
શ઼ૃણુ વિપ્રેણ કર્તવ્યં મોક્ષમાર્ગાશ્રિતેન યત્ ।

ઉપનીતો વસેદાદૌ વેદાભ્યાસાય વૈ ગુરૌ ॥ ૧૫॥

અધીત્ય વેદવેદાન્તાન્દત્ત્વા ચ ગુરુદક્ષિણામ્ ।
સમાવૃત્તસ્તુ ગાર્હસ્થ્યે સદારો નિવસેન્મુનિઃ ॥ ૧૬॥

ન્યાયવૃત્તિસ્તુ સન્તોષી નિરાશી ગતકલ્મષઃ ।
અગ્નિહોત્રાદિકર્માણિ કુર્વાણઃ સત્યવાક્શુચિઃ ॥ ૧૭॥

પુત્રં પૌત્રં સમાસાદ્ય વાનપ્રસ્થાશ્રમે વસેત્ ।
તપસા ષડ્રિપૂઞ્જિત્વા ભાર્યાં પુત્રે નિવેશ્ય ચ ॥ ૧૮॥

સર્વાનગ્નીન્યથાન્યાયમાત્મન્યારોપ્ય ધર્મવિત્ ।
વસેત્તુર્યાશ્રમે શ્રાન્તઃ શુદ્ધે વૈરાગ્યસમ્ભવે ॥ ૧૯॥

વિરક્તસ્યાધિકારોઽસ્તિ સંન્યાસે નાન્યથા ક્વચિત્ ।
વેદવાક્યમિદં તથ્યં નાન્યથેતિ મતિર્મમ ॥ ૨૦॥

શુકાષ્ટચત્વારિંશદ્વૈ સંસ્કારા વેદબોધિતાઃ ।
ચત્વારિંશદ્ગૃહસ્થસ્ય પ્રોક્તાસ્તત્ર મહાત્મભિઃ ॥ ૨૧॥

અષ્ટૌ ચ મુક્તિકામસ્ય પ્રોક્તાઃ શમદમાદયઃ ।
આશ્રમાદાશ્રમં ગચ્છેદિતિ શિષ્ટાનુશાસનમ્ ॥ ૨૨॥

શુક ઉવાચ ।
ઉત્પન્ને હૃદિ વૈરાગ્યે જ્ઞાનવિજ્ઞાનસમ્ભવે ।
અવશ્યમેવ વસ્તવ્યમાશ્રમેષુ વનેષુ વા ॥ ૨૩॥

જનક ઉવાચ ।
ઇન્દ્રિયાણિ બલિષ્ઠાનિ ન નિયુક્તાનિ માનદ ।
અપક્વસ્ય પ્રકુર્વન્તિ વિકારાંસ્તાનનેકશઃ ॥ ૨૪॥

ભોજનેચ્છાં સુખેચ્છાં ચ શય્યેચ્છામાત્મજસ્ય ચ ।
યતી ભૂત્વા કથં કુર્યાદ્વિકારે સમુપસ્થિતે ॥ ૨૫॥

દુર્જરં વાસનાજાલં ન શાન્તિમુપયાતિ વૈ ।
અતસ્તચ્છમનાર્થાય ક્રમેણ ચ પરિત્યજેત્ ॥ ૨૬॥

ઊર્ધ્વં સુપ્તઃ પતત્યેવ ન શયાનઃ પતત્યધઃ ।
પરિવ્રજ્ય પરિભ્રષ્ટો ન માર્ગં લભતે પુનઃ ॥ ૨૭॥

યથા પિપીલિકા મૂલાચ્છાખાયામધિરોહતિ ।

શનૈઃ શનૈઃ ફલં યાતિ સુખેન પદગામિની ॥ ૨૮॥

વિહઙ્ગસ્તરસા યાતિ વિઘ્નશઙ્કામુદસ્ય વૈ ।
શ્રાન્તો ભવતિ વિશ્રમ્ય સુખં યાતિ પિપીલિકા ॥ ૨૯॥

મનસ્તુ પ્રબલં કામમજેયમકૃતાત્મભિઃ ।
અતઃ ક્રમેણ જેતવ્યમાશ્રમાનુક્રમેણ ચ ॥ ૩૦॥

ગૃહસ્થાશ્રમસંસ્થોઽપિ શાન્તઃ સુમતિરાત્મવાન્ ।
ન ચ હૃષ્યેન્ન ચ તપેલ્લાભાલાભે સમો ભવેત્ ॥ ૩૧॥

વિહતં કર્મ કુર્વાણસ્ત્યજંશ્ચિન્તાન્વિતં ચ યત્ ।
આત્મલાભેન સન્તુષ્ટો મુચ્યતે નાત્ર સંશયઃ ॥ ૩૨॥

પશ્યાહં રાજ્યસંસ્થોઽપિ જીવન્મુક્તો યથાનઘ ।
વિચરામિ યથાકામં ન મે કિઞ્ચિત્પ્રજાયતે ॥ ૩૩॥

ભુઞ્જાનો વિવિધાન્ભોગાન્કુર્વન્કાર્યાણ્યનેકશઃ ।
ભવિષ્યામિ યથાહં ત્વં તથા મુક્તો ભવાનઘ ॥ ૩૪॥

કથ્યતે ખલુ યદ્દૃશ્યમદૃશ્યં બધ્યતે કુતઃ ।
દૃશ્યાનિ પઞ્ચભૂતાનિ ગુણાસ્તેષાં તથા પુનઃ ॥ ૩૫॥

આત્મા ગમ્યોઽનુમાનેન પ્રત્યક્ષો ન કદાચન ।
સ કથં બધ્યતે બ્રહ્મન્નિર્વિકારો નિરઞ્જનઃ ॥ ૩૬॥

મનસ્તુ સુખદુઃખાનાં મહતાં કારણં દ્વિજ ।
જાતે તુ નિર્મલે હ્યસ્મિન્સર્વં ભવતિ નિર્મલમ્ ॥ ૩૭॥

ભ્રમન્સર્વેષુ તીર્થેષુ સ્નાત્વા સ્નાત્વા પુનઃ પુનઃ ।
નિર્મલં ન મનો યાવત્તાવત્સર્વં નિરર્થકમ્ ॥ ૩૮॥

ન દેહો ન ચ જીવાત્મા નેન્દ્રિયાણિ પરન્તપ ।
મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ॥ ૩૯॥

શુદ્ધો મુક્તઃ સદૈવાત્મા ન વૈ બધ્યેત કર્હિચિત્ ।
બન્ધમોક્ષૌ મનઃસંસ્થૌ તસ્મિઞ્છાન્તે પ્રશામ્યતિ ॥ ૪૦॥

શત્રુર્મિત્રમુદાસીનો ભેદાઃ સર્વે મનોગતાઃ ।
એકાત્મત્વે કથં ભેદઃ સમ્ભવેદ્દ્વૈતદર્શનાત્ ॥ ૪૧॥

જીવો બ્રહ્મ સદૈવાહં નાત્ર કાર્યા વિચારણા ।
ભેદબુદ્ધિસ્તુ સંસારે વર્તમાના પ્રવર્તતે ॥ ૪૨॥

અવિદ્યેયં મહાભાગ વિદ્યા ચૈતન્નિવર્તનમ્ ।
વિદ્યાવિદ્યે ચ વિજ્ઞેયે સર્વદૈવ વિચક્ષણૈઃ ॥ ૪૩॥

વિનાતપં હિ છાયાયા જ્ઞાયતે ચ કથં સુખમ્ ।
અવિદ્યયા વિના તદ્વત્કથં વિદ્યાં ચ વેત્તિ વૈ ॥ ૪૪॥

ગુણા ગુણેષુ વર્તન્તે ભૂતાનિ ચ તથૈવ ચ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થેષુ કો દોષસ્તત્ર ચાત્મનઃ ॥ ૪૫॥

મર્યાદા સર્વરક્ષાર્થં કૃતા વેદેષુ સર્વશઃ ।
અન્યથા ધર્મનાશઃ સ્યાત્સૌગતાનામિવાનઘ ॥ ૪૬॥

ધર્મનાશે વિનષ્ટઃ સ્યાદ્વર્ણાચારોઽતિવર્તિતઃ ।
અતો વેદપ્રદિષ્ટેન માર્ગેણ ગચ્છતાં શુભમ્ ॥ ૪૭॥

શુક ઉવાચ ।
સન્દેહો વર્તતે રાજન્ન નિવર્તતિ મે ક્વચિત્ ।
ભવતા કથિતં યત્તચ્છૃણ્વતો મે નરાધિપ ॥ ૪૮॥

વેદધર્મેષુ હિંસા સ્યાદધર્મબહુલા હિ સા ।
કથં મુક્તિપ્રદો ધર્મો વેદોક્તો બત ભૂપતે ॥ ૪૯॥

પ્રત્યક્ષેણ ત્વનાચારઃ સોમપાનં નરાધિપ ।
પશૂનાં હિંસનં તદ્વદ્ભક્ષણં ચામિષસ્ય ચ ॥ ૫૦॥

સૌત્રામણૌ તથા પ્રોક્તઃ પ્રત્યક્ષેણ સુરાગ્રહઃ ।
દ્યૂતક્રીડા તથા પ્રોક્તા વ્રતાનિ વિવિધાનિ ચ ॥ ૫૧॥

શ્રૂયતે સ્મ પુરા હ્યાસીચ્છશબિન્દુર્નૃપોત્તમઃ ।
યજ્વા ધર્મપરો નિત્યં વદાન્યઃ સત્યસાગરઃ ॥ ૫૨॥

ગોપ્તા ચ ધર્મસેતૂનાં શાસ્તા ચોત્પથગામિનામ્ ।
યજ્ઞાશ્ચ વિહિતાસ્તેન બહવો ભૂરિદક્ષિણાઃ ॥ ૫૩॥

ચર્મણાં પર્વતો જાતો વિન્ધ્યાચલસમઃ પુનઃ ।
મેઘામ્બુપ્લાવનાજ્જાતા નદી ચર્મણ્વતી શુભા ॥ ૫૪॥

સોઽપિ રાજા દિવં યાતઃ કીર્તિરસ્યાચલા ભુવિ ।

એવં ધર્મેષુ વેદેષુ ન મે બુદ્ધિઃ પ્રવર્તતે ॥ ૫૫॥

સ્ત્રીસઙ્ગેન સદા ભોગે સુખમાપ્નોતિ માનવઃ ।
અલાભે દુઃખમત્યન્તં જીવન્મુક્તઃ કથં ભવેત્ ॥ ૫૬॥

જનક ઉવાચ ।
હિંસા યજ્ઞેષુ પ્રત્યક્ષા સાહિંસા પરિકીર્તિતા ।
ઉપાધિયોગતો હિંસા નાન્યથેતિ વિનિર્ણયઃ ॥ ૫૭॥

યથા ચેન્ધનસંયોગાદગ્નૌ ધૂમઃ પ્રવર્તતે ।
તદ્વિયોગાત્તથા તસ્મિન્નિર્ધૂમત્વં વિભાતિ વૈ ॥ ૫૮॥

અહિંસાં ચ તથા વિદ્ધિ વેદોક્તાં મુનિસત્તમ ।
રાગિણાં સાપિ હિંસૈવ નિઃસ્પૃહાણાં ન સા મતા ॥ ૫૯॥

અરાગેણ ચ યત્કર્મ તથાહઙ્કારવર્જિતમ્ ।
અકૃતં વેદવિદ્વાંસઃ પ્રવદન્તિ મનીષિણઃ ॥ ૬૦॥

ગૃહસ્થાનાં તુ હિંસૈવ યા યજ્ઞે દ્વિજસત્તમ ।
અરાગેણ ચ યત્કર્મ તથાહઙ્કારવર્જિતમ્ ॥ ૬૧॥

સાહિંસૈવ મહાભાગ મુમુક્ષૂણાં જિતાત્મનામ્ ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે શુકાય જનકોપદેશવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૧.૧૮॥

## ૧.૧૯ એકોનવિંશોઽધ્યાયઃ । શુકસ્ય વિવાહાદિકાર્યવર્ણનમ્ ।

શુક ઉવાચ ।
સન્દેહોઽયં મહારાજ વર્તતે હૃદયે મમ ।
માયામધ્યે વર્તમાનઃ સ કથં નિઃસ્પૃહો ભવેત્ ॥ ૧॥

શાસ્ત્રજ્ઞાનં ચ સમ્પ્રાપ્ય નિત્યાનિત્યવિચારણમ્ ।
ત્યજતે ન મનો મોહં સ કથં મુચ્યતે નરઃ ॥ ૨॥

અન્તર્ગતં તમશ્છેત્તું શાસ્ત્રાદ્બોધો હિ ન ક્ષમઃ ।
યથા ન નશ્યતિ તમઃ કૃતયા દીપવાર્તયા ॥ ૩॥

અદ્રોહઃ સર્વભૂતેષુ કર્તવ્યઃ સર્વદા બુધૈઃ ।
સ કથં રાજશાર્દૂલ ગૃહસ્થસ્ય ભવેત્તથા ॥ ૪॥

વિત્તૈષણા ન તે શાન્તા તથા રાજ્યસુખૈષણા ।
જયૈષણા ચ સઙ્ગ્રામે જીવન્મુક્તઃ કથં ભવેઃ ॥ ૫॥

ચૌરેષુ ચૌરબુદ્ધિસ્તુ સાધુબુદ્ધિસ્તુ તાપસે ।
સ્વપરત્વં તવાપ્યસ્તિ વિદેહસ્ત્વં કથં નૃપ ॥ ૬॥

કટુતીક્ષ્ણકષાયામ્લરસાન્વેત્સિ શુભાશુભાન્ ।
શુભેષુ રમતે ચિત્તં નાશુભેષુ તથા નૃપ ॥ ૭॥

જાગ્રત્સ્વપ્નસુષુપ્તિશ્ચ તવ રાજન્ ભવન્તિ હિ ।
અવસ્થાસ્તુ યથાકાલં તુરીયા તુ કથં નૃપ ॥ ૮॥

પદાત્યશ્વરથેભાશ્ચ સર્વે વૈ વશગા મમ ।
સ્વામ્યહં ચૈવ સર્વેષાં મન્યસે ત્વં ન મન્યસે ॥ ૯॥

મિષ્ટમત્સિ સદા રાજન્મુદિતો વિમનાસ્તથા ।
માલાયાં ચ તથા સર્પે સમદૃક્ ક્વ નૃપોત્તમ ॥ ૧૦॥

વિમુક્તસ્તુ ભવેદ્રાજન્ સમલોષ્ટાશ્મકાઞ્ચનઃ ।
એકાત્મબુદ્ધિઃ સર્વત્ર હિતકૃત્સર્વજન્તુષુ ॥ ૧૧॥

ન મેઽદ્ય રમતે ચિત્તં ગૃહદારાદિષુ ક્વચિત્ ।
એકાકી નિઃસ્પૃહોઽત્યર્થં ચરેયમિતિ મે મતિઃ ॥ ૧૨॥

નિઃસઙ્ગો નિર્મમઃ શાન્તઃ પત્રમૂલફલાશનઃ ।
મૃગવદ્વિચરિષ્યામિ નિર્દ્વન્દ્વો નિષ્પરિગ્રહઃ ॥ ૧૩॥

કિં મે ગૃહેણ વિત્તેન ભાર્યયા ચ સુરૂપયા ।
વિરાગમનસઃ કામં ગુણાતીતસ્ય પાર્થિવ ॥ ૧૪॥

ચિન્ત્યસે વિવિધાકારં નાનારાગસમાકુલમ્ ।
દમ્ભોઽયં કિલ તે ભાતિ વિમુક્તોઽસ્મીતિ ભાષસે ॥ ૧૫॥

કદાચિચ્છત્રુજા ચિન્તા ધનજા ચ કદાચન ।
કદાચિત્સૈન્યજા ચિન્તા નિશ્ચિન્તોઽસિ કદા નૃપ ॥ ૧૬॥

વૈખાનસા યે મુનયો મિતાહારા જિતવ્રતાઃ ।
તેઽપિ મુહ્યન્તિ સંસારે જાનન્તોઽપિ હ્યસત્યતામ્ ॥ ૧૭॥

તવ વંશસમુત્થાનાં વિદેહા ઇતિ ભૂપતે ।

કુટિલં નામ જાનીહિ નાન્યથેતિ કદાચન ॥ ૧૮॥

વિદ્યાધરો યથા મૂર્ખો જન્માન્ધસ્તુ દિવાકરઃ ।
લક્ષ્મીધરો દરિદ્રશ્ચ નામ તેષાં નિરર્થકમ્ ॥ ૧૯॥

તવ વંશોદ્ભવા યે યે શ્રુતાઃ પૂર્વે મયા નૃપાઃ ।
વિદેહા ઇતિ વિખ્યાતા નામતઃ કર્મતો ન તે ॥ ૨૦॥

નિમિનામાભવદ્રાજા પૂર્વં તવ કુલે નૃપ ।
યજ્ઞાર્થં સ તુ રાજર્ષિર્વસિષ્ઠં સ્વગુરું મુનિમ્ ॥ ૨૧॥

નિમન્ત્રયામાસ તદા તમુવાચ નૃપં મુનિઃ ।
નિમન્ત્રિતોઽસ્મિ યજ્ઞાર્થં દેવેન્દ્રેણાધુના કિલ ॥ ૨૨॥

કૃત્વા તસ્ય મખં પૂર્ણં કરિષ્યામિ તવાપિ વૈ ।
તાવત્કુરુષ્વ રાજેન્દ્ર સમ્ભારં તુ શનૈઃ શનૈઃ ॥ ૨૩॥

ઇત્યુક્ત્વા નિર્યયૌ સોઽથ મહેન્દ્રયજને મુનિઃ ।
નિમિરન્યં ગુરું કૃત્વા ચકાર મખમુત્તમમ્ ॥ ૨૪॥

તચ્છ્રુત્વા કુપિતોઽત્યર્થં વસિષ્ઠો નૃપતિં પુનઃ ।
શશાપ ચ પતત્વદ્ય દેહસ્તે ગુરુલોપક ॥ ૨૫॥

રાજાપિ તં શશાપાથ તવાપિ ચ પતત્વયમ્ ।
અન્યોન્યશાપાત્પતિતૌ તાવેવ ચ મયા શ્રુતમ્ ॥ ૨૬॥

વિદેહેન ચ રાજેન્દ્ર કથં શપ્તો ગુરુઃ સ્વયમ્ ।
વિનોદ ઇવ મે ચિત્તે વિભાતિ નૃપસત્તમ ॥ ૨૭॥

જનક ઉવાચ ।
સત્યમુક્તં ત્વયા નાત્ર મિથ્યા કિઞ્ચિદિદં મતમ્ ।
તથાપિ શ‍ૃણુ વિપ્રેન્દ્ર ગુરુર્મમ સુપૂજિતઃ ॥ ૨૮॥

પિતુઃ સઙ્ગં પરિત્યજ્ય ત્વં વનં ગન્તુમિચ્છસિ ।
મૃગૈઃ સહ સુસમ્બન્ધો ભવિતા તે ન સંશયઃ ॥ ૨૯॥

મહાભૂતાનિ સર્વત્ર નિઃસઙ્ગઃ ક્વ ભવિષ્યસિ ।
આહારાર્થં સદા ચિન્તા નિશ્ચિન્તઃ સ્યાઃ કથં મુને ॥ ૩૦॥

દણ્ડાજિનકૃતા ચિન્તા યથા તવ વનેઽપિ ચ ।
તથૈવ રાજ્યચિન્તા મે ચિન્તયાનસ્ય વા ન વા ॥ ૩૧॥

વિકલ્પોપહતસ્ત્વં વૈ દૂરદેશમુપાગતઃ ।
ન મે વિકલ્પસન્દેહો નિર્વિકલ્પોઽસ્મિ સર્વથા ॥ ૩૨॥

સુખં સ્વપિમિ વિપ્રાહં સુખં ભુઞ્જામિ સર્વથા ।
ન બદ્ધોઽસ્મીતિ બુદ્ધ્યાહં સર્વદૈવ સુખી મુને ॥ ૩૩॥

ત્વં તુ દુઃખી સદૈવાસિ બદ્ધોઽહમિતિ શઙ્કયા ।
ઇતિ શઙ્કાં પરિત્યજ્ય સુખી ભવ સમાહિતઃ ॥ ૩૪॥

દેહોઽયં મમ બન્ધોઽયં ન મમેતિ ચ મુક્તતા ।
તથા ધનં ગૃહં રાજ્યં ન મમેતિ ચ નિશ્ચયઃ ॥ ૩૫॥

સૂત ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય શુકઃ પ્રીતમનાભવત્ ।
આપૃચ્છ્ય તં જગામાશુ વ્યાસસ્યાશ્રમમુત્તમમ્ ॥ ૩૬॥

આગચ્છન્તં સુતં દૃષ્ટ્વા વ્યાસોઽપિ સુખમાપ્તવાન્ ।
આલિઙ્ગ્યાઘ્રાય મૂર્ધાનં પપ્રચ્છ કુશલં પુનઃ ॥ ૩૭॥

સ્થિતસ્તત્રાશ્રમે રમ્યે પિતુઃ પાર્શ્વે સમાહિતઃ ।
વેદાધ્યયનસમ્પન્નઃ સર્વશાસ્ત્રવિશારદઃ ॥ ૩૮॥

જનકસ્ય દશાં દૃષ્ટ્વા રાજ્યસ્થસ્ય મહાત્મનઃ ।
સ નિર્વૃતિં પરાં પ્રાપ્ય પિતુરાશ્રમસંસ્થિતઃ ॥ ૩૯॥

પિતૃણાં સુભગા કન્યા પીવરી નામ સુન્દરી ।
શુકશ્ચકાર પત્નીં તાં યોગમાર્ગસ્થિતોઽપિ હિ ॥ ૪૦॥

સ તસ્યાં જનયામાસ પુત્રાંશ્ચતુર એવ હિ ।
કૃષ્ણં ગૌરપ્રભં ચૈવ ભૂરિં દેવશ્રુતં તથા ॥ ૪૧॥

કન્યાં કીર્તિં સમુત્પાદ્ય વ્યાસપુત્રઃ પ્રતાપવાન્ ।
દદૌ વિભ્રાજપુત્રાય ત્વણહાય મહાત્મને ॥ ૪૨॥

અણુહસ્ય સુતઃ શ્રીમાન્બ્રહ્મદત્તઃ પ્રતાપવાન્ ।
બ્રહ્મજ્ઞઃ પૃથિવીપાલઃ શકકન્યાસમુદ્ભવઃ ॥ ૪૩॥

કાલેન કિયતા તત્ર નારદસ્યોપદેશતઃ ।
જ્ઞાનં પરમકં પ્રાપ્ય યોગમાર્ગમનુત્તમમ્ ॥ ૪૪॥

પુત્રે રાજ્યં નિધાયાથ ગતો બદરિકાશ્રમમ્ ।
માયાબીજોપદેશેન તસ્ય જ્ઞાનં નિરર્ગલમ્ ॥ ૪૫॥

નારદસ્ય પ્રસાદેન જાતં સદ્યો વિમુક્તિદમ્ ।
કૈલાસશિખરે રમ્યે ત્યક્ત્વા સઙ્ગં પિતુઃ શુકઃ ॥ ૪૬॥

ધ્યાનમાસ્થાય વિપુલં સ્થિતઃ સઙ્ગપરાઙ્મુખઃ ।
ઉત્પપાત ગિરેઃ શૃઙ્ગાત્સિદ્ધિં ચ પરમાં ગતઃ ॥ ૪૭॥

આકાશગો મહાતેજા વિરરાજ યથા રવિઃ ।
ગિરેઃ શૃઙ્ગં દ્વિધા જાતં શુકસ્યોત્પતને તદા ॥ ૪૮॥

ઉત્પાતા બહવો જાતાઃ શુકશ્ચાકાશગોઽભવત્ ।
અન્તરિક્ષે યથા વાયુઃ સ્તૂયમાનઃ સુરર્ષિભિઃ ॥ ૪૯॥

તેજસાતિવિરાજન્વૈ દ્વિતીય ઇવ ભાસ્કરઃ ।
વ્યાસસ્તુ વિરહાક્રાન્તઃ ક્રન્દન્પુત્રેતિ ચાસકૃત્ ॥ ૫૦॥

ગિરેઃ શૃઙ્ગે ગતસ્તત્ર શુકો યત્ર સ્થિતોઽભવત્ ।
ક્રન્દમાનં તદા દીનં વ્યાસં મત્વા શ્રમાકુલમ્ ॥ ૫૧॥

સર્વભૂતગતઃ સાક્ષી પ્રતિશબ્દમદાત્તદા ।
તત્રાદ્યાપિ ગિરેઃ શૃઙ્ગે પ્રતિશબ્દઃ સ્ફુટોઽભવત્ ॥ ૫૨॥

રુદન્તં તં સમાલક્ષ્ય વ્યાસં શોકસમન્વિતમ્ ।
પુત્ર પુત્રેતિ ભાષન્તં વિરહેણ પરિપ્લુતમ્ ॥ ૫૩॥

શિવસ્તત્ર સમાગત્ય પારાશર્યમબોધયત્ ।
વ્યાસ શોકં મા કુરુ ત્વં પુત્રસ્તે યોગવિત્તમઃ ॥ ૫૪॥

પરમાં ગતિમાપન્નો દુર્લભાં ચાકૃતાત્મભિઃ ।
તસ્ય શોકો ન કર્તવ્યસ્ત્વયાશોકં વિજાનતા ॥ ૫૫॥

કીર્તિસ્તે વિપુલા જાતા તેન પુત્રેણ ચાનઘ ।
વ્યાસ ઉવાચ ।
ન શોકો યાતિ દેવેશ કિં કરોમિ જગત્પતે ॥ ૫૬॥

અતૃપ્તે લોચને મેઽદ્ય પુત્રદર્શનલાલસે ।
મહાદેવ ઉવાચ ।
છાયાં દ્રક્ષ્યસિ પુત્રસ્ય પાર્શ્વસ્થાં સુમનોહરામ્ ॥ ૫૭॥

તાં વીક્ષ્ય મુનિશાર્દૂલ શોકં જહિ પરન્તપ ।
સૂત ઉવાચ ।
તદા દદર્શ વ્યાસસ્તુ છાયાં પુત્રસ્ય સુપ્રભામ્ ॥ ૫૮॥

દત્ત્વા વરં હરસ્તસ્મૈ તત્રૈવાન્તરધીયત ।
અન્તર્હિતે મહાદેવે વ્યાસઃ સ્વાશ્રમમભ્યગાત્ ॥ ૫૯॥

શુકસ્ય વિરહેણાપિ તપ્તઃ પરમદુઃખિતઃ ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં પ્રથમસ્કન્ધે
શુકસ્ય વિવાહાદિકાર્યવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૧.૧૯॥

## ૧.૨૦ વિંશોઽધ્યાયઃ । ધૃતરાષ્ટ્રાદીનામુત્પત્તિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
શુકસ્તુ પરમાં સિદ્ધિમાપ્તવાન્દેવસત્તમઃ ।
કિં ચકાર તતો વ્યાસસ્તન્નો બ્રૂહિ સવિસ્તરમ્ ॥ ૧॥

સૂત ઉવાચ ।
શિષ્યા વ્યાસસ્ય યેઽપ્યાસન્વેદાભ્યાસપરાયણાઃ ।
આજ્ઞામાદાય તે સર્વે ગતાઃ પૂર્વં મહીતલે ॥ ૨॥

અસિતો દેવલશ્ચૈવ વૈશમ્પાયન એવ ચ ।
જૈમિનિશ્ચ સુમન્તુશ્ચ ગતાઃ સર્વે તપોધનાઃ ॥ ૩॥

તાનેતાન્વીક્ષ્ય પુત્રં ચ લોકાન્તરિતમપ્યુત ।
વ્યાસઃ શોકસમાક્રાન્તો ગમનાયાકરોન્મતિમ્ ॥ ૪॥

સસ્માર મનસા વ્યાસસ્તાં નિષાદસુતાં શુભામ્ ।
માતરં જાહ્નવીતીરે મુક્તાં શોકસમન્વિતામ્ ॥ ૫॥

સ્મૃત્વા સત્યવતીં વ્યાસસ્ત્યક્ત્વા તં પર્વતોત્તમમ્ ।
આજગામ મહાતેજા જન્મસ્થાનં સ્વકં મુનિઃ ॥ ૬॥

દ્વીપં પ્રાપ્યાથ પપ્રચ્છ ક્વ ગતા સા વરાનના ।
નિષાદાસ્તં સમાચખ્યુર્દત્તા રાજ્ઞે તુ કન્યકા ॥ ૭॥

દાશરાજોઽપિ સમ્પૂજ્ય વ્યાસં પ્રીતિપુરઃસરમ્ ।
સ્વાગતેનાભિસત્કૃત્ય પ્રોવાચ વિહિતાઞ્જલિઃ ॥ ૮॥

દાશરાજ ઉવાચ ।
અદ્ય મે સફલં જન્મ પાવિતં નઃ કુલં મુને ।
દેવાનામપિ દુર્દર્શં યજ્જાતં તવ દર્શનમ્ ॥ ૯॥

યદર્થમાગતોઽસિ ત્વં તદ્બ્રૂહિ દ્વિજસત્તમ ।
અપિ દારા ધનં પુત્રાસ્ત્વદાયત્તમિદં વિભો ॥ ૧૦॥

સરસ્વત્યાસ્તટે રમ્યે ચકારાશ્રમમણ્ડલમ્ ।
વ્યાસસ્તપઃસમાયુક્તસ્તત્રૈવાસ સમાહિતઃ ॥ ૧૧॥

સત્યવત્યાઃ સુતૌ જાતૌ શન્તનોરમિતદ્યુતેઃ ।
મત્વા તૌ ભ્રાતરૌ વ્યાસઃ સુખમાપ વને સ્થિતઃ ॥ ૧૨॥

ચિત્રાઙ્ગદઃ પ્રથમજો રૂપવાઞ્છત્રુતાપનઃ ।
બભૂવ નૃપતેઃ પુત્રઃ સર્વલક્ષણસંયુતઃ ॥ ૧૩॥

વિચિત્રવીર્યનામાસૌ દ્વિતીયઃ સમજાયત ।
સોઽપિ સર્વગુણોપેતઃ શન્તનોઃ સુખવર્ધનઃ ॥ ૧૪॥

ગાઙ્ગેયઃ પ્રથમસ્તસ્ય મહાવીરો બલાધિકઃ ।
તથૈવ તૌ સુતૌ જાતૌ સત્યવત્યાં મહાબલૌ ॥ ૧૫॥

શન્તનુસ્તાન્સુતાન્વીક્ષ્ય સર્વલક્ષણસંયુતાન્ ।
અમંસ્તાજય્યમાત્માનં દેવાદીનાં મહામનાઃ ॥ ૧૬॥

અથ કાલેન કિયતા શન્તનુઃ કાલપર્યયાત્ ।
તત્યાજ દેહં ધર્માત્મા દેહી જીર્ણમિવામ્બરમ્ ॥ ૧૭॥

કાલધર્મગતે રાજ્ઞિ ભીષ્મશ્ચક્રે વિધાનતઃ ।
પ્રેતકાર્યાણિ સર્વાણિ દાનાનિ વિવિધાનિ ચ ॥ ૧૮॥

ચિત્રાઙ્ગદં તતો રાજ્યે સ્થાપયામાસ વીર્યવાન્ ।
સ્વયં ન કૃતવાન્ રાજ્યં તસ્માદ્દેવવ્રતોઽભવત્ ॥ ૧૯॥

ચિત્રાઙ્ગદસ્તુ વીર્યેણ પ્રમત્તઃ પરદુઃખદઃ ।
બભૂવ બલવાન્વીરઃ સત્યવત્યાત્મજઃ શુચિઃ ॥ ૨૦॥

અથૈકદા મહાબાહુઃ સૈન્યેન મહતાવૃતઃ ।
પ્રચચાર વનોદ્દેશાત્પશ્યન્વધ્યાન્મૃગાન્ રુરૂન્ ॥ ૨૧॥

ચિત્રાઙ્ગદસ્તુ ગન્ધર્વો દૃષ્ટ્વા તં માર્ગગં નૃપમ્ ।

ઉત્તતારાન્તિકં ભૂમેર્વિમાનવરમાસ્થિતઃ ॥ ૨૨॥

તત્રાભૂચ્ચ મહદ્યુદ્ધં તયોઃ સદૃશવીર્યયોઃ ।
કુરુક્ષેત્રે મહાસ્થાને ત્રીણિ વર્ષાણિ તાપસાઃ ॥ ૨૩॥

ઇન્દ્રલોકમવાપાશુ ગન્ધર્વેણ હતો રણે ।
ભીષ્મઃ શ્રુત્વા ચકારાશુ તસ્યૌર્ધ્વદૈહિકં તદા ॥ ૨૪॥

ગાઙ્ગેયઃ કૃતશોકસ્તુ મન્ત્રિભિઃ પરિવારિતઃ ।
વિચિત્રવીર્યનામાનં રાજ્યેશં ચ ચકાર હ ॥ ૨૫॥

મન્ત્રિભિર્બોધિતા પશ્ચાદ્ગુરુભિશ્ચ મહાત્મભિઃ ।
સ્વપુત્રં રાજ્યગં દૃષ્ટ્વા પુત્રશોકહતાપિ ચ ॥ ૨૬॥

સત્યવત્યતિસન્તુષ્ટા બભૂવ વરવર્ણિની ।
વ્યાસોઽપિ ભ્રાતરં શ્રુત્વા રાજાનં મુદિતોઽભવત્ ॥ ૨૭॥

યૌવનં પરમં પ્રાપ્તઃ સત્યવત્યાઃ સુતઃ શુભઃ ।
ચકાર ચિન્તાં ભીષ્મોઽપિ વિવાહાર્થં કનીયસઃ ॥ ૨૮॥

કાશિરાજસુતાસ્તિસ્રઃ સર્વલક્ષણસંયુતાઃ ।
તેન રાજ્ઞા વિવાહાર્થં સ્થાપિતાશ્ચ સ્વયંવરે ॥ ૨૯॥

રાજાનો રાજપુત્રાશ્ચ સમાહૂતાઃ સહસ્રશઃ ।
ઇચ્છાસ્વયંવરાર્થં વૈ પૂજ્યમાનાઃ સમાગતાઃ ॥ ૩૦॥

તત્ર ભીષ્મો મહાતેજાસ્તા જહાર બલેન વૈ ।
નિર્મથ્ય રાજકં સર્વં રથેનૈકેન વીર્યવાન્ ॥ ૩૧॥

સ જિત્વા પાર્થિવાન્સર્વાંસ્તાશ્ચાદાય મહારથઃ ।
બાહુવીર્યેણ તેજસ્વી હ્યાસસાદ ગજાહ્વયમ્ ॥ ૩૨॥

માતૃવદ્ભગિનીવચ્ચ પુત્રીવચ્ચિન્તયન્કિલ ।
તિસ્રઃ સમાનયામાસ કન્યકા વામલોચનાઃ ॥ ૩૩॥

સત્યવત્યૈ નિવેદ્યાશુ દ્વિજાનાહૂય સત્વરઃ ।
દૈવજ્ઞાન્વેદવિદુષઃ પર્યપૃચ્છચ્છુભં દિનમ્ ॥ ૩૪॥

કૃત્વા વિવાહસમ્ભારં યદા વૈ ભ્રાતરં નિજમ્ ।
વિચિત્રવીર્યં ધર્મિષ્ઠં વિવાહયતિ તા યદા ॥ ૩૫॥

તદા જ્યેષ્ઠાપ્યુવાચેદં કન્યકા જાહ્નવીસુતમ્ ।
લજ્જમાનાસિતાપાઙ્ગી તિસૃણાં ચારુલોચના ॥ ૩૬॥

ગઙ્ગાપુત્ર કુરુશ્રેષ્ઠ ધર્મજ્ઞ કુલદીપક ।
મયા સ્વયંવરે શાલ્વો વૃતોઽસ્તિ મનસા નૃપઃ ॥ ૩૭॥

વૃતાહં તેન રાજ્ઞા વૈ ચિત્તે પ્રેમસમાકુલે ।
યથાયોગ્યં કુરુષ્વાદ્ય કુલસ્યાસ્ય પરન્તપ ॥ ૩૮॥

તેનાહં વૃતપૂર્વાઽસ્મિ ત્વં ચ ધર્મભૃતાં વરઃ ।
બલવાનસિ ગાઙ્ગેય યથેચ્છસિ તથા કુરુ ॥ ૩૯॥

સૂત ઉવાચ ।
એવમુક્તસ્તયા તત્ર કન્યયા કુરુનન્દનઃ ।
અપૃચ્છત્ બ્રાહ્મણાન્વૃદ્ધાન્માતરં સચિવાંસ્તથા ॥ ૪૦॥

સર્વેષાં મતમાજ્ઞાય ગાઙ્ગેયો ધર્મવિત્તમઃ ।
ગચ્છેતિ કન્યકાં પ્રાહ યથારુચિ વરાનને ॥ ૪૧॥

વિસર્જિતાથ સા તેન ગતા શાલ્વનિકેતનમ્ ।
ઉવાચ તં વરારોહા રાજાનં મનસેપ્સિતમ્ ॥ ૪૨॥

વિનિર્મુક્તાસ્મિ ભીષ્મેણ ત્વન્મનસ્કેતિ ધર્મતઃ ।
આગતાસ્મિ મહારાજ ગૃહાણાદ્ય કરં મમ ॥ ૪૩॥

ધર્મપત્ની તવાત્યન્તં ભવામિ નૃપસત્તમ ।
ચિન્તિતોઽસિ મયા પૂર્વં ત્વયાહં નાત્ર સંશયઃ ॥ ૪૪॥

શાલ્વ ઉવાચ ।
ગૃહીતા ત્વં વરારોહે ભીષ્મેણ પશ્યતો મમ ।
રથે સંસ્થાપિતા તેન ન ગ્રહીષ્યે કરં તવ ॥ ૪૫॥

પરોચ્છિષ્ટાં ચ કઃ કન્યાં ગૃહ્ણાતિ મતિમાન્નરઃ ।
અતોઽહં ન ગ્રહીષ્યામિ ત્યક્તાં ભીષ્મેણ માતૃવત્ ॥ ૪૬॥

રુદતી વિલપન્તી સા ત્યક્તા તેન મહાત્મના ।
પુનર્ભીષ્મં સમાગત્ય રુદતી ચેદમબ્રવીત્ ॥ ૪૭॥

શાલ્વો મુક્તાં ત્વયા વીર ન ગૃહ્ણાતિ ગૃહાણ મામ્ ।
ધર્મજ્ઞોઽસિ મહાભાગ મરિષ્યામ્યન્યથા હ્યહમ્ ॥ ૪૮॥

ભીષ્મ ઉવાચ ।
અન્યચિત્તાં કથં ત્વાં વૈ ગૃહ્ણામિ વરવર્ણિનિ ।
પિતરં સ્વં વરારોહે વ્રજ શીઘ્રં નિરાકુલા ॥ ૪૯॥

તથોક્તા સા તુ ભીષ્મેણ જગામ વનમેવ હિ ।
તપશ્ચકાર વિજને તીર્થે પરમપાવને ॥ ૫૦॥

દ્વે ભાર્યે ચાતિરૂપાઢ્યે તસ્ય રાજ્ઞો બભૂવતુઃ ।
અમ્બાલિકા ચામ્બિકા ચ કાશિરાજસુતે શુભે ॥ ૫૧॥

રાજા વિચિત્રવીર્યોઽસૌ તાભ્યાં સહ મહાબલઃ ।
રેમે નાનાવિહારૈશ્ચ ગૃહે ચોપવને તથા ॥ ૫૨॥

વર્ષાણિ નવ રાજેન્દ્રઃ કુર્વન્ ક્રીડા મનોરમામ્ ।
પ્રાપાસૌ મરણં ભૂયો ગૃહીતો રાજયક્ષ્મણા ॥ ૫૩॥

મૃતે પુત્રેઽતિદુઃખાર્તા જાતા સત્યવતી તદા ।
કારયામાસ પુત્રસ્ય પ્રેતકાર્યાણિ મન્ત્રિભિઃ ॥ ૫૪॥

ભીષ્મમાહ તદૈકાન્તે વચનં ચાતિદુઃખિતા ।
રાજ્યં કુરુ મહાભાગ પિતુસ્તે શન્તનોઃ સુત ॥ ૫૫॥

ભ્રાતુર્ભાર્યાં ગૃહાણ ત્વં વંશઞ્ચ પરિરક્ષય ।
યથા ન નાશમાયાતિ યયાતેર્વંશ ઇત્યુત ॥ ૫૬॥

ભીષ્મ ઉવાચ ।
પ્રતિજ્ઞા મે શ્રુતા માતઃ પિત્રર્થે યા મયા કૃતા ।
નાહં રાજ્યં કરિષ્યામિ ન ચાહં દારસઙ્ગ્રહમ્ ॥ ૫૭॥

સૂત ઉવાચ ।
તદા ચિન્તાતુરા જાતા કથં વંશો ભવેદિતિ ।
નાલસાદ્ધિ સુખં મહ્યં સમુત્પન્ને હ્યરાજકે ॥ ૫૮॥

ગાઙ્ગેયસ્તામુવાચેદં મા ચિન્તાં કુરુ ભામિનિ ।
પુત્રં વિચિત્રવીર્યસ્ય ક્ષેત્રજં ચોપપાદય ॥ ૫૯॥

કુલીનં દ્વિજમાહૂય વધ્વા સહ નિયોજય ।
નાત્ર દોષોઽસ્તિ વેદેઽપિ કુલરક્ષાવિધૌ કિલ ॥ ૬૦॥

પૌત્રં ચૈવં સમુત્પાદ્ય રાજ્યં દેહિ શુચિસ્મિતે ।

અહં ચ પાલયિષ્યામિ તસ્ય શાસનમેવ હિ ॥ ૬૧॥

તચ્છ્રુત્વા વચનં તસ્ય કાનીનં સ્વસુતં મુનિમ્ ।
જગામ મનસા વ્યાસં દ્વૈપાયનમકલ્મષમ્ ॥ ૬૨॥

સ્મૃતમાત્રસ્તતો વ્યાસ આજગામ સ તાપસઃ ।
કૃત્વા પ્રણામં માત્રેઽથ સંસ્થિતો દીપ્તિમાન્મુનિઃ ॥ ૬૩॥

ભીષ્મેણ પૂજિતઃ કામં સત્યવત્યા ચ માનિતઃ ।
તસ્થૌ તત્ર મહાતેજા વિધૂમોઽગ્નિરિવાપરઃ ॥ ૬૪॥

તમુવાચ મુનિં માતા પુત્રમુત્પાદયાધુના ।
ક્ષેત્રે વિચિત્રવીર્યસ્ય સુન્દરં તવ વીર્યજમ્ ॥ ૬૫॥

વ્યાસઃ શ્રુત્વા વચો માતુરાપ્તવાક્યમમન્યત ।
ઓમિત્યુક્ત્વા સ્થિતસ્તત્ર ઋતુકાલમચિન્તયત્ ॥ ૬૬॥

અમ્બિકા ચ યદા સ્નાતા નારી ઋતુમતી તદા ।
સઙ્ગં પ્રાપ્ય મુનેઃ પુત્રમસૂતાન્ધં મહાબલમ્ ॥ ૬૭॥

જન્માન્ધં ચ સુતં વીક્ષ્ય દુઃખિતા સત્યવત્યપિ ।
દ્વિતીયાં ચ વધૂમાહ પુત્રમુત્પાદયાશુ વૈ ॥ ૬૮॥

ઋતુકાલેઽથ સમ્પ્રાપ્તે વ્યાસેન સહ સઙ્ગતા ।
તથા ચામ્બાલિકા રાત્રૌ ગર્ભં નારી દધાર સા ॥ ૬૯॥

સોઽપિ પાણ્ડુઃ સુતો જાતો રાજ્યયોગ્યો ન સમ્મતઃ ।
પુત્રાર્થે પ્રેરયામાસ વર્ષાન્તે ચ પુનર્વધૂમ્ ॥ ૭૦॥

આહૂય ચ તતો વ્યાસં સમ્પ્રાર્થ્ય મુનિસત્તમમ્ ।
પ્રેષયામાસ રાત્રૌ સા શયનાગારમુત્તમમ્ ॥ ૭૧॥

ન ગતા ચ વધૂસ્તત્ર પ્રેષ્યા સમ્પ્રેષિતા તયા ।
તસ્યાં ચ વિદુરો જાતો દાસ્યાં ધર્માંશતઃ શુભઃ ॥ ૭૨॥

એવં વ્યાસેન તે પુત્રા ધૃતરાષ્ટ્રાદયસ્ત્રયઃ ।
ઉત્પાદિતા મહાવીરા વંશરક્ષણહેતવે ॥ ૭૩॥

એતદ્વઃ સર્વમાખ્યાતં તસ્ય વંશસમુદ્ભવમ્ ।
વ્યાસેન રક્ષિતો વંશો ભ્રાતૃધર્મવિદાનઘાઃ ॥ ૭૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
પ્રથમસ્કન્ધે ધૃતરાષ્ટ્રાદીનામુત્પત્તિવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૧.૨૦॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે પ્રથમસ્કન્ધઃ સમાપ્તઃ ॥

Encoded and proofread by Vishwas Bhide

*1 Shrimaddevibhagavatamahapurane Prathamah Skandhah*
pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*